# व्याकरणदर्शनम्

## Course Code: M23SN03DE

Discipline Specific Elective Course
Postgraduate Programme in
Sanskrit Language and Literature
Self Learning Material



SREENARAYANAGURU
OPEN UNIVERSITY

## SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# व्याकरणदर्शनम्

Course Code: M23SN03DE

Semester - III

**Discipline Specific Elective Course**
**Postgraduate Programme**
**Sanskrit Language and Literature**
**Self Learning Material**
**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**
The State University for Education, Training and Research in Blended Format, Kerala

# व्याकरणदर्शनम्

Course Code: M23SN03DE
Semester- III
Discipline Specific Elective Course
MA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY

**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair

**Development of the Content**

Dr. G. Sahadevan

**Review and Edit**

Prof. Anandan R.

**Linguistics**

Prof. Anandan R.

**Scrutiny**

Dr. Jothilekshmi M.
Dr. Sreeja J.
Dr. Vijayarajan K.U.
Chitra Baskar
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition**
January 2025

**Copyright**
© Sreenarayanaguru Open University

ISBN 978-81-985210-3-3

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed “blended format,” a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university’s student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-01-2025

# CONTENTS


**PART I**

**Block - 1 महाभाष्यम् 1** **1**

Unit - 1 संस्कृतव्याकरणे महाभाष्यस्य प्राधान्यम् 2

Unit - 2 व्याकरणशास्त्रे वाक्यपदीयस्य स्थानम् 16

Unit - 3 पतञ्जलिः भर्तृहरिः च 28

Unit - 4 शास्त्रारम्भप्रतिज्ञा 39

**Block - 2 महाभाष्यम् - 2** **45**

Unit - 1 शब्दनिर्णयाधिकरणम् 46

Unit - 2 शब्दानुशासनप्रयोजनम् 53

Unit - 3 शाब्दोपदेशः 72

Unit - 4 व्याकरणपदार्थविचारः

**PART II** 98

**Block - 3 वाक्यपदीयम् 1** **109**

Unit - 1 शब्दब्रह्मस्वरूपम् 110

Unit - 2 शब्दानुशासनप्रयोजनम् 119

Unit - 3 शब्दशास्त्रस्य महत्वम् 128

Unit - 4 शब्दार्थसंबन्धम् 141

**Block - 4 वाक्यपदीयम् -2** **151**

Unit - 1 आगमस्य प्राधान्यम् 152

Unit - 2 आगमप्रमाणस्य श्रेष्ठत्वम् 161

Unit - 3 शाब्दभेदाः शब्दे अनेकधर्मारोपश्च 169

Unit - 4 शाब्दबोधकत्वकथनम् 181

**Model Question Paper (SET – A)** **188**

**Model Question Paper (SET – B)** **190**


SGOU

# महाभाष्यम् - 1

## BLOCK - 1

SGOU

UNIT 1

# संस्कृतव्याकरणे महाभाष्यस्य प्राधान्यम्

## Learning Outcomes

- प्रसिद्धान् व्याकरणग्रन्थान् परिचिनोति।
- मुनित्रयकालस्य प्राधान्यं जानाति।
- महाभाष्यस्य प्राधान्यम् अवगच्छति।

## Background

सहितयोः शब्दार्थयोः भावः साहित्म्। शब्दार्थयोः समञ्जसमेलनेन साहित्याविर्भावः। शब्दं बिना अर्थः, अर्थं विना शब्दश्च न। शब्दः कश्चन प्रकाशः। शब्दाः पदार्थान् प्रकाशयन्ति। प्रकाशानपि प्रकाशयति इति भर्तृहरिः। 'सर्वं शब्देन भासते'। उक्तं च दण्डिना

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। इति**

शब्दः प्रकृतिप्रत्ययसमवायैरलङ्कृतः भवति। प्रकृतिप्रत्ययविवेचनाय व्याकरणपठनमावश्यकम्। व्याकरणसाहित्यं प्राचीननव्यभेदयुतम्। ब्रह्मैव प्रायः सर्वासु विद्यासु प्रथमः आचार्यः इति प्रथते। ब्रह्मणः पश्चाद् व्याकरणशास्त्रस्य प्रवक्ता देवगुरुः बृहस्पतिरिति। पतञ्जलिः महाभाष्ये सूचितवान्। व्याकरणशास्त्रस्य इतिहासं अतिविस्तृत एव। व्याकरणेतिहासं त्रिधा विभक्तुं शक्यते।

मुनित्रयकालस्य पूर्ववर्ति, मुनित्रयकालवर्ति, मुनित्रयपश्चाद्वर्ति। केचनाचार्याः पाणिनेः पूर्ववर्तिनः, केचित् पाणिनिसमकालिकाः, केचिदन्ये पाणिनेः पश्चाद्वर्तिनः इति त्रिधा विभज्यन्ते। सर्वत्रापि पाणिनिरेव केन्द्रबिन्दुः। अस्मिन्नेकके व्याकरणेतिहासं संक्षिप्य संसूच्य महाभाष्यस्य प्राधान्यं विशदयति।

## Keywords

व्याकरणम् - प्राधान्यानि - प्रमुखाः ग्रन्थाः - प्रयोजनानि - पौराणिकव्याकरणग्रन्थाः - विविधाः कालाः - पाणिनिः - कातयायनः - पतञ्जलिः - महाभाष्यम् - अह्निकाः - महाभाष्यस्य सर्वतोन्मुखत्वम् - प्राधान्यम्।

## Discussion

### किं नाम व्याकरणम्?

व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम्

व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दाः अनेन इति व्याकरणम्। वि + आ (ङ्) + कृ + ल्युट् - व्याकरणम्। विशेषेण आ समन्तात् 'डुकृञ् करणे' इति धातोः करणार्थे ल्युट् प्रत्यये व्याकरणम् इति शब्दनिष्पत्तिः। अस्मान् परितः वर्तमानानि पदानि निरीक्ष्य भाषानुकूलं तेषां शब्दानां साधुत्वं कल्पयत् शास्त्रमेव व्याकरणम्।

### मुनित्रयपूर्वकालः

भारते बहवः वैयाकरणाचार्याः व्याकरणग्रन्थाश्च आसन्, सन्ति च। भाषायाः उत्पत्या साकं व्याकरणशास्त्ररचना च आरब्धा। भाषाप्रयोगे

व्यक्त्यनुसारं कालानुसृतं च व्यतियानमागतम्। 'भिन्ना हि रुचयः'। शैलीष्वपि भिन्नता संजाता। व्याकरणेतिहासं त्रिधा विभक्तुं शक्यते। प्रथमः तु मुनित्रयपूर्वकालिकः।

व्याकरणेतिहासस्य केन्द्रबिन्दुः पाणिनिरेव। तस्य पूर्वगामिनः आचार्याः बहवः। ब्रह्मैव प्रथमः व्याकरणाचार्यः इति, पुनः बृहस्पतिरिति विश्वासः। अपि च इन्द्रः, वायुः, भरद्वाजः, भागुरिः, पौष्करसादिः, काशकृत्स्नः, शौनकः, आपिशलिः, गार्ग्यः, गालवः, चाक्रवर्मणः, भारद्वाजः, शाकटायनः, शाकल्यः, सेनकः स्फोटायनादयः चासन्। अत्रापि मतभेदोऽस्ति। उपर्युक्तेषु वैयाकरणेषु कतिपये पाणिनेः समकालिकाः।

**व्याकरणशास्त्रस्य परम्परा**

व्याकरणशास्त्रस्य प्रथमः प्रवक्ता 'ब्रह्मा' इति कल्प्यते। 'ऋक् तन्त्रे' इयं सूचना वर्तते - 'ब्रह्म बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय इन्द्रो भारद्वाजाय, भारद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः इति । द्वितीयः प्रवक्ता बृहस्पतिः। बृहस्पतिः सामगानस्य, वेदङ्गानाम्, इतिहासपुराणानां, ज्योतिषशास्त्रस्य, अर्थशास्त्रस्य वास्तुशास्त्रदीनाम् च प्रवक्ता आसीदिति। व्याकरणस्य संस्कर्ता इन्द्रः इति विश्वासः। व्याकरणस्य प्राचीनं स्वरूपम् अतिक्लिष्टतममासीत्।

व्याकरणशास्त्रेतिहासे सुप्रसिद्धं नाम भवति वायुः। अयं वायुः इन्द्रसमकालिकः इति निश्चीयते पण्डितैः। भारद्वाजः व्याकरणशास्त्रस्य आयुर्वेदस्य च ज्ञानम् इन्द्रात् सम्पादितवान् इति विस्वासः। तेन भारद्वाजेन भारद्वाजव्याकरणम्, आयुर्वेदसंहिता, राजशास्त्रम्, शिक्षादयः ग्रन्थाः रचिताः। शिक्षा नामकः ग्रन्थः इदानीमुपलभ्यते। भागुरिरपि वैयाकरणाचार्यः। भागुरिमते 'अव, अपि' इत्यनयोरुपसर्गयोः पूर्ववर्तिनः अकारस्य लोपः स्यात्। तेन 'अवगाहः, वगाहः' 'पिधानम्, अपिधानम्' इत्यादीनि रूपाणि। पौष्करसादिः नाम वैयाकरणाचार्यः व्यासमहर्षेः समकालिकः इति विश्वासः।

काशकृत्स्नमधिकृत्य सूचना महाभाष्ये प्रथमे आह्निके वर्तते। सोऽयं वैयाकरणः काशकृत्स्नतन्त्रम्, धातुव्याख्यानं, मीमांसाशास्त्रं च रचितवान्। शौनकः वैयाकरणः आयुर्वेदाचार्यश्चासीत्। अष्टाङ्गहृदयस्य कल्पस्थाने शौनकस्य चिकित्साग्रन्थस्य निर्देशः लभ्यते। आचार्यम् आपिशलिम् अष्टाध्याय्यां पाणिनिं 'वा सुप्यापिशलेः' इति सूत्रे अनुस्मृतवान्। आचार्यं गार्ग्यमधिकृत्य पाणिनीयसूत्रेषु निर्देशः वर्तते। निरुक्तेऽपि गार्ग्यमतं समुद्धृतं वर्तते। पाणिनिः चतुर्षु सूत्रेषु गालवमहर्षेः नाम निर्दिदेश। गालवव्याकरणमेव तस्य मुख्या कृतिः। गालसंहिता - शिक्षा - कामसुत्रम् – एवमादिविषयेषु तस्य रचनाः आसन्। चाक्रवर्मणः नाम वैयाकरणम् अधिकृत्य पाणिनिः भट्टोजिदीक्षितः च संस्मरतः स्म। भारद्वाजमधिकृत्य 'ऋतो भारदाजस्य' इति सूत्रे पाणिनिः सूचितवान्। वैयाकरणेषु अग्रणीः शाकटायनः सकलान् नामशब्दान् आख्यातवान्। शाकल्यस्य शाकल्यव्याकरणे लौकिकानां वैदिकानां च शब्दानां व्याख्यानं वर्तते। आचार्यस्य सेनकस्य नामोल्लोखः पाणिनिना 'गिरेश्च सेनकस्य' इत्यस्मिन् सूत्रे कृतः। आचार्यः स्फोटायनः वैयाकारणेषु प्रमुखः। स्फोटसिद्धान्तः व्याकरणे महन्महत्वमावहति।

**मुनित्रयकालः**

व्याकरणेतिहासे द्वितीयः भागः भवति मुनित्रयकालः। मुनित्रये दाक्षीपुत्रः पाणिनिः, वार्तिककारः कात्यायनः, महाभाष्यकारः भगवान् पतञ्जलिश्चान्तर्भवन्ति। व्याकरणशास्त्रस्य सुवर्णकालत्वेन मुनित्रयकालं परिगण्यते। भाषायां संजातानां व्यतियानानां परमोपयोगप्रदरूपेण व्याकरणशास्त्रमभ्युन्नतिं प्राप। पाणिनिः न केवलं व्याकरणशास्त्राय किन्तु भाषाशस्त्राय च कृतमुपकारं कदापि विस्मर्तुं न शक्यते। 'पाणिन्युपज्ञं व्याकरणम्' इति प्रथा वर्तते।

**पाणिनिः**

महामहोपाध्यायः शिवदत्तशर्मा पाणिनेः पितुः नाम शलङ्कः इति, पाणिनिः शालिङ्किः इति व्याजहार। अपि च पाणिनेः मातुलपुत्रः भवति दाक्षायणः इति, छन्दःशास्त्रस्य प्रणेता पिङ्गलः पाणिनेः अनुज चेति सूचयति। कथासरित्सागरं प्रमाणीकृत्य पाणिनेर्गुरुः नाम वर्षः इत्यासीत्। किन्तु कथासरित्सागरस्य कथा ऐतिह्यदृष्ट्या प्रामाणिकतां न भजते। पाणिनेः जन्मस्थलं तु 'शलातुरः' नाम ग्रामः। अयं देशः इदानीं 'लाहोर्' नगरे एव। पञ्चतन्त्रे पाणिनेः मृत्युविषयकः सङ्केतः दृश्यते। तदित्थम् – 'सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः' इति।

मुनित्रयमध्ये प्रथमः प्रधानश्च भवति पाणिनिः

अतिमहत्यां व्याकरणाचार्याणां परम्परयां सत्यपि पाणिनीयमेव व्याकरणं सर्वातिशायित्वं भजते। पाणिनिना कृतः ग्रन्थः पाणिनीयम्। पाणिनीयस्यापरं नाम भवति अष्टाध्यायी। अष्टाध्याय्याम् अष्टा अध्यायाः। प्रत्यध्यायां चत्वारः पादाः। प्रतिपादं अनेकानि सूत्राणि। प्रायेण चतुर्सहस्रं सूत्राणि। तत्वतः ३९९६ सूत्राणि। प्रथमं सूत्रं भवति 'वृद्धिरादैच्'। अनेन सूत्रेण मङ्गलाचरणं पाणिनिना कृतमिति पतञ्जलिः। "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इति। तदर्थं पाणिनिना रचितानि सूत्राणि भवान्ति 'वृद्धिरादैच्' 'भूवादायो धातवः' 'नोदत्तस्वरितोदयम्' च।

पाणिनीयं पाणिनिना विरचितम्

पाणिनिः अष्टाध्यायीं द्विधा विभजते। सपादसप्ताध्यायी इत्येकः भागः। त्रिपादी इत्यन्यतः। सपादसप्ताध्यायां सूत्राणि परस्परं जानन्ति। किन्तु तानि सूत्राणि त्रिपादिस्थानि सूत्रकार्याणि न जानान्ति। अपि च त्रिपादिस्थानि सूत्राण्यपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् इति 'पूर्वत्रासिद्धम्' इति सूत्रस्य वृत्तिः। अन्तिमं सूत्रम् भवति अ अ इति। तद् सूत्रं सर्वाणि सूत्रकार्याणि जानाति। किन्तु तादृशं सूत्रं वर्तते इति न किञ्चन सूत्रं जानाति।

पाणिनियं विहाय धातुपाठः गणपाठः शिक्षाग्रन्थः पातालविजयम् चेति ग्रन्थानपि पाणिनिः रचितवान्। तेषु शिक्षाग्रन्थः श्लोकात्मकः। पातालविजयस्य नामान्तरं भवति जाम्बवतीविजयम्। एतन्महाकाव्यं भवति।

**कात्यायनः**

मुनित्रये अन्तर्गतः कात्यायनः पाणिनेः साक्षाच्छिष्यः आसीत् इति केचन। वररुचिः इत्यपरनाम्ना विख्यातः सः पाणिनीयव्याकरणस्य पोषकः। वररुचिः न केवलं व्याकरणाचार्यः किन्तु कविश्च। कृष्णचरिते स्वर्गारोहणकाव्यमधिकृत्य एवं लिखितमास्ति यत् -

सूत्रकारेण पाणिनिना उक्तं, अनुक्तं, दुरुक्तं च अधिकृत्य कात्यायनेन वार्तिकेषु रचितम्

**न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः**
**काव्येऽपि भूयोऽनुचकार तं वै कात्यायनोऽसौ कविकर्मदक्षः।। इति**

केचन पण्डिताः वररुचिः पाणिनेः सतीर्थ्याः इति वदन्ति। पाणिनीयसूत्रे यदनुक्तं दुरुक्तं वा तत्कथनाय व्याख्यानाय वा कात्यायनेन वार्तिकानि कृतानि। एतादृशानां वार्तिकानां सङ्ख्या षड्त्रिंशोत्तरशतम् (१३६) इति गणयन्ति।

**पतञ्जलिः**

मुनित्रये अन्तर्भूतः पतञ्जलिः व्याकरणमण्डले जाज्वल्यमानः सूर्य एव। तमभितः सर्वाणि वैयाकरणनक्षत्राणि चरन्ति। उक्तञ्च - 'यथोत्तरं मुनीनां प्रामाण्यम्' इति। महाभाष्यरचनया पतञ्जलिमहर्षिः वाचामशुद्धिं दूरीचकार। उक्तञ्च -

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्येकन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।** इति।

योगदर्शनाचार्यः पतञ्जलिः मनसः मालिन्यं चरकसंहितायाः संस्करणेन शरीरस्य मालिन्यं च दूरीकृतवान् इत्यतः सर्वे तं महर्षिं स्तुवन्ति। गोनर्ददेशे संजातस्य तस्य मातुः नाम गोणिका इति सूचना वर्तते। गोनर्ददेशः काष्मीरदेशे इति केचन।

**महाभाष्यम्**

वार्तिककारस्य कात्ययनस्य मतं च निरीक्ष्य पतञ्जलिना भाष्यं रचितम्। उक्तञ्च

**"सूत्रार्थौ वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यविदो विदुः" । ।इति ।**

महाभाष्यं शिक्षा-व्याकरण- निरुक्तानाम् एकं मिश्रितं रूपमेव। अर्थात् महाभाष्यपठनेन शिक्षायाः (phonetics) व्याकरणस्य (grammar) निरुक्तस्य (Derivation of words) च ज्ञानमार्जयितुं शक्यते। तत्कारणादेव 'महाभाष्यम्' इत्यर्थन्वर्थं नाम। महत्वात् भाष्यत्वात् च महाभाष्यमिति।

महाभाष्ये चतुरशीतिः (८४) आह्निकानि सान्ति। केचनाचार्याः पञ्चाशीतिः (८५) इति वदन्ति । प्रथमस्य आह्निकस्य नाम पस्पशाह्निकम्। पस्पश नाम पुनः पुनः अतिशयेन वा चर्चितमिति। अह्ना निर्वृत्तम् आह्निकम्। 'अथ शब्दानुशासनम्' इति वाक्येन महाभाष्यरचना आरब्धा। वैदिकानां लौकिकानां च शब्दानाम् उपदेशः, शब्दानां साध्वसाधुचिन्ता, व्याकरणपठनस्य मुख्यप्रयोजनानि, आनुषङ्गिकप्रयोजनानि, शब्दस्वरूपः, इत्यादीन् विषयान् सविस्तरं सरलया भाषया अयं दार्शनिक महाभाष्ये प्रतिपादितवान्।

द्वितीयाह्निकस्या नाम भवति प्रत्याहाराह्निकम्। माहेश्वरसूत्राणां सविशदं व्याख्यानं पतञ्जलिना कृतमस्मिन् आह्निके। अकारस्य विवृतोपदेशः किमर्थः? आकारग्रहणार्थः। अ अ (८.४.६८) इति सूत्रेण विवृतस्याकारस्य प्रयोजनमन्वाख्यायते। वर्णपदेशाः वर्णग्रहणेन न गृह्यन्ते। वर्णाः अर्थवन्तः अनर्थकाः च भवन्ति। एकवर्णाः धातुप्रातिपदिकप्रत्ययनिपाताः अर्थवन्तः भवन्ति। प्रत्याहरेऽनुबन्धानां ग्रहणं न इत्यदीनि कार्याणि द्वितीयाह्निके सूचयन्ति। एवं प्रायेण सर्वेषां

सूत्राणां व्याख्यानं पक्षप्रतिपक्षद्वारा प्रश्नोत्तरविधिना च पतञ्जलिः विशदयति।

**मुनित्रयोत्तरकालः**

व्याकरणेतिहासे तृतीयविभागः भवति मुनित्रयोत्तरकालः। अस्मिन् कालेऽपि बहवः आचार्याः आसन्, सन्ति च। इदानीमपि इयं परम्परा वर्धते। प्रधानानां कतिपयानां कार्याणि परिशोधयामः।

**भर्तृहरिः**

मुनित्रयोत्तरकालिकेषु वैयाकरणेषु प्रमुखाः भवन्ति - वाक्यपदीय- भट्टिकाव्य प्रभृतीनां कर्ता भर्तृहरिः

महाभाष्यस्यानेके टीकाः सन्ति। यथार्थतः पतञ्जलेः महाभाष्यमवलम्ब्य अनेकाः टीकाः संजाताः। तेषां टीकाकर्तॄणां समवाये प्रामाणिकत्वात् प्राचीनत्वाच्च भर्तृहरेः स्थानं गौरवास्पदं वर्तते। भर्तृहरिणा रचिताः ग्रन्थाः भवन्ति महाभाष्यदीपिका, वाक्यपदीयम्, भट्टिकाव्यं, मीमांसाभाष्यम्, शब्दधातुसमीक्षाप्रभृतयः।

**कैयटः**

महाभाष्यस्य अपरा प्रदीपाख्या टीका कैयटरचिता भवति। काष्मीरदेशवासिनः अनेके टीकाकाराः च सन्ति। रामचन्द्रसरस्वती, ईश्वरानन्दसरस्वती, नारायणः, नागेशभट्टः मल्लययज्वाप्रभृतयः।

**नागेशभट्टः**

परिभाषेन्दुशेखर - स्फोटवादीनां कर्ता नागेशभट्टः

महाभाष्यस्य नागेशभट्टेन रचिता उद्योताख्या टीका नितरां प्रसिद्धा। इमां टीकां विहाय लघुशब्देन्दुशेखरः, बृहच्छब्देन्दुशेखरः, परिभाषेन्दुशेखरः, लघुमञ्जूषा, परमलघुमञ्जूषा, स्फोटवादः इत्याद्याः ग्रन्थाः रचिताः।

**भट्टोजिदीक्षितः**

भट्टोजिदीक्षितः नाम वैयाकरणाचार्यः महाराष्ट्रीयब्राह्मणः आसीत्। तस्य पिता लक्ष्मीधरः, भ्राता रङ्गोजिभट्टः पुत्रौ भानुजिदीक्षित –

वीरेश्वरदीक्षितौ, गुरुः श्रीनृसिंहतनयः शेषकृष्णः च। अष्टध्यायीमवलम्ब्य तेन रचितः ग्रन्थः भवति शब्दकौस्तुभम्। तस्यापरः गुरुः आसीत् अप्पय्यदीक्षितमहाभागः। तेन रचितेषु ग्रन्थेषु शब्दकौस्तुभम्, तत्त्वकौस्तुभम्, वैयाकरणसिद्धान्तकारिकाः, सिद्धान्तकौमुदी, प्रौढमनोरमाद्याः अन्तर्भवन्ति। सिद्धान्तकौमुदी व्याकरणशास्त्रे नितरां प्राधान्यमर्हति। क्रमानुसारं सूत्राणां सन्निवेशः तेन महाशयेन तस्मिन् ग्रन्थे कृतः। संज्ञा, सन्धित्रय- षड्लिङ्गप्रकरणम् स्त्रीप्रत्यय- समास-तद्धित – कृत्प्रकरणेषु तथा भ्वादिदशधातुगणाः - णिजन्त-उणादिप्रकरणेषु च व्याकरणसूत्राणि तेन क्रमीकृतानि। तेन व्याकरणशास्त्रप्रवेशनं सुकरं बभूव।

वैयाकरणसिद्धान्तकौमुदी प्रौढमनोरमादीनां कर्ता भट्टोजिदीक्षितः

**जयादित्यबुद्धिः तथा वामनः**

काशिका नामकः ग्रन्थः जयादित्यबुद्धिना तथा वामनेन च लिखितः। केचन पण्डिताः कथयन्ति यदयं ग्रन्थः काशिकादेशे वर्तमानसमये लिखितः इति। जयादित्यः आद्यानां पञ्चानामध्ययानां रचयिता इति, अवशिष्टानां त्रयाणाम् अध्ययानां कर्ता वामनः इति च केचन वदन्ति। सम्पूर्णायाः अष्टाध्याय्याः कण्ठस्थीकरणाय प्रयोगाय च ‘काशिकावृत्तिपठनं साहाय्यकं भवति।

जयादित्यः तथा वामनेन लिखितः ग्रन्थः काशिका

**वरदराजः**

दाक्षिणात्यस्य दुर्गातनयस्य पुत्रः श्रीमान् वरदराजाचार्यः कालक्रमानुसारं मध्यसिद्धान्तकौमुदीं निर्ममे। अस्य गुरुः भट्टोजिदीक्षितः। सिद्धान्तकौमुदीस्थकार्यणि लघूकृत्य व्याकरणशास्त्रे प्रवेष्टुमिच्छूनां छात्राणां कृते वरदराजाचार्यः लघ्वीकृत्य लघुसिद्धान्तकौमुदीं रचितवान्। ग्रन्थान्ते सः एवं प्रतिपादयति **“शास्त्रान्तरे प्रविष्टानां बालानां चोपकारिका।**
**कृता वरदराजेन लघुसिद्धान्तकौमुदी”** इति।

वरदराजेन रचितः ग्रन्थः लघुसिद्धान्तकौमुदी

**अनेके वैयाकरणाचार्याः।**

अनेके वैयाकरणाचार्याः मुनित्रयकालानन्तरं स्वस्वाग्रन्थरचनया व्याकरणसाहित्यं सम्पुष्टं चक्रुः। आधुनिककालेऽपि नूतनाः ग्रन्थाः आविर्भवन्ति। कतिपयानां वैयाकरणानां तेषां कृतीनां च नामानि अधो दीयन्ते।

आधुनिककाले रचिताः व्याकरणग्रन्थाः

1. ओरम्भभट्टः (वैद्यनाथभट्टविश्वरूपः) - अष्टाध्यायाः व्याकरणदीपिका नाम वृत्तिग्रन्थः।
2. पुरुषोत्तमदेवः - भाषावृत्तिः (अष्टध्याय्याः एका लघुवृत्तिः)
3. रामचन्द्रः - प्रक्रियाकौमुदी
4. श्रीगिरिशकुमारठक्कुरः - लघुसिद्धान्तकौमुद्याः व्याख्या।
5. श्रीगोमतिप्रसादशास्त्री- लघुसिद्धान्तकौमुद्याः शिवाटीका।
6. धर्मकीर्तिः - रूपावतारम् (पाणिनीयसूत्राणां प्रक्रियाक्रमग्रन्थः)
7. नारायणभट्टपादः - प्रक्रियासर्वस्वम्
8. विमलसूरिः - रामकथा।
9. श्रीवरदराजाचार्यः - मध्यसिद्धान्तकौमुदी
10. सुरेश झा - श्लोकसिद्धान्तकौमुदी
11. विज्ञानभिक्षुः - सिद्धान्तकौमुद्याः तत्त्वबोधिनी टीका।
12. वासुदेवदीक्षितः - सिद्धान्तकौमुद्याः बालमनोरमा टीका।
13. वैयाकरणाभूषणसारः - कौण्डभट्टः।
14. सीरदेवः - परिभाषेन्दुशेखरस्य परिभाषेन्दुवृत्तिः।
15. अमृतलालः - परिभाषेन्दुशेखरस्य परिभाषेन्दुप्रभा।
16. गोकुलनाथः - पदवाक्यविचारः।
17. आर्. वासुदेवन्पोट्टि - सिद्धान्तकौमुद्याः 'हितैषिणी' व्याख्या।
18. के.चन्द्रशेखरन् नायर् – वाक्यपदीयस्य (ब्रह्मकाण्डं) – सुनिल् प्रिया व्याख्या)

इत्थं सुसमृद्धं भवति व्याकरणसाहित्यम्।

सर्वेषु मण्डलेषु सर्वेषु व्याकरणग्रन्थेषु च महाभाष्यस्य स्वाधीनता द्रष्टुं शक्यते। यथार्थतः महाभाष्यमेकः सागरः भवति। तस्मिन् अनेकानि रत्नानि मौक्तिकानि च सन्ति। महाभाष्यस्य प्राधान्यं वाचामगोचरमेव महाभाष्याविर्भावेन नूतनं कश्चित् प्रकाशः तत्काले अनन्तरकाले इदानीञ्च प्रसरति। सः प्रकाशः आचन्द्रतारं वर्तेते।

## Summarised Overview

अस्मिन् पाठभागे संस्कृत व्याकरणस्य सामान्य परिचयः कृतः। व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दाः अनेनेति व्याकरणम्। संस्कृतव्याकरणोतिहासे ध्रुवनक्षत्रमिव प्रशोभमानः ग्रन्थः भवति पाणिनेः पाणिनीयम्। पाणिनेः समकालिकत्वेन वार्तिकारः वररुचिं परिगण्यते। पाणिनेः ग्रन्थे स्वस्य पूर्विकाणामाचार्याणां नामानि सूचितानि। भागुरिप्रभृतीनां वैयाकरणानां स्वाधीनता व्याकरणे इव भाषायामपि दृश्यते। पाणिनिः शालतुरग्रामे अजायत। इदानीमयं देशः लाहोर् भवति। वार्तिककारः कात्यायनः न केवलं वैयाकरणः किन्तु कविरपि भवति।

प्रायेण अष्टाध्यायीस्थानां सर्वेषां सूत्राणां व्याख्यानं पतञ्जलिः स्वग्रन्थे महाभाष्ये चतुरशीत्याह्निकेषु सविशदं कृतवान्। प्रथमस्य आह्निकस्य नाम पस्पशाह्निकम्। पस्पश नाम पुनः पुनः अतिशयेन वा चर्चितमिति। अह्ना निर्वृत्तम् आह्निकम्। 'अथ शब्दानुशासनम्' इति वाक्येन महाभाष्यरचना आरब्धा। वैदिकानां लौकिकानां च शब्दानाम् उपदेशः, शब्दानां साध्वसाधुचिन्ता, व्याकरणपठनस्य मुख्यप्रयोजनानि, आनुषङ्गिकप्रयोजनानि, शब्दस्वरूपः, इत्यादीन् विषयान् सविस्तरं सरलया भाषया अयं दार्शनिक महाभाष्ये प्रतिपादितवान्। द्वितीयाह्निकस्या नाम भवति प्रत्याहाराह्निकम्।एवं प्रायेण सर्वेषां सूत्राणां व्याख्यानं पक्षप्रतिपक्षद्वारा प्रहनोत्तरविधिना च पतञ्जलिः अत्र विशदयति।

महाभाष्यपठनं विना व्याकरणशास्त्रपठनं सम्पूर्णं न भविष्यति। सर्वे वैयाकरणाचार्याः स्वस्वग्रन्थेषु पतञ्जलिमहर्षेराशयं अङ्गीकृतवन्तः।

सिद्धान्तकौमुदीकारः भट्टोजिदीक्षितः महाभाष्यस्य आशयान् स्वर्ग्रन्थे इतस्ततः संसूच्य तस्मै स्वस्य आदरं प्रदर्शितवान्।

## Assignments

I. **वाक्येन वाक्यद्वयेन वा उत्तरत**

1. शब्दाह्वयं ज्योतिरासंसारं न दीप्यते - आशयं स्पष्टीकुरुत।
2. वेदकाले प्रथमः व्याकरणाचार्यः कः आसीत्?
3. व्यासमहर्षेः समकालिकः वैयाकरणाचार्यः कः?
4. 'वृद्धिरादैच्' इति सूत्रस्य सविशेषता का?
5. कति वार्तिकानि सन्ति?
6. भाष्यस्य लक्षणं किम्?
7. व्याकरणेतिहासे कति विभागाः सन्ति? ते के?
8. व्याकरणेतिहासे वरदराजाचार्यस्य स्थानं किम्?
9. सिद्धान्तकौमुद्याः तिसृणां टीकानां नामानि कानि:?
10. व्याकरणेतिहासे नागेशभट्टस्य स्वाधीनं किम्?
11. 'बालमनोरमा' टीकायाः कर्ता कः ?

II. **लघुटिप्पणीं लिखत**

1. अष्टाध्यायी।
2. महाभाष्यस्य टीकाः।
3. पाणिनिना परामृष्टाः पञ्च वैयाकरणाचार्याः।

III. **निबन्धात्मकप्रश्नः**

1. व्याकरणेतिहासे महाभाष्यस्य स्वाधीनतां विशदयत।

## Suggested Readings

1. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम् (प्रदीपोद्योतसहितम् ) प्रथमखण्डः, चौखम्बा संस्कृतप्रतिष्ठान्, दिल्ली, 1992.
2. महाभाष्यार्थदीपिका (नवाह्निकान्तः), प्रथमो भागः, प्रो. कृष्णकुमारः, चिन्मय इन्टर्नाषणल् फौण्डेषन्, शोधसंस्थान्, केरलम्, 2015.

## References


1. पतञ्जलिः, व्याकरणमहाभाष्यम्, महामहोपाध्याय प्रा काशीनाथ वासुदेव अभयंकर एम् ए, डोकन एजुकेशन सोसयटि, पूणें १८८२।
2. पतञ्जलिः, व्याकरणमहाभाष्यम्, व्याख्या - मधुसूदन् प्रसाद् मिश्रा चोखम्बा विद्याबवन्, वाराणसि।
3. डा ब्रह्मानन्द त्रिपाठी, वायकरणशास्त्रेतिहासः चौखम्बा सूरभारतीप्रकाशन्, वाराणसी २००६


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 2

# व्याकरणशास्त्रे वाक्यपदीयस्य स्थानम्

## Learning Outcomes

- व्याकरणं सर्वशास्त्रोपकारकम् इति तत्त्वम् अवगच्छति।
- महाभाष्यानन्तरं व्याकरणस्य प्रोन्नतिं जानाति।
- व्याकरणशास्त्रे वाक्यपदीयस्य स्थानं निर्णेतुं शक्यते।

## Background

भारतीयसाहित्यस्य शास्त्रस्य च मूलं वेद एव। धर्मब्रह्मप्रतिपादकमपौरुषेयवाक्यं वेदः। ब्रह्मणः मुखात् चतुर्वेदाः संजाताः। षट् वेदाङ्गानि सन्ति। वेदाङ्गेषु सर्वप्रथमं भवति व्याकरणम्। 'मुखं व्याकरणं तस्य' इत्युक्त्या वेदमुखमेव व्याकरण् इति समर्थयति। प्रकृतिप्रत्ययविवेचनपूर्वकं शब्दान् व्याकरणं संस्करोति। अतः व्याकरणस्य दर्शनपदवी अपि प्राप्ता। किं नाम व्याकरणम्? व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। व्याकरणशास्त्रे प्रसिद्धाः अनेके ग्रन्थाः सन्ति। तेषु सर्वेषु ग्रन्थेषु श्रेष्ठं भवति पाणिनेः 'पाणिनीयम्'। 'पाणिन्युपज्ञं व्याकरणम्' इत्युक्तिं वर्तते। वेदकालादारभ्य भाषायाः वर्धनानुसारं व्याकरणेष्वपि व्यतियानानि संजातानि। व्याकरणं तत्तत्कालभाषायाः अनुकूलरीत्या संजातमेव। व्याकरणं भाषायै एव। भाषायाः शुद्ध्यर्थमेव व्याकरणम्। पाणिनि वररुचि –पतञ्जलिः च मुनित्रयमिति नाम्ना विख्याताः। पाणिनेः कालः क्रिस्तोः पूर्वं तृतीयशतकमिति प्रायेण विश्वासः।

तत्कालस्थायाः भाषायाः अनुकूलं आसीत् पाणिनीयनियमः। कात्यायनस्य (वररुचेः) कालः क्रिस्तोः पूर्वं प्रथमशतकमिति गणयन्ति विद्वांसः। तदानीं भाषायां नूतनपदानि आविर्भूतानि कतिपयानां पदानां वैयक्तिकत्वं प्रयोगाभावः च संजाताः। तदनुकूलः नियमः कात्यायनेन रचितः। पुनः पतञ्जलिकालः। पतञ्जलिः सूत्राणां वार्तिकानां च सविस्तरपठनेन योग्यं व्याख्यानं विरच्य व्याकरणशास्त्रं संपुष्टं चकार। पुनः क्रिस्तुवर्षे चतुर्थपञ्चमशतकयोः मध्ये जातः भर्तृहरिः व्याकरणशास्त्राय परमोन्नतं स्थानं कल्पितवान्। सः अक्षरम् अर्थभावेन विवर्त्य अनादिनिधनं ब्रह्म भवति इत्युक्तवान्। सः स्फोटसिद्धान्तं स्थापितवाम्। अस्मिन् एकके भर्तृहरेः मतं विशदीकरिष्यामः।

## Keywords

वेदाङ्गेषु व्याकरणं मुखं भवति- व्याकरणस्य दर्शनत्वं - किं नाम व्यकरणम् - व्याडिनः संग्रहः - भर्तृहरिः सर्वशास्त्रपारंगतः - भर्तृहरेः कालः - पदवाक्यसम्बन्धि - वाक्यपदीयम् - काण्डत्रयं - शब्दतत्त्वम् - उत्पत्तिविनाशरहितं - यदक्षरं - अर्थभावेन विवर्तते तत् ब्रह्म - विवर्तपरिणामभेदयोः भेदः - भर्तृहरिणा अङ्गीकृतानि प्रमाणानि - व्याकरणाध्ययनस्य प्रयोजनानि - शब्दस्वरूपं - स्फोटतत्त्वम् - स्फोटभेदः - स्फोटः ध्वनिः च - वायुः शब्दत्वं प्रतिपद्यते - प्रकाशः सर्वान् प्रकाशयति - शब्दः प्रकाशानपि प्रकाशयितुं साहाय्यति।

## Discussion

**वेदाः**

वेदाः धर्मब्रह्मप्रतिपादकम् अपौरुषेयं वाक्यं वेदः। भारतीयसाहित्यस्य दर्शनानां चोत्पत्तिः वेदादेव। ब्रह्मणः मुखादेव वेदोत्पत्तिरिति विश्वासः। चत्वारः वेदाः ऋग्यजुर्सामाथर्वाः। षड्वेदाङ्गानि शिक्षा, कल्पं, निरुक्तं, व्याकरणं, ज्योतिषं, छन्दः इति। षड्वङ्गेषु व्याकरणं श्रेष्ठम्। वेदपुरुषस्य

मुखमेव व्याकरणम्। व्याकरणं न केवलं वेदाङ्गः, किन्तु एकं दर्शनमेव। किं नाम दर्शनम्? दृश्यते यथार्थं तत्त्वमनेनेति दर्शनम्। अतः दर्शनं शास्त्रं भवति। अपि च व्याकरणशास्त्रं प्रकृतिप्रत्यय विवेचनपूर्वकं शब्दान् संस्करोति। साध्वसाधुशब्देभ्यः साधूनां शष्दानाम् उपदेशः कार्यः इति पतञ्जलिः। पदसाधुत्वबोधकं शास्त्रं व्याकरणम्।

षट्सु वेदाङ्गेषु व्याकरणं श्रेष्टम्

**व्याकरणम्**

किं नाम व्याकरणम्? व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। वि + आ(ङ्) + कृ + ल्युट् - व्याकरणम्। वि आ इति उपसर्गद्वयपूर्वकात् 'डुकृञ् करणे' इति धातोः करणार्थे ल्युट् प्रत्यये व्याकरणम् इति पदनिष्पत्तिः। अस्मान् परितः वर्तमानानि पदानि सम्यक् निरीक्ष्य भाषानुकूलं तेषां शब्दानां साधुत्वं कल्पयत् शास्त्रमेव व्याकरणम्। भारते अनेके वैयाकरणाचार्याः व्याकरणग्रन्थाश्चासन्। भाषायाः उत्पत्या साकं व्याकरणाशास्त्ररचनापि आरब्धा। मुनित्रयकालं व्याकरणशास्त्रस्य सुवर्णकालमिति विद्वांसः वदन्ति। मुनित्रये पाणिनिः कात्यायनः पतञ्जलिश्च अन्तर्भवन्ति। पाणिनिकालादारभ्य शब्दब्रह्मसम्बान्धिनी चर्चाश्च समारब्धाः। पाणिनेः पाणिनीयम् विश्वविख्यातः व्याकरणग्रन्थः तथा भाषाशास्त्रग्रन्थाश्च। भाषा शास्त्रिणः आचार्यत्वेन पाणिनिमेव मन्यन्ते। पाणिनीयशिक्षा अपि भाषाशास्त्राया महदुपकारकमभूत्। 'पाणिन्युपज्ञं व्याकरणम्' इत्यस्ति प्रथा।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्

पाणिनिः

पाणिनेः समकालिकेन व्याडिना रचितः ग्रन्थः भवनि संग्रहः। लक्षश्लोकात्मकः सोऽयं ग्रन्थः, इदानीं न वर्तते। संग्रहे सूचितं भवति यत् लोकव्यवहारस्य कारणभूतं शब्दतन्त्वं अनादिनिधनं ब्रह्म भवति तत् जगतः प्रक्रियारूपेण विवर्तते इति च। तदेव प्रतिपादितमस्ति भाष्यकारेण पतङ्गलिना महाभाष्ये।

व्याडिः

पूर्वाचार्याः

पाणिनेः कालः क्रिस्तोः पूर्वं तृतीयशतकमिति विश्वासः वर्तते। पाणिनेः पूर्वं अनेके वैयाकारणाचार्याः आसन्। गार्ग्यः, भारद्वाजः, आपिशालिः, भागुरिः, शाकटायनः, स्फोटायनः, शाकल्यः, चाक्रवर्मणादयः तेन परामृष्टाः। सर्वे ते तत्तत्कालोचितायाः भाषायाः तथा समूहे प्रचलितानां पदानां रूपसिद्ध्यर्थं यत्नं कृतवन्तः आसन्।

वार्तिककारः

पाणिन्यनन्तरं प्रचलितायां भाषायां संजातं व्यतियानानुसारं वार्तिककारः कात्यायनः व्याकरणं सम्पुष्टं चकार। कात्यायनः वार्तिकानां कर्ता।

उक्तानुक्तदुरुक्तार्थचिन्ताकारि तु वार्तिकम्। कात्ययनस्य कालः क्रिस्तोः पूर्वं प्रथमं शतकमिति गणयन्ति पण्डिताः।

व्याकरणशास्त्रे सूर्यः इव प्रशोभमानः आचार्यः भवति पतञ्जलिमहर्षिः। सोऽयं भगवान् अनन्तशेषः एवेति भक्तानां मतम्। तस्य ग्रन्थतल्लजमेव महाभाष्यम्। महत्वात् भाष्यत्वात् च महाभाष्यमुच्यते। अस्मिन् ग्रन्थे पाणिनेः सूत्राणां वररुचेः वार्तिकाणां च सविस्तरपठनेन सरलं तथैव गाम्भीर्ययुक्तं व्याख्यानं आक्षेप - समाधानपूर्वकं विरच्य व्याकरणशास्त्रं सम्पुष्टं चकार। सरलया भाषया अर्थगाम्भीर्यापितं कार्यं अवततार अयं महर्षिः। वाक्यपदीयकारः भर्तृहरिः अमुं महाभाष्यमधिकृत्यैवं सूचयति – 'अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवाद्' इति।

**भर्तृहरिः**

स्फोटतत्त्वाचार्यः

स्फोटतत्त्वस्याचार्यः भवति भर्तृहरिः। यद्यपि शब्दतत्त्वस्याविर्भावः पाणिनिकालेऽपि संजातः सन्नपि स्फोटसिद्धान्तत्वेन अङ्गीकारं भर्तृहरेः व्याकरणशास्त्रप्रेवशानन्तरमेव लब्धः। तस्य सिद्धान्तस्य महिमातिशयं प्रकटयन् ग्रन्थः भवति वाक्यपदीयम्। यथार्थतः भाषाशास्त्रदर्शनमेव वाक्यपदीयम्। सोऽयं महाभागः क्रिस्त्वब्दे ५७० वर्षे उज्जयिन्यां संजातः इति विश्वासः। किन्तु केचन आचार्याः भर्तृहरेः कालः

चतुर्थपञ्चमशतकयोः मध्ये इति वदन्ति। पदं वाक्यं चाधिकृत्य रचितत्वादयं ग्रन्थः वाक्यपदीयम् इति नाम्ना प्रसिद्धमेव। अस्य ग्रन्थस्य नामान्तरमास्ति 'त्रिकाण्डी' इति। वाक्ये पदे च वाक्यस्यैव प्राधान्यम्। हि पूर्णतः अर्थबोधः वाक्यादेव जायते। अस्मिन् ग्रन्थे वाक्यपदानां व्यावहारिक-दार्शनिक रूपाणि चर्चाविषयत्वेन वर्तन्ते। स्वपक्षस्थापनाय परपक्षनिरासाय च श्रमः कृतः। तदर्थम् इतरदार्शनिकसिद्धान्तानां तत्त्वानि सूचितानि सान्ति। पाणिनीयसूत्राणां कात्यायनस्य वार्तिकानां च व्यख्यानावसरेषु भाष्यकारस्य अभिप्रायाः सक्रमं सुव्यक्तं च असिन्ग्रन्थे क्रोडीकृतानि सन्ति।

**वाक्यपदीयम्**

निरुक्तिः

वाक्यं च पदं च वाक्यपदे। वाक्यपदे अधिकृत्य कृतः ग्रन्थः वाक्यपदीयम् इति। वाक्यपदीये काण्डत्रयं वर्तते। अत एव त्रिकाण्डी इति नामान्तरम्। ब्रह्मकाण्डं, वाक्यकाण्डं, प्रकीर्णकाण्डमिति भेदात्। ब्रह्मकाण्डे १५६ कारिकाः सन्ति। वाक्यकाण्डे ५८६, प्रकीर्णकाण्डे १२१८ कारिकाः च सन्ति। अस्य ग्रन्थस्य व्याख्यानमपि भर्तृहरिणा कृतम्। व्याख्याग्रन्थौ द्वौ। लघुवृत्तिः बृहद्वृत्तिश्च। वाक्यपदीयस्य नैकाः टिप्पण्यः सन्ति। वृषभदेवकृता वृत्तिः, हेलराजस्य व्याख्या, सूर्यनारायणस्य तथा रघुनाथशर्मणः वामदेवाचार्यस्य च ब्रह्मकाण्डव्याख्यानानि अपि प्रसिद्धानि। अपि च आङ्गलभाषायां डा.के. राघवन् पिल्लमहाशयस्य तथा सुब्रह्मण्य अय्यर्महाशयस्य च व्याख्या वर्तते। अनन्तपुरीतः हस्तलिखितग्रन्थशेखरात् वाक्यपदियस्य केचन भागाः साम्बवशास्त्रिणा प्रसिद्धिकृताः। केरलेषु आचार्येण डा.के. चन्द्रशेखरन् नायर् महाशायेन प्रसिद्धीकृतं सुनिल्व्याख्योपेतं वाक्यपदीयम् छात्राणाम् अध्यापकानां च पठन-पाठनाय बहूपकारकमेव।

शब्ततत्त्वमर्थभावेन विवर्तते। उत्पत्तिविनाशरहितं यदक्षरं अर्थभावेन विवर्तते तत् ब्रह्म भवति। उक्तञ्च

शब्दतत्त्वम्

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥** इति।

साक्षात् शब्दतत्त्वं प्रपञ्चस्य चेतनाचेतनरूपोण विवर्तते। सद्वस्तु असद्रूपेण अन्यवस्तुनः प्रतीतिं जनयति चेत् स एव विवर्तः। समवायिकारणविसदृशकार्योत्पत्तिः विवर्तः। यथा रज्जुसर्पः रज्जोः विवर्तमेव। अक्षरं ब्रह्म। तत् पदार्थरूपेण विवर्तते। वेदान्तदर्शने प्रतिपादितं 'ब्रह्म' एव व्याकरणदर्शने शब्दतत्त्वम्। प्रपञ्चव्यवहारोऽपि शब्दहेतुकमेव। अत्र शब्दः न ध्वनिरूपः। अयं शब्दः योगिनामपि अगम्या परा एव।

**विविधाः वादाः**

संघातवादः आरम्भवादः, विवर्तवादः परिणामवादः च

भारतीयदर्शनेषु विविधाः वादाः सन्ति संघातवादः आरम्भवादः, विवर्तवादः परिणामवादः चेति। बौद्धाः संघातवादिनः। आरम्भवादिनः, नैयायिकाः भवन्ति। विवर्तवादिनः वेदान्तिनः वैयाकरणाश्च। सांख्याः परिणामवादिनः। 'प्रधानं' जगद्रूपेण परिणमते। प्रकृतेरन्यथाभावः परिणामः। यथा मृत् घटरूपेण परिणमति इत्यत्र मृदः परिणामः संभवति।

**प्रमाणानि**

प्रत्यक्षम् अनुमानं, शब्दः अभ्यासः अट्टष्टं च

भर्तृहरिणा अङ्गिकृतानि प्रमाणनि पञ्च सन्ति। तानि प्रत्यक्षम् अनुमानं, शब्दः अभ्यासः अट्टष्टं च। तेषु शब्दप्रमाणस्य (आगमस्य) परमप्राधान्यं स अङ्गीकृतवान्। तेषु प्रमाणेषु प्रत्यक्षप्रमाणस्य द्वैविध्यं भर्तृहरिः स्वीकृतवान्। लौकिकप्रत्यक्षम्, अलौकिकप्रत्यक्षं चेति। सामान्य जनानां दृष्टिगोचरं भवति लौकिकप्रत्यक्षम्। अलौकिकप्रत्यक्षं तु ऋषीणामेव। ते मनसादर्शनेन भूतानि, भविष्यत्कार्याणि च पश्यन्ति।

'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यदीनि वाक्यानि आगमप्रमाणे (शब्दप्रमाणे) अन्तर्भवन्ति। उक्तञ्च - 'ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्' इति। अनुमानप्रमाणं भर्तृहरिणा न तिरस्कृतम् किन्तु अङ्गीकृतमेव। परेषामसामाख्येयम् अभ्यासादेव जायते' इत्यनेन निरन्तरसम्पर्केण (अभ्यासेन) इतरेभ्यः निर्वचनाय असाध्यं यत् तत् अभ्यासप्रमाणं भवति। ऋषीणां ज्ञानं, परहृदयज्ञानं अद्भुतसिद्धिश्च अदृष्टप्रमाणम्।

**व्याकरणपठनस्य प्रयोजनानि।**

पतञ्जलेः व्याकरणाध्ययनस्य प्रयोजनानि भर्तृहरिः अङ्गीकृतवान्

महाभाष्यकारस्य पतञ्जलेः व्याकरणपठनप्रेयोजानानि भर्तृहरिः अङ्गिकृतवान्। वेदानां रक्षार्थं, यथावत् मन्त्रोच्चारणं कर्तुं, ऊहेन साधुशब्दान् प्रयोक्तुम्, अनायासं शब्दज्ञानं सम्पदयितुम् साधुशब्दान् प्रयोक्तुं, आनायासं शब्दज्ञानं सम्पादयितुम् असन्देहार्थं च व्याकरण पठनं कार्यम्। भर्तृहरिणा तु छन्दसां प्रथमम् अङ्गं व्याकरणमेवेति सूचयति। वेदानां योनिः व्याकरणमेव। वेदे उदात्तानुदात्तस्वरितभेदेन स्वरान् उच्चरन्ति। व्याकरणापठनं विना उदात्तनुदात्तादीनां ह्रस्वस्वदीर्ध प्लुतादीनां च उच्चारणं सुष्ठु कर्तुं न शक्यते।

**शब्दस्वरूपः**

महाभाष्यकारस्य मते येन उच्चारितेन यदभिव्यनक्ति तस्य हेतुभूतः यः ध्वनिः सः एव शब्दः। अपि च प्रतीतपदार्थको ध्वनिः शब्दः। आन्तरिकज्ञानमेव शब्दरूपेण परिणमति। भर्तृहरिरपि शब्दस्वरूपं तेनैव रुपेणाङ्गीकरोति। अदृश्यतया वाचः शक्तिरूपेण वर्तमानमन्तःकरणं स्वरूपप्रकाशनाय शब्दत्वेन विवर्तते। अन्तकरणं वाग्रूपेण बहिरागच्छति, सः एव शब्दस्वरूपः।

शब्दतत्त्वमेव स्फोटः

परा, पश्यन्ती,मध्यमा, वैखरी च

स्फोटः अष्टविधा

ध्वनिः द्विधा- प्राकृतध्वनिः, वैकृतध्वनिः च

**स्फोटतत्त्वम्**

शब्दतत्त्वमेव स्फोटः। 'स्फुट' विकासे इति धातोः निष्पन्नं रूपमेव स्फोटः इति। स्फुटति- प्रकाशते- अवगम्यते- अर्थो अनेन अस्मात् इति वा स्फोटः इति पदम्। शब्दः एकं प्रतीकमिति चिन्ता वेदकालेऽपि अवर्तत। वैदिकमन्त्रेषु केषुचित् नित्यशब्दः स्फोटं, कार्यशब्दः ध्वनिं च सूचयति इति केचन विद्वांसः वदन्ति। वैयाकरणाः स्फोटमङ्गीकुर्वन्ति।

**नादस्वरूपाः**

नादस्वरूपा चतुर्विधा। परा, पश्यन्ती, मध्यमा, वैखरी चेति। तेषु-

> **परा वाङ्मूलचक्रस्था, पश्यन्ती नाभिसंस्थिता।**
> **हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठतालुगा।। इति**

तासु वैखर्या कृतः नादः परश्रवणगोचरः भवति। मध्यमया कृतः नादः स्फोटव्यञ्जकः भवति।

**स्फोटभेदाः**

स्फोटः अष्टविधा वर्ण-पद-वाक्य-वर्णजाति-पदजाति-वाक्यजाति-अखण्डपद-अखण्डवाक्यस्फोटभेदात्। तेषु अखण्डवाक्यस्फोटमेव वैयकरणाः परमसिद्धान्तत्वेन अङ्गीकुर्वान्ति।

**स्फोटस्य ध्वनेः च कः भेदः ?**

स्फोटध्वन्योः कः भेदः? स्फुटति - प्रकाशते - अवगम्यते अर्थः अनेन इति स्फोटः ध्वन्यते अस्मिन् इति ध्वनिः। स्फोटः नित्यः । सः कालकृतभेदानामतीतः। शब्दः स्फोटः स्वच्छन्दस्य शब्दस्योपाधिः ध्वनिः। जातिगुणक्रियायदृच्छा स्वरूपः उपाधिः। शब्दस्योपाधिः ध्वनिः। ककारचकारादयः। ध्वनिः द्विधा - प्राकृतध्वनिः वैकृतध्वनिः इति भेदात्। प्रकृतौ स्फोटे भवः प्राकृतः। ह्रस्वदीर्घप्लुताः प्राकृतध्वनेः स्वभावाः। विकृतिविशिष्टः स्थिरस्थायी वैकृतध्वनिः। द्रुतं मध्यमा विलम्बितं च वैकृतध्वनेः स्वरूपाणि। प्राकृतध्वनिः स्फोटं व्यञ्जयति।

**वायोः शब्दपरिणतिः।**

वायुरेव शब्दरूपेण परिणतिं प्राप्नोति। कमप्यर्थं ग्राहयितुं काचन इच्छा वक्तुः मनसि जायते। तदनुकूलां क्रियां करोति। तदा प्राणवायौ किमपि चलनम् उद्भवति। चलनस्वभाववान् सः वायुः कण्ठः तालु इत्यादिषु स्थानेषु स्पृष्ट्वा शब्दरूपेण परिणतिं प्राप्नोति। अर्थबुद्धियुक्तेन शब्दप्रयोगेण श्रेतुः मनसि शब्दबुद्धिपूर्वकः अर्थबोधः जायते।

वायुः शब्दतत्त्वं प्रतिपद्यते

ज्ञानमेव शब्दरूपेण परिणतिं प्राप्नोतीति वैयाकरणमतम्। 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति सः शब्दः इति महाभाष्यप्रयोगः। संप्रत्ययः ज्ञानम्। अतः स्फोट एव शब्दः।

'वायोः शब्दत्वापत्तिरिष्यते' इति, 'वायुः शब्दत्वं प्रतिपद्यते' इति, 'ज्ञाता शब्दत्वेन विवर्तते' इत्यादिभिः वचनैः शब्दोत्पत्तिं विवृणोति भर्तृहरिः। अपि च प्राणाधिष्ठाने बुद्ध्याधिष्ठाने वर्तमाना या शक्तिः सा कण्ठताल्वादिषु संयोगविभागभ्यां शब्दरूपेण विवर्त्य वर्णध्वनिरूपेण बहिरागच्छति। प्रकाशः सर्वान् प्रकाशयति। शब्दः प्रकाशमपि प्रकाशयति तदर्थं साहाय्यं च करोति।

## Summarised Overview

संस्कृतसाहित्यस्य दर्शनानाञ्च उत्पत्तिः वेदादेव। व्याकरणं भाषां शुद्धीकरोति। साध्वसाधुशब्देभ्यः साधुशब्दानामुपदेशः कार्यः इति पतञ्जलिः। स्फोटसिद्धान्तस्याचार्यः भवति भर्तृहरिः। पदं वाक्यं चाधिकृत्य रचितः ग्रन्थः वाक्यपदीयम्। वाक्यपदीये काण्डत्रयं वर्तते। वाक्यपदीयस्य संस्कृते आङ्गलभाषायां कैरल्यां च अनेके व्याख्यातारः सन्ति। अस्मिन् ग्रन्थे अक्षरम् अनादिनिधनं ब्रह्म, तत् अर्थभावेन विवर्तते तत् ब्रह्म भवति इति समर्थयति। विवर्तवादिनः भवन्ति वेदान्तिनः वैयाकरणाश्च। भर्तृहरिणा पञ्च प्रमाणानि अङ्गीकृतानि। तानि प्रत्यक्षम्, अनुमानं, शब्दः, अभ्यासः, अदृष्टं च। तेषु शब्दप्रमाणस्य परमप्रधान्यं अङ्गीकृतवान्। पतञ्जलेः व्याकरणाध्ययनस्य प्रयोजनानि सः अङ्गीकरोति। भर्तृहरिणा अपि तेनैव रूपेण शब्दस्वरूपं निरूपयति। शब्दतत्त्वमेव स्फोटः। नित्यशब्दः स्फोटः,

कार्यशब्दः ध्वनिं च सूचयति। स्फोटः अष्टविधा। ध्वनिः द्विधा- प्राकृतध्वनिः वैकृतध्वनिः चेति। अर्थबुद्धियुक्तेन शब्दप्रयोगेण श्रोतरि शब्दबुद्धिपूर्वकः अर्थबोधः जायते। प्रकाशः सर्वान् प्रकाशयति, शब्दः प्रकाशमपि प्रकाशयति।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरत।**

1. पाणिनीये परामृष्टाः वैयाकरणाचार्याः के ?
2. 'अनादिनिधनं ब्रह्म' इत्यमुं श्लोकं व्याख्यात।
3. भर्तृहरिणा रचितौ वाक्यपदीयव्याख्याग्रन्थौ कौ?
4. वाक्यपदीयस्य कैरल्यां व्याख्यानं केन रचितम्?
5. परिणामस्य लक्षणं किम्? उदाहरणं किम् ?
6. शब्दस्वरूपः कः?
7. स्फोटः कः?

**II. टिप्पणीं लिखत।**

1. स्फोटस्य ध्वनेः च भेदः।
2. वायोः शब्दपरिणतिः।
3. स्फोटसिद्धान्तः।
4. भर्तृहरिणा अङ्गीकृतानि प्रमाणानि।
5. वेदाः वेदाङ्गानि च।

**III. निबन्धात्मकः प्रश्नः।**

1. व्याकरणशास्त्रे वाक्यपदीयस्य प्राधान्यम्।

## Suggested Readings

1. वाक्यपदीयम् (ब्रह्मकाण्डम्) व्याख्याद्वयोपेतम्, पद्मश्री पण्डितरघुनाथशर्मा, सम्पूर्णानन्दविश्वविद्यालयः, वारणासी, 1988
2. व्याकरणशास्त्रेतिहासः, आचार्य लोकमणि दाहालः, भारतीय विद्या प्रकाशन् वारणसी दिल्ली 1990

## References


1. Dr. K.Chandrasekharan Nair, Vakyapadiyam, Brahmankandam (Sunil Priya,Malayalam Commentary, Jai Karthika Books, Trivandrum, 2000.
2. महर्षिःपतञ्जलिः, महाभाष्यम्, अह्निकं 1, चौखम्बा संस्कृतप्रतिष्ठानम्, दिल्ली, 2002.
3. पतञ्जलिः महाभाष्यम्, कैरलीव्याख्या, पुनर्नवं, भाषान्तरीकरणम्, प्रोफ. ओ.वत्सला, चिन्मया इन्टर् नाषणल् फौण्टेषन्।


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 3

# पतञ्जलिः भर्तृहरिः च

## Learning Outcomes

- व्याकरणशास्त्रेतिहासे आचार्यस्य पतञ्जलेः स्वाधीनमवगच्छति।
- आचार्यस्य पतञ्जलेः महाभाष्यस्य प्राधान्यं जानाति।
- भर्तृहरिं तस्य सिद्धान्तं च जानाति।
- वाक्यपदीयस्य प्राधान्यम् अवगच्छति।

## Background

भारतीयदर्शनेषु अद्वितीयं स्थानमलङ्करोति योगदर्शनम्। योगदर्शनस्योपज्ञाता भगवान् पतञ्जलिरेव। अयं महर्षिः क्रिस्तोः पूर्वं द्वितीये शतके अजायत इति विश्वासः। सोऽयं महर्षिः न केवलं योगदर्शनस्योपज्ञाता किन्तु वैयाकरणश्रेष्ठः आयुर्वेदाचार्यश्च। भाषायाः शुद्ध्यर्थं तेन रचितः ग्रन्थः भवति महाभाष्यम्। व्याकरणशास्त्रं अनेकान् वैयाकरणाचार्यान् गार्ग्य-गालव-शाकटायन-शाकल्यप्रभृतीन् समवलम्ब्य पाणिनि-कात्यायन-पतञ्जलीति मुनित्रयाधिष्टानमवाप्य सार्वकालिकं सार्वभौतिकं सार्वजननीञ्च स्वकीयं स्वरूपं स्थिरीचकार। मुनित्रयकालः व्याकरणशास्त्रस्य सुवर्णकालः। मुनित्रयोत्तरकालिकाः सर्वे वैयाकरणाः स्वदेशीयाः वैदेशिकाः भाषाशास्त्रविशारदाः च महाभाष्यं महता आदरेण पश्यन्ति।

महाभाष्यस्य टीकाकतॄणां मध्ये प्रामाणिकत्वात् प्राचीनत्वात् च भर्तृहरेः स्थानं गौरवास्पदं वर्तते। तेन दीपिका नामिका टीका रचिता। तस्य प्रसिद्धः ग्रन्थः भवति वाक्यपदीयम्। सर्वशास्त्रपारंगतेन तेन वाक्यपदीयं महाभाष्य टीकां च विहाय भट्टिकाव्यम्, भागवृत्तिः, मीमांसाभाष्यम्, वेदान्तसुत्रवृत्तिः शब्दधातुसमीक्षा इत्याद्याः ग्रन्थाः विरचिताः। व्याकरणदर्शनस्य परमसिद्धान्तं शब्दतत्त्वम् आधारीकृत्य स्वग्रन्थे वाक्यपदीये सः प्रतिपादयति। शब्दतत्त्वं तु उत्पत्तिविनाशरहितं जगतः व्यवहाररूपेण सर्वत्र व्यापृतं च भवति।

अस्मिन्नेकके महाभाष्यकारं वाक्यपदीयकारं चाधिकृत्य पठामः।

## Keywords

वेदमूलकं - मुखं व्याकरणं स्मृतम् - व्याकरणशास्त्रं - समुद्रवत् अगाधम् - अन्तःसारसमृद्धं - मुनित्रयं - पाणिनिः - कात्यायनः - पतञ्जलिः - सर्वे विद्वांसः - आधुनिकाः भाषाशास्त्रज्ञाः - अष्ट अध्यायाः स्फोटसिद्धान्तः - काण्डत्रयं - लघुवृत्तिः - बृहद्वृत्तिः - स्फोटवादः।

## Discussion

अखिलमपि भारतीयं ज्ञानं वेदमूलकमेव। 'विद्लृ ज्ञाने' इति धातोः निष्पन्नं रूपं भवति वेदः। भारतीयसाहित्यस्याविर्भावः वेदादेव संजातः। ज्ञानस्य मूलस्रोतोरूपः वेदः। वेदस्य सम्पूर्णार्थग्रहणे आशयज्ञाने च व्याकरणपठनमावश्यकम्। वेदस्य मुखं भवति व्याकरणम्। मुखस्य विकृतत्वे कथं सौन्दर्यं वर्तते। अवयवेषु तु मुखमेव प्रधानम्।

साधुशब्दानां चयनम्

व्याकरणशुद्धिरहिता भाषा न मनोहारिणी । अतः व्याकरणशास्त्रम् अन्तःसारसमृद्धं, समुद्रवत् अगाधम् अपारञ्च ।

व्याकरणमेव भाषां शुद्धीकरोति। शुद्धियुक्ता भाषा पूर्णमाशयं सुष्ठु प्रकटयति। भाषायाः प्रयोगे अल्पोऽपि दोषः नः कार्यः। पदानां प्रकृतिप्रत्ययविवेचनेन तस्य वास्तविकस्वरूपप्रतिपादकं शास्त्रमेव व्याकरणम्।

व्याकरणनियमे कालानुसृव्यतयानानि

अनेके वैयाकरणाचार्याः आसन् सन्ति च। वेदकालादारभ्य वैदिकसाहित्ये पुनः लौकिकसाहित्ये च भाषायाः पुष्टिवर्धनाय व्याकरणनियमान् प्रयुङ्क्ते। व्याकरणेतिहासमपि वेदकालादारभत। भाषायै एव व्याकरणम्। भाषाप्रयोगरीतिः समेषां समानतया न भवति। प्रादेशिकभेदाः इतरभाषाभिः सम्पर्केण तथा जनानाम् उच्चारणभेदाननुसृत्य च व्याकरणेऽपि व्यतियानमागतम्। कालानुसृतभाषायाः प्रयोगवत् व्याकरणनियमे व्यतियानानि संजातानि।

**व्याकरणेतिहासे त्रयः विभागाः**

'पाणिन्युपज्ञं व्याकरणम्' इति ख्यातिः वर्तते। पाणिनिरेव व्याकरणशास्त्रस्य सर्वोत्कर्षस्य हेतुभूतः। सन्त्यपि बहवः आचार्याः पाणिनीयवत् शास्त्रीयं सर्वतोमुखं चिन्तोद्दीपकं ग्रन्थान्तरं नास्ति। कैचित् आचार्यैः व्याकरणेतिहासे त्रयः भागाः सूचिताः।

1. मुनित्रयकालात्पूर्वकालः
2. मुनित्रयकालः
3. मुनित्रयोत्तरकालः

एतेषु विभागेषु मुनित्रयकाल एव सुवर्णकालः। मुनित्रये पाणिनिः वररुचिः पतञ्जलिश्चान्तर्भवन्ति।

पाणिनेः पाणिनीयं सर्वगुणोत्कृष्टं सर्वातिशायित्वं व्याकरणम् एव। अत्र अष्ट अध्यायाः। प्रत्यध्यायं पादचतुष्टयम्। एवं द्वात्रिंशत्पादाः प्रायेण चतुस्सहस्रं सूत्राणि च। पाणिनीयस्य भागद्वयं वर्तते। सपादसप्ताध्यायी इत्येकः। त्रिपादी इत्यन्यः। तत्र काचन सविशेषता वर्तते। सपादसप्ताध्यायीस्थसूत्राणि त्रिपादीस्थासूत्राणि न जानन्ति। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति।

मुनित्रयम्

पाणिनीयसूत्रे यदुक्तं यदनुक्तं दुरुक्तं वा तत्कथनाय व्याख्यानाय वा वररुचिना वार्तिकानि रचितानि। एतादृशानां वार्तिकानां संख्या षड्विंशोत्तरशतं परितः वर्तते। नागेशभट्टस्य 'लघुशब्देन्दुशेखरः' प्रमाणयति यत् कात्यायनः पाणिनेः शिष्यः आसीदिति। कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य सर्वथा पोषकः। अमुं वार्तिकपाठमाश्रित्य पतञ्जलिना महाभाष्यरचना कृता। तेन महात्मना 'स्वर्गारोहणम्' नामकं काव्यमपि रचितम्। उक्तञ्च

**'यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि।**
**काव्येन रुचिरेणैव ख्यातो कात्यायनोऽसौ कविकर्मदक्षः' इति।**

**पतञ्जलिः**

पदेन वाचां मलमपाकरन् पतञ्जलिः मुनित्रये अन्यतमः भवति। 'यथोत्तरं मुनीनां प्रामाण्यम्' इति वाक्यं भाष्यकारस्य प्रसिद्धिः परां कोटिं प्राप इत्यस्य सूचकं एव। महाभाष्यरचना अनेकेषां ग्रन्थानामाश्रयभूता वरीवर्ति। तस्य कालानन्तरं संजातेषु सर्वेषु व्याकरणग्रन्थेषु महाभाष्यस्थवचनानि उदाहरणत्वेन सूचितानि। आधुनिकव्याकरणग्रन्थाः अपि अस्य भाष्यस्य महत्वमुद्घोषयन्ति। प्रामाणिकग्रन्थोऽयम्। अयं महामुनिः पतञ्जलिः विविधैः नामाभिः अवगम्यते। गोनर्दीयः गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः चेति। गोनर्दीयशब्देन अवगम्येन यत् अस्य देशः गोनर्दः इति। अयं देशः गोण्डामण्डलपरिसरे एवेति केचन विद्वांसः।

माता तु गोणिका। नागनाथादिनामानि अस्य शेषावतारतां व्याञ्जयन्तीति वदन्ति। अस्मिन् महाभाष्ये सकलं वाङ्मयं स्पष्टतमं प्रतिभाति।

**महभाष्यं पस्पशाह्निकः**

महाभाष्ये पस्पशाह्निकस्य वैशिष्ट्यम्

महाभाष्ये पञ्चाशितिः आह्निकानि सन्ति। केचन चतुरशीतिरिति वदन्ति। अह्ना निर्वृत्तम् आह्निकम्। प्रथमाह्निकस्य नाम पस्पशाह्निकम्। द्वितीयस्य नाम प्रत्याहाराह्निकमिति भवति। 'अथ शब्दानुशासनम्' इति वाक्येन प्रथमाह्निकम् आरभते। शब्दानाम् अनुशासनं शब्दानुशासनम्। शब्दानुशासनं नाम शब्दशास्त्रम्। लौकिकानां वैदिकानां च शब्दानामनुशासनं अत्र करोति। येनोच्चारितेन पदार्थस्य प्रतीतिः भवति सः शब्दः। प्रतीतपदार्थकः ध्वनिः शब्दः। व्याकरणपठनस्य पञ्च मुख्यप्रयोजनानि त्रयोदश आनुषङ्गिक प्रयोजनानि च उक्तानि। लघुत्वात् शब्दोपदेशः कार्यः। शब्दानां प्रतिपत्तौ प्रतिपदपाठः अनभ्युपायः। चतुर्भिश्च प्रकारैः विद्योपयुक्तः भवति। आगमस्वाध्यायप्रवचनव्यवहारकालैः विद्योपयुक्ताः। शब्दस्य अर्थस्य सम्बन्धस्य च नित्यत्वमङ्गीक्रियते। वर्णनामुपेदेशः वृत्तिसमवायार्थः। वृत्तिः नाम शास्त्रप्रवृत्तिः। वर्णानाम् आनुपूर्व्येण सन्निवेशः समवायः।

प्रत्याहाराह्निकम्

महाभाष्यस्य द्वितियाह्निकं भवति प्रत्याहाराह्निकम्। तस्मिन् आह्निके अकारस्य विवृतोपदेशः आकारग्रहणार्थः इत्यादिकं विशदयति। लृकारः यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः एव। सन्ध्यक्षेरषु तपरोच्चारणं न कार्यम्, वर्णैकदेशाः वर्णग्रहणेन न गृह्यन्ते इति, प्रत्याहारेषु अनुबन्धानां न ग्रहणम् इत्यादीनि कार्याणि विशदयति।

तृतीयादिषु आह्निकेषु गुणाः अभेदकाः, सवर्णानां ग्रहणार्थमेव अकारस्य तपरकरणमिति, तच्छेषतदपवादपक्षौ स्वीकर्तव्यौ विप्रतिषेधसूत्रे परमित्यस्य इष्टमित्यर्थः, न धातुलोपार्धधातुके इत्यनेन

गुणवृद्धिनिषेधः, नाऽज्झलौ इति सूत्रेण सवर्णसंज्ञानिषेधः, ईषद्विवृतम् ऊष्मणाम् इत्यनेन 'नाऽज्झलौ' इति सूत्रस्य प्रत्याख्यानम्, प्रेतम् इत्यादौ प्रगृह्यवारणाय, 'निपात एकाजनाङ्' इति सूत्रे 'एकाच्' इति पदम् 'सर्वादीनि सर्वनामानि' इति सूत्रे 'पूर्वपदात्संज्ञायामगः' इति निपातनात् नकारस्य णत्वं न, अविशेषेण किञ्चिदुक्त्वा विशेषेण नेति यदुच्यते तत् निपातनम् इत्यादिकानि कार्याणि महाभाष्ये सविस्तरं प्रतिपादयाति।

**भर्तृहरिः**

व्याकरणशास्त्रे लब्धप्रतिष्ठेषु अन्यतः भवति आचार्यः भर्तृहरिः। स महात्मा चतुर्थ-पञ्चमशतकयोः मध्ये स्वजीवितेनेमं लोकं पावयामास। स्फोटसिद्धान्तस्योपज्ञाता सः सर्वशास्त्रपारंगतः आसीत्। व्याकरणदर्शनस्य परमसिद्धान्तं शब्दतत्वम् स्वग्रन्थे वाक्यपदीये सः प्रतिपादयति। अनादिनिधनं ब्रह्म अर्थभावेन विवर्तते। तेन जगतः उत्पत्तिः। वेदान्तिनः जीवितस्य परमलक्ष्यं मोक्षमेवेति वदन्ति। ब्रह्मसायुज्यप्राप्तिरेव मोक्षः। मोक्षावस्था तु आत्यन्तिकदुःखनिवृत्तिः निरतिशयानन्दरूपा च। मोक्षमार्गोपदेशकः भवति वाक्यपदीयग्रन्थः अपि उक्तञ्च वाक्यपदीये 'इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः' इति।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः' इति निरूपयति स्वग्रन्थे

**वाक्यपदीयम्**

स्फोटरूपस्य शब्दब्रह्मणः स्वरूपादीन् प्रतिपादयन् ग्रन्थमेव वाक्यपदीयम्। वाक्यं च पदं च वाक्यपदे। ते अधिकृत्य कृतः ग्रन्थः वाक्यपदीयम्। वाक्यपदीये त्रीणि काण्डानि सन्ति। सृष्टिप्रक्रियाविषये भर्तृहरिणा विवर्तवादः स्वीकृतः। अतत्त्वतः अन्यथाप्रथा विवर्तः। रज्जुसर्पवादः तस्योदाहरणमेव। शब्दतत्वस्य विवर्त एवायं प्रपञ्चः इत्युक्त्या वाक्यपदीयमारभते। वाक्यपदीयस्य प्रथमे ब्रह्मकाण्डे १५६

शब्दानुशासनस्य महत्वं प्रतिपादयति

कारिकाः सन्ति। एताभिः कारिकाभिः शब्दानुशासनस्य महत्त्वं सविशदं प्रतिपादयति।

एकमेव शब्दब्रह्म शक्तिव्यपाश्रयात् भिन्नं प्रतिभाति। जायते, अस्ति, विपरणमते वर्धते, अपक्षीयते नश्यति इति षट् भावविकाराः कालशक्तिमुपाश्रिताः भवन्ति। सर्वबीजस्य एकस्य शब्दब्रह्मणः भोक्तृभोक्तव्यरूपा स्थितिः वर्तते। शब्दब्रह्मणः प्राप्त्युपायस्य वेदस्य ऋग्यजुस्सामाथर्वभेदेन प्रभेदाः दृश्यते। दृष्टादृष्टप्रयोजनाः स्मृतयः वेदमेवाश्रयन्ते। ज्ञानसंस्कारकारणानि भवन्ति व्याकरणादीनि शास्त्राणि। व्याकरणं तु ब्रह्मणः आसन्नं, छन्दसां प्रथमं, तपसामुत्तमं च भवति। व्याकरणे शब्दार्थसम्बन्धाः नित्याः।

एकमेव शब्दब्रह्म शक्तिव्यपाश्रयात् भिन्नं प्रतिभाति

वाक्यपदीये पञ्च प्रमाणानि भर्तृहरिणा उक्तानि। तानि प्रत्यक्षम् अनुमानं शब्दः, अभ्यासः, अदृष्टं च। शब्दप्रमाणमेव प्रधानं प्रमाणमिति भर्तृहरिः। व्याकरणोक्तः मोक्षोपायः वाङ्मलानां चिकित्सिन्ति सर्वविद्यानां श्रेष्ठं च भवति। भर्तृहरिमते प्रत्यक्षं द्विधा लौकिकम् अलौकिकं चेति। अस्माकं दृष्टिगोचरं लौकिकं प्रत्यक्षम्। अतीतं अनागतं च कार्यम् अन्तर्दृष्टिना ऋषयः पश्यन्ति। तदेव अलौकिकं प्रत्यक्षम्। अनुमानेन भावानां प्रसिद्धिः दुर्लभा।

शब्दप्रमाणमेव प्रधानं प्रमाणम्

वैयाकरणानां स्फोटतत्वं शब्दतत्वमेव। वाचः चतुर्विधा। परा, पश्य न्ती, मध्यमा वैखरीभेदात्।

**परा वाङ्मूलचक्रस्था, पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया, वैखरी कण्ठतालुगा।।**

परा (मूला) वाक् मूलाधारस्था। इमां योगिनामप्यगम्या। पश्यन्ती नाभीदेशस्था, मध्यमा हृदयस्था, वैखरी कण्ठस्था च भवन्ति।

**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।**

स्फोटः अष्टविधः। ते वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजाति स्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः चेति।

उपादानशष्देषु (मानवैः उपयुक्तेपु शब्देषु) द्वौ शब्दौ स्तः, एकः शब्दानां निमित्तम्, अपरमर्थबोधाय च। उच्चारणात्पूर्वं वक्तुः बुद्धौ जायमानः शब्दः एकः उच्चारणानन्तरं श्रोतुः अर्थार्थधारणाय जातः शब्दः अपरः इति द्वैविध्यम्। एक एव शब्दः उपाधिभेदानुसारं ग्राह्यः ग्रहकः च उच्यते। श्रोत्रेन्द्रियेण गृहीतः शब्दः, ग्राह्यं बुद्ध्या गृहीतं शब्दरूपं ग्राहकं च भवति।

एक एव शब्दः उपाधिभेदानुसारं ग्राह्यः ग्रहकः च उच्यते

वैयाकरणाः अखण्डवाक्यस्फोटवादिनः भवन्ति। प्रकृतिप्रत्यययोः वर्णाः, पदेषु वर्तमानाः प्रकृतिप्रत्ययाः वाक्ये वर्तमानानि पदानि च काल्पनिकानि भवन्ति। यथा

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवाः न च।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।।**

पदे न वर्णाः न विद्यन्ते। वर्णेषु अवयवाः च न। एवं वाक्यात् पदानामत्यन्तम् अवान्तरभागाः न । वर्णस्फोटः इत्यनेन भर्तृहरिणा प्रकृतिस्फोटः प्रत्ययस्फोटः च लक्ष्यते।

**पदस्फोटात् अर्थज्ञाने संजाते सत्यपि पूर्णमर्थज्ञानं वाक्यादेव सिद्ध्यतीत्यतः वाक्यस्फोटं स्वीकरोति।**

वर्णस्फोटे वर्णव्यक्तयः अनेकाः इत्यतः ग्रहणक्रियायाः आयासः वर्धते इत्यतः वर्णजातिस्फोटमङ्गीकरोति।

वैयाकरणाचार्ययोः पतञ्जलिभर्तृहर्योः सेवनं व्याकरणसाहित्ये नितरां प्रशोभते।

## Summarised Overview

व्याकरणेतिहासस्य सुवर्णकालः भवति मुनित्रयकालः। अन्तःसारसमृद्धं समुद्रवदपारमगाधञ्च व्याकरणं वेदपुरुषस्य मुखमेव। व्याकरणसाहित्ये पतञ्जलिमहर्षेः महाभाष्यं श्रेष्ठः ग्रन्थः भवति। योगदर्शनस्योपज्ञाता भगवान् पतञ्जलिरेव। पदेन वाचां मलमपाकरन् पतञ्जलिः मुनित्रये अन्यतमः भवति। 'यथोत्तरं मुनीनां प्रामाण्यम्' इति वाक्यं भाष्यकारस्य प्रसिद्धिः परां कोटिं प्राप इत्यस्य सूचकं एव। स्फोटसिद्धान्तस्य आचार्यः भवति भर्तृहरिः। अयं महामुनिः पतञ्जलिः विविधैः नामाभिः अवगम्यते। गोनर्दीयः गोणिकापुत्रः, नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः चेति। गोनर्दीयशब्देन अवगम्येन यत् अस्य देशः गोनर्दः इति। अयं देशः गोण्डामण्डलपरिसरे एवेति केचन विद्वांसः। माता तु गोणिका।महाभाष्यस्य प्रथमे पस्पशाह्निके व्याकरणपठनस्य मुख्यप्रयोजनानि अनुषाङ्गिकप्रयोजनानि च विशदयति। प्रतीतपदार्थकः ध्वनिः शब्दः।

भर्तृहरिः स्वग्रन्थे वाक्यपदीये व्याकरणदर्शनस्य परमसिद्धान्तं शब्दतत्वं प्रतिपादयति। स महात्मा चतुर्थ-पञ्चमशतकयोः मध्ये स्वजीवितेनेमं लोकं पावयामास। स्फोटरूपस्य शब्दब्रह्मणः स्वरूपादीन् वाक्यपदीये प्रतिपादयति। मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते। मोक्षमार्गोपदेशकः भवति वाक्यपदीयग्रन्थः अपि उक्तञ्च वाक्यपदीये 'इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः' इति।

## Assignments

I. **एकेन वाक्येन वाक्यद्वयेन वा उत्तरत**

1. पाणिनेः पूर्वकालिकानां चतुर्णामाचार्याणां नामानि लिखत।व्याकरणपठनस्य प्रयोजनानि कानि?
2. पतञ्जलिमहर्षेः अपरनामानि कानि?
3. को नाम समवायः?
4. वाक्यपदीयस्य प्रथमकाण्डस्य नाम किम्? तस्मिन् कति कारिकाः सन्ति?
5. शब्देषु द्वौ भेदौ- तौ कौ?
6. व्याकरणेतिहासे कति विभागाः? ते के?
7. पाणिनीयस्य भागद्वयं वर्तते। प्रतिपादयत।

8. भर्तृहरिणा उक्तानि प्रमाणानि कानि?

## II. लघुटिप्पणीं लिखत-

1. स्फोटः कः? कतिविधः? नामानि कानि?
2. पाणिनिः।

## III. निबन्धात्मकः प्रश्नः-

1. महाभाष्यस्य प्राधान्यं विशदयत।
2. व्याकरणशास्त्रे भर्तृहरेः प्राधान्यं विवृणुत।

## Suggested Readings


1. महाभाष्यार्थदीपिका (नवाह्निकान्तः), प्रथमो भागः, प्रो. कृष्णकुमारः, चिन्मय इन्टर्नाषणल् फौण्डेषन्, शोधसंस्थान्, केरलम्, 2015.
2. वाक्यपदीयम् (ब्रह्मकाण्डम्) व्याख्याद्वयोपेतम्, पद्मश्री पण्डितरघुनाथशर्मा, सम्पूर्णानन्दविश्वविद्यालयः, वारणासी, 1988


## References


1. Dr. K.Chandrasekharan Nair, Vakyapadiyam, Brahmakandam (Sunil PriyaMalayalam Commentary, Jai Karthik Books, Trivandrum 2000.
2. पतञ्जलिः, महाभाष्यम्।
3. भर्तृहरिः, वाक्यपदीयम्।

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# शास्त्रारम्भप्रतिज्ञा

## Learning Outcomes

- व्याकरणपठनस्यावश्यकतां जानाति।
- शास्त्रप्रवेशनाय सन्नद्धतामार्जयति।
- अनुबन्धचतुष्टयं जानाति।
- शास्त्राभ्यसने तत्परतां वर्धते।

## Background

भारतीयसंस्कृतेः अक्षया निधिः भवति वेदः। वेदेषु अनादिकालेन सम्पादितं मूल्यं सञ्चितमस्ति। वेदसंरक्षणाय धर्मसंरक्षणाय च व्याकरणपठनं कार्यमेव। व्याकरणे वेदाङ्गत्वं वेदत्वं च वर्तते। व्याकरणं विना इतरशास्त्रप्रवेशनं दुष्करं भवति। प्रसिद्धौ वैयाकरणाचार्यौ भवतः पतञ्जलिभर्तृहरी। पतञ्जलेः महाभाष्यं व्याकरणग्रन्थेषु समुन्नतं स्थानं वहति। लालित्येन प्रतिपाद्यविषयस्य क्रमबद्धतया सारगाम्भीर्येण सिद्धान्तपक्षस्थापनेन च महाभाष्यसदृशः कश्चन ग्रन्थः इतःपर्यन्तं व्याकरणसाहित्ये न संजातः। अयं ग्रन्थः अस्य माहात्म्यं च कल्पान्तस्थायि भवति। शास्त्रग्रन्थस्य अस्य रचना आक्षेपभाष्य – सिद्धान्तभाष्यसमर्थनरूपेण प्रश्नोत्तररूपेण च वर्तते। अपि च ग्रन्थारम्भे निर्विघ्नपरिसामाप्तिसाधनभूतं

मङ्गलाचरणं विषय – सम्बन्ध- अधिकारी – प्रयोजनरूपम् अनुबन्धचतुष्टयं वर्तते। तेन रूपेण शास्त्ररम्भप्रतिज्ञा पतञ्जलिमहार्षिणा कृता। अस्मिन्नेकके शास्त्रारम्भप्रतिज्ञामवलोकयामः।

## Keywords

विषयः - अधिकारी- सम्बन्धः – प्रयोजनं- शब्दानुशासनम्- अथ- अधिकारार्थः।

## Discussion

अथ शब्दानुशासनम् इत्युक्त्या महाभाष्यरचना आरब्धा। अत्र अनुबन्धचतुष्टयं वर्तते। अनुबन्धाः तु अधिकारी - विषयः - सम्बन्धः - प्रयोजनं च। व्याकरणपठनस्य प्रयोजनानि सविस्तरं पतञ्जलिः विशदयति। सामान्यरूपेण वक्तुं शक्यते यत् ग्रन्थे विषयाः उपविषयाश्च विषयपदेन व्यपदिश्यन्ते। अत्र शब्दज्ञानरूपं लौकिकाः वैदिकाश्च शब्दः विषयः। महाभाष्यविषयः तु पाणिनीयसूत्राणां कात्यायनकृत वार्तिकानां च सविस्तरपठनेन भाषायां संजातानि व्यतियानान्यनुसृत्य भाषाशुद्ध्यर्थं नियमनिर्माणमेव।

अधिकारि

ग्रन्थस्य अध्ययनकर्ता अधिकारीति उच्यते। ग्रन्थकर्ता पाठकानाम् अध्येतॄणां च कल्याणाय ग्रन्थनिर्माणे दत्तचितः भवेत्। केषुचिदवसरेषु ग्रन्थकर्ता स्वकीर्तये स्वाभीष्टसिद्ध्यर्थं वा ग्रन्थनिर्माणं करोति। पुनश्च ज्ञानाय उद्देश्यपूर्तये वा अध्येतारः प्रवर्तन्ते। महाभाष्ये तु अधिकारी शास्त्रजिज्ञासवान् भवति। व्याकरणाध्ययने जिज्ञासूनां प्रवृत्तये रचितः ग्रन्थः भवति महाभाष्यम्। 'साधनचतुष्टयसम्पन्नः प्रमाता एवाधिकारी'

इत्यपि उच्यते। शास्त्रपठने उत्साही, योग्यः छात्रः भवेत् अधिकारी। तस्मिन् एकाग्रता- विशालमनस्कता- चित्तशुद्धिः शास्त्रग्रहणपटुत्वं च भवेयुः।

विषयः, सम्बन्धः

'ग्रन्थस्य ग्रन्थोक्तस्य विषयस्य च प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः' इत्युच्यते। ग्रन्थे उपस्थापितः प्रस्तुतः वा विषयः प्रतिपाद्यः। व्याकरणसम्बन्धि प्रकृतिप्रत्ययविवरणं यस्मिन् ग्रन्थे कृतं सः ग्रन्थः प्रतिपादकः। एवं शास्त्रविषययोः प्रतिपाद्य- प्रतिपादकभावः सम्बन्धः।

प्रयोजनम्

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति वास्तविकसिद्धान्तमनुसृत्य सर्वोऽपि प्राणिनः किमपि कार्यं प्रयोजनं विना नैव कुर्वन्ति। ग्रन्थकर्तारोऽपि प्रयोजनं विना ग्रन्थनिर्माणाय नैव प्रवर्तन्ते। महाभाष्ये पतञ्जलिः व्याकरणपठनस्य मुख्यप्रयोजनानि आनुषङ्गिकप्रयोजनानि च विवृणोति।

पतञ्जलिः शास्त्रारम्भप्रतिज्ञाभाष्यम् एवम् आरभत।

**पाठभागः**

**अथ शब्दानुशासनम्।**

**अथेत्यव्ययं शब्दोऽधिकारार्थः प्रयुज्यते।**

**शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्।**

अपशब्देभ्यः साधुशब्दान् विविच्य ज्ञापनम्

व्याख्या - महाभाष्ये पतञ्जलेः प्रथमं वाक्यं भवति 'अथ शब्दानुशासनम्' इति। अथ इत्यस्य अधिकारः इत्यर्थः। अधिकारः (प्रारम्भः) अर्थः (प्रयोजनं) यस्येति व्युत्पत्तिः। अथ इत्यस्य प्रारम्भवाचकता। शब्दानाम् अनुशासनं शब्दानुशासनम्। शब्दानुशासनं नाम पदशास्त्रम् (व्याकरणम्)।

'अथ' इत्यस्य अनेके अर्थाः सन्ति। मङ्गलार्थे अथ शब्दः प्रयुज्यते। अनन्तरं, आरंभः, प्रश्नः, कार्त्स्न्यं, अधिकारः, संशयः, विकल्पः समुच्चयः इत्याद्याः। अस्मिन् स्थले अधिकारार्थे।

'अथेत्यव्ययम्' इत्यत्र इतिशब्दो अथशब्दस्य स्वरूपे अवस्थानाय प्रयुक्तः।

'अथशब्दः' निपातः। शब्दानुशासनमिति व्याकरणस्य प्राचीनतमम् अन्वर्थं नामधेयं भवति। अनुशासनं नाम अपशब्देभ्यः साधुशब्दान् विविच्य ज्ञापनम्।

## Summarised Overview

व्याकरणाध्ययनं विना इतरशास्त्रप्रवेशनं दुष्करं भवति। लालित्येन प्रतिपाद्यविषयस्य क्रमबद्धतया सारगाम्भिर्येण सिद्धान्तपक्षस्थापनेन च महाभाष्यम् इतरान् ग्रन्थान् अतिशेते। अनुबन्धचतुष्टये विषय - संबन्धः – अधिकारी - प्रयोजनानि अन्तर्भवन्ति। लोकिकाः वैदिकाश्च शब्दाः अत्र विषयः। शास्त्र जिज्ञासुः, योग्यः छात्रः, एकाग्रतया युक्तः, विशालमनस्कः, निर्मलचित्तः च भवेत् अधिकारी। प्रतिपाद्य - प्रतिपादकभावः सम्बन्धः। व्याकरणाध्ययनस्य मुख्यानि आनुषङ्गिकानि च प्रयोजनानि सन्ति। शब्दा नामनुशासनं शब्दानुशासनम्। अथ इत्यव्ययम् अधिकारार्थे प्रयुक्तम्। अधिकारः (प्रारम्भः) अर्थः (प्रयोजनं) यस्य अधिकारार्थः। अनुशासनं नाम अपशब्देभ्यः साधुशब्दान् विविच्य ज्ञापनम्।

## Assignments

**I. एकेन वाक्येन वाक्यद्वेयेन वा उत्तरत।**

1. प्रसिद्धौ वैयाकरणाचार्यौ कौ?महाभाष्यस्य रचनारीतिः कीदृशी?
2. अनुबन्धचतुष्टये कानि अन्तर्भवन्ति?
3. अनुबन्धचतुष्टये अन्तर्भूतः विषयः कः?
4. अधिकारी कः?
5. को नाम सम्बन्धः?

**II. टिप्पणीं लिखत।**

1. अनुबन्धचतुष्टयम्।
2. 'अथ' इत्यव्ययस्य प्रसक्तिः।

## Suggested Readings

1. महामुनिपतञ्जलिविरचितं महाभाष्यम् पस्पशाह्निकम्, व्याख्यानं, रमण् कुमार् शर्मा, ईस्टन् लिंकर्स दिल्ली।
2. Prof. O.Valsala, Vyakarana Mahabhasya with Malayalam Commentary Punarnava, Chinmaya International foundation, Shodhsantham, Keralam.

## References


1. पतञ्जलिःमहाभाष्यम्।
2. पतञ्जलिः महाभाष्यम्, प्रदीपोद्योततत्त्वालोकैर्विभूषितम्, पुटं. 3


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# महाभाष्यम् - 2

## BLOCK - 2

SGOU

# UNIT 1

# शब्दनिर्णयाधिकरणम्

## Learning Outcomes

- महाभाष्यस्य प्राधान्यमवगच्छति।
- शब्दस्वरूपं गृह्णाति।
- पतञ्जलिमहर्षेः भाषायाः लालित्यमनुभूयते।
- शब्दसविशेषतां जानाति।

## Background

व्याकरणदर्शने अतिप्रशस्तं स्थानमलङ्करोति भगवान् पतञ्जलिः। मुनित्रयकालमेव व्याकरणेतिहासस्य सुवर्णकालः। मुनित्रये श्रेष्ठः भवति पतञ्जलिः। श्रूयते च 'यथोत्तरं मुनीनां प्रामाण्यम्' इति। गोनर्ददेशे जातस्य तस्य माता गोणिका आसीत्। महाभाष्यं तु पाणिनेः अष्टाध्यायीम् अवलम्ब्य कृता विशिष्टा रचना भवति। वार्तिककारस्य कात्ययनस्य मतं च निरीक्ष्य पतञ्जलिना भाष्यं रचितम्। उक्तञ्च

**"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यविदो विदुः"।।इति।**

महाभाष्यरचनार्थं पतञ्जलिः सरलां भाषां प्रयुक्तवान्। महाभाष्ये चतुरशीतिः आह्निकानि सन्ति। कतिपये आचार्यः पञ्चाशीतिः इति वदन्ति। अह्ना निर्वृत्तम् आह्निकम्। एकदिवसपठनाय योग्यमेव एकमाह्निकम् इति विश्वासः। महाभाष्यं शिक्षा-व्याकरण- निरुक्तानाम् एकं मिश्रितं रूपमेव। अर्थात्

महाभाष्यपठनेन शिक्षायाः (phonetics) व्याकरणस्य (grammar) निरुक्तस्य (Derivation of words) च ज्ञानमार्जयितुं शक्यते। तत्कारणादेव 'महाभाष्यम्' इत्यर्थन्वर्थं नाम। महत्वात् भाष्यत्वात् च महाभाष्यमिति।

अस्मिन्नेकके शब्दस्य महत्वं निर्णयति। शब्दः कः? पदम्शब्दयोः कः भेदः? शब्दस्य सविशेषताः काः? इत्यादिकं पठामः।

## Keywords

शब्दानुशासनं- लौकिकानां वैदिकानां – गौः – सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं – द्रव्यं – क्रिया- गुणः - आकृतिः - येनोच्चारितेन – प्रतितपदार्थकः – ध्वनिः।

## Discussion

**आचार्यः पतञ्जलिः प्रथमे पस्पशाह्निके शब्दनिर्णयाधिकरणं विशदयति।**

**पाठभागः**

(अत्राक्षेपमाष्यमवतरति।)

**केषां शब्दानाम्?**

लौकिकानां वैदिकानां च शब्दानामुपदेशः

**लौकिकानां वैदिकानां च। तत्र लौकिकस्तावद्- गौः अश्वः, पुरुषो, हस्ति, शकुनिः मृगो, ब्राह्मणः इति।**

**व्याख्या** – केषामिति। महाभाष्ये पञ्चशीतिः आह्निकाः सन्ति। प्रथमस्य आह्निकस्य नाम भवति पस्पशाह्निकम्। पस्पशः इत्यस्य आमुखम्

(Introduction) भूमिका इत्यर्थः। स्पशधातोः निष्पन्नं पदं भवतीदम्। पुनः पुनः अतिशयेन वा चर्चितम् इत्यर्थोऽपि वर्तते। अह्ना निर्वृत्तम् आह्निकम्।

केषां शब्दानामुपदेशः कार्यः इत्यस्योत्तरं भवति लौकिकानां वैदिकानां चेति। शब्दाः द्विविधाः। लौकिकाः वैदिकाः च। लोके भवाः लौकिकाः। लोके विदिताः इत्यर्थः। लौकिकशब्दानामुदाहरणानि प्रदर्शयति – गौः अश्वः पुरुषः शकुनिः (पक्षी), मृगः (deer), ब्राह्मणः इत्यादीनि।

**पाठभागः**

**वैदिकाः खल्वपि - शं नो देवीरमीष्टये। इषे त्वोर्जे त्वा। अग्निमीले पुरोहितम्। अग्न आ याहि वीतय इति।**

वैदिक उदाहरणानि

**व्याख्या-** वैदिका इति। वेदे भवः वैदिकः। वैदिकवाक्यानाम् उदाहरणानि यथा – 'शं नो देवीरभीष्टये' इति अथर्ववेदे, 'उषे त्वोर्जे त्वा' इति यजुर्वेदे 'अग्निमिले पुरोहितम्' इति ऋग्वेदे', 'अग्न आ याहि वीतये' इति सामवेदे।

**पाठभागः**

(आक्षेपभाष्यमवतरति)

**अथ गौरित्यत्र कः शब्दः?**

**किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः?**

**नेत्याह। द्रव्यं नाम तत्।**

**यत्तर्हि तदिङ्गितं चेष्टितं निमिषितमिति स शब्दः?**

**नेत्याह। क्रिया नाम सा।**

**यत्तर्हि तच्छुक्लो नीलः कपिल कपोतः इति, सः शब्दः?**

**नेत्याह। गुणो नाम सः।**

**यत्तर्हि तद् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः?**

**नेत्याह। आकृतिः नाम सा**

**कस्तर्हि शब्दः ?**

**येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः।**

**व्याख्या** – अथेति। गौरित्यत्र कः शब्दः इत्याक्षेपभाष्यमवतरति। किं तत् सास्नया (गलकम्बलेन) लाङ्गूलेन (पुच्छेन), ककुदेन (लालामेन), खुरेण (शफेन), विषाणेन (ऋङ्गेण) च युक्तः मांसपिण्डः सः गौः इति। न। इमानि द्रव्याणि भवन्ति। भिन्नेन्द्रियग्रह्यत्वात् द्रव्यं शब्दो न भवितुमर्हति।

यस्य शब्देन सास्नालाङ्गूलककुद खुरविषाणिनां सम्प्रत्ययः सः गौः इति शब्दः

एवं चेत् शङ्गितं (अभिप्रायनुरुपचेष्टाविष्करणं) चेष्टितं (शरीरपरिस्पन्दं), निमिषितम् (अक्षिव्यापारं) वा सः गौरिति शब्दः। न। एताः क्रियाः भवन्ति। अभिप्रायस्य सूचकः शरीरव्यापारः इङ्गितम्। सा शारीरिकी क्रिया।

एवं चेत् तद् शुक्लः (धवलवर्णः) नीलः, कपोतः, कपिलः सः शब्दः? न। एते गुणाः।

एवं चेत् तद् भिन्नेषु ( भेदितेषु) अभिन्नं (न भेदितं) छिन्नेषु (खण्डितेषु) अछिन्नम् (अखण्डितं) वा। न। सा आकृतिः भवति।

एवं चेत् गौरित्यत्र कः शब्दः इति प्रश्नः वर्तते। तस्योत्तरमिदं भवति। यस्य शब्दस्य उच्चारणेन सास्नाया लङ्गूलेन, ककुदेन खुरेण श्रृङ्गेण च युक्तस्य कस्यचन मांसपिण्डस्य प्रतीतिः जायते स एव गौः इति शब्दः

सम्प्रत्ययः विश्वासप्रतीतिः। उच्चारितेन – प्रकाशितेन। शब्दः नाम श्रोत्रग्राह्यगुणपदार्थ विशेषः।

**पाठभागः**

अन्यत् समाधानमपि भाष्यकारः अवतरति

**अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा 'शब्दं कुरु', 'मा शब्दं कार्षीः 'शब्दकार्ययं माणवकः' इति ध्वनिं कुर्वन् एवमुच्यते। तस्मात् ध्वनिः शब्दः।**

**व्याख्या** – अथवेति। प्रतीतपदार्थकः (पदार्थस्य प्रतीतिजनकः ध्वनिः) शब्दः इति उच्यते। यथा ध्वनिमुत्पादयन्तं बालमुद्दिश्य 'शब्दं कुरु' अथवा 'शब्दं मा कुरु' 'अयं बालकः शब्दकारी – (शब्दमुत्पादयन् भवति) इति ध्वनिं कुर्वन् पूर्वोत्करुपेण भाषते। अतः ध्वनिः शब्दः।

प्रतीतपदार्थकः ध्वनिः शब्दः

संक्षिप्तं रुपम् – यस्य शब्दस्य उच्चारणेन सास्नालङ्गूल कुकुदखुरविषाणिनः) मांसपिण्डस्य प्रतीतिः जायते सः शब्दः गौः इति भवति- इत्येकं समाधानम्।

'प्रतीतपदार्थकः ध्वनिः शब्दः' इति समाधानान्तरम्।

## Summarised Overview

पतञ्जलिमहर्षिः ललितया भाषया महाभाष्यरचनां कृतवान्। पाणिनेः अष्टाध्यायीमवलम्ब्य रचितः ग्रन्थः भवति महाभाष्यम्। अह्न निर्वृत्तम् आह्निकम्। महाभाष्यस्य प्रथमाह्निकस्य नाम पस्पशाह्निकम् इति। पस्परशः इत्यस्य आमुखं भूमिका इत्यर्थः। महाभाष्यस्य प्रथमे आह्निके शब्दः कः इति प्रश्नस्योत्तरं ग्रन्थकारः विशदयति। गौः अश्वः पुरुषः शकुनिः इत्यादीनि लौकिकशब्दानाम् उदाहरणानि भवन्ति। येन शब्देन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रदत्ययः भवति सः गौः इति शब्दः। यत् च्छिन्नेषु अच्छिन्नं, भिन्नेषु, अभिन्नं च सा आकृतिः। सास्ना-लाङ्गूल-ककुद-खुर-विषाणानि द्रव्याणि भवन्ति। एवं चेत् गौरित्यत्र कः शब्दः इति प्रश्नः वर्तते। तस्योत्तरमिदं भवति। यस्य शब्दस्य उच्चारणेन सास्नालङ्गूल कुकुदखुरविषाणिनः मांसपिण्डस्य प्रतीतिः जायते सः शब्दः गौः इति भवति। प्रतीतपदार्थकः ध्वनिः शब्दः इति समाधानम्।

# Assignments

I. **एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. आकृतिः नाम कः ?
2. वैदिकशब्दानां चत्वारि उदाहरणपदानि लिखत।
3. लौकिकशब्दानां चत्वारि उदाहरणपदानि लिखत।
4. शुक्लो नीलः कपोतकपिलाः कस्मिन् विभागे अन्तर्भवन्ति ?
5. शब्दः कः ?
6. प्रतीतपदार्थकः इति शब्दस्य कोऽर्थः ?

II. **लघुटिप्पणीं लिखत।**

1. वैदिकशब्दानां कानिचन उदाहरणानि।
2. प्रतीतपदार्थकः ध्वनिः शब्दः।

# Suggested Readings

1. महामुनिपतञ्जलिविरचितं महाभाष्यम् पस्पशाह्निकम्, व्याख्यानं, रमण् कुमार् शर्मा, ईस्टन् लिंकर्स दिल्ली।
2. Prof. O.Valsala, Vyakaranamahalabashasya with Malayalam Commentary Punarnava, Chinmaya International foundation, Shodhsantham, Keralam.

# References


1. पतञ्जलिः महाभाष्यम्, पस्पशह्निकम्।

2. पतञ्जलिः व्याकरणमहाभाष्यम् (प्रदीपेद्योतसहितम्) प्रथमखण्डः, चौरवम्बा संस्कृतप्रतिष्टानम्, दिल्ली, 1992.
3. Prof. G. Sahadevan, Notes on Mahabhashya, Institute of Distance Education, Kerala University, Thiruvananthapuram, 2004, page 3 - 5

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# शब्दानुशासनप्रयोजनम्

## Learning Outcomes

- पतञ्जलिमहर्षेः भाषाशैलीं परिचिनोति।
- व्याकरणपठनस्यावश्यकतां जानाति।
- साधूनि पदानि ज्ञात्वा प्रयोक्तुं प्रभवति।
- व्याकरणपठनस्य प्रयोजनानि अवगच्छति।

## Background

भाषायै भवति व्याकरणम्। व्याकरणं भाषां शुद्धीं करोति। आशयाविष्करणाय शुद्धा भाषा प्रयोक्तव्या। साधूनां शब्दानां प्रयोगाय व्याकरणज्ञानमावश्यकम् । व्याकरणं शब्दव्युत्पत्तिपरकं साहित्यमेव। भर्तृहरिः सूचयति यत् 'साधुत्वज्ञानविषया सैषा व्याकरणसमृतिः' इति। शब्दसाधुत्वासाधुत्वविवेकरूपेण व्याकरणपठनेन ऋग्वेदादीनाम् आशयावगतिः जायते। व्याकरणस्य न केवलं वेदाङ्गात्वम् अपि तु वेदानां वेदत्वमपि सिद्ध्यति।

पतञ्जलिमहर्षिः स्वग्रन्थे महाभाष्ये सरलया भाषया व्याकरणपठनस्यावश्यकतां विशदयति। शब्दानामनुशासनं शब्दानुशासनमित्युक्त्वा वैदिकानां लौकिकानां शब्दानाम् उदाहरणनि सूचितवान्। तन्मध्ये लौकिकोदाहरणेन सूचितेषु पदेषु 'गौः' इति पदेन किम् उद्दिश्यते इति आक्षेप-समाधानाभाष्येण विवृणोति। सास्नालाङ्गूलादयः द्रव्याणि भवन्ति। सास्नादीनां

भिन्नेन्द्रिग्राह्यत्वमेव। इङ्गितं चेष्टितमित्यादयः क्रियाः भवन्ति। शुक्लः नीलादयः गुणाः। भिन्नेष्वभिन्नं, छिन्नेषु अच्छिन्नं च आकृतिरेव। अतः येनोच्चारितेन सास्नादीनां सम्प्रत्ययः भवति सः गौरिति शब्दः। एवं रुपेण आक्षेपभाष्यस्य एकं समाधानं संसूच्य प्रतीतपदार्थकः ध्वनिः शब्दः इति द्वितीयं समाधानमवतरति।

अस्मिन्नेकके व्याकरणपठनस्य पञ्च मुख्यप्रयोजनानि त्रयोदश आनुषङ्गिकप्रयोजनानि च दार्शनिकः पतञ्जलिः ललितभाषया विशदयति। पश्यामस्तावत्।

## Keywords

वेदानां रक्षार्थं – लोपागमवर्णविकारज्ञः – सर्वैः लिङ्गैः सर्वाभिः विभक्तिभिः – षडङ्गो वेदोऽध्येयः ज्ञेयश्च - लघ्वर्थम् – असन्देहर्थं – तेऽसुराः – स्थूलपृषतीम् – दुष्टः शब्दः - सारस्वतीम् - यदधीतम् - भ्राजा नाम श्लोकाः – अप्रमागीतः - विभक्तिं कुर्वन्ति - जायेव पत्ये उशती- तितउना- दशम्यां पुत्रस्य- सुदेवो असि।

## Discussion

### व्याकरणपठनस्य पञ्च मुख्यप्रयोजनानि कानीति विशदयति।

**पाठभागः**

**कानि पुनः शब्दानुशासनस्य प्रयोजनानि?**

**रक्षोहगमलघ्वसन्देहाः प्रयोजनम्।**

**रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति।**

**व्याख्या** - कानीति। शब्दानुशासनस्य (व्याकरणस्य) प्रयोजनानि कानि इत्यक्षेपभाष्यम्। व्याकरणपठनेन कानि प्रयोजनानि वर्तन्ते इति प्रश्नः।

तस्य उत्तरं भवति रक्षोहगमलघ्वसन्देहाः प्रयोजनमिति। पञ्च प्रयोजनानि।

वेदरक्षा

वेदानां रक्षार्थं व्याकरणमध्येयम्। लोप-आगम-वर्णविकाराः वेदे सन्ति। लोपागमदीन् अधिकृत्य सुष्ठु ज्ञानं वेदज्ञे पुरूषे वर्तितव्यम्। वर्णव्यतियानमधिकृत्य सुष्ठु ज्ञानं वेदज्ञः अर्जितव्यः। पदादिविभागः वेदे अस्ति। पदानामुच्चारणं सन्धिकार्यं वर्णव्यतियानञ्च वेदे कार्यम्। अतः व्याकरणे पर्याप्तं ज्ञानं आवश्यकम्।

**पाठभागः**

(ऊहपदार्थनिरूपणभाष्यमवतारयति।)

**ऊहः खल्वपि न सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिभिर्वेदे मन्त्राः निगदिताः ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।**

**व्याख्य**- ऊह इति ऊहार्थं व्याकरणं पठितव्यम्।

ऊहः

वेदे सर्वैः लिङ्गैः सर्वाभिः विभक्तिभिः मन्त्राः न सूचिताः। लिङ्गज्ञानं विभक्तिज्ञानं च वर्तते चेत् मन्त्रे उचितं परिवर्तनं कृत्वा प्रयोक्तुं शक्यते। यथा 'सूर्याय नमः'। सूर्यशब्दस्य स्थाने 'भानु' शब्दः चेत् कथं प्रयोक्तव्यं? नमः शब्दयोगो चतुर्थी। अकारान्तस्य सूर्यशब्दस्य चतुर्थ्येकवचनं सूर्याय इति। भानुशब्दश्चेत् 'भानवे' इति प्रयोक्तव्यम्। व्याकरणशानं विना एतादृशं परिवर्तनं कर्तुं न शक्यते। अतः शब्दान् यथावत् विपरिणमयितुं व्याकरणपठनं कार्यम्। ताहशं परिवर्तनं कर्तुं अवैयाकरणः (व्याकरणज्ञानरहितेन) न शक्नोति।

**पाठभागः**

(तृतीयमागमपदार्थनिरुपणभाष्यमवतारयति।)

**आगमः खल्वपि। 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गे वेदः अध्येयो ज्ञेयश्च इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।**

**व्याख्या**- आगम इति। आगमार्थं व्याकरणपठनं कार्यम्।

आगमः

आगमः वेदः। वेदज्ञानार्थं व्याकरणपठनं कार्यम्। हि वेदे सूचितमस्ति यत् ब्राह्मणः अवश्यं वेदं पठतु। वेदाध्ययनं प्रधानकार्यं भवति। सः धर्मिष्ठः भवेत्। वेदः मानवज्ञानस्य विश्वकोशः। धर्मब्रह्मप्रतिपादकम् अपौरुषेयं वाक्यं वेदः। वेदस्य षट्सु वेदाङ्गेषु प्रधानं भवति व्याकरणम्। 'मुखं व्याकरणं स्मृतम्' इति प्रमाणम्। प्रधाने व्याकरणे कृतः प्रयत्नः कदापि निष्फलं न भविष्यति।

आपि च व्याकरणं सर्वशास्त्रोपकारकमेव।

**पाठभागः**

(लघुपदार्थनिरूपणभाष्यमवतारयति।)

**लघ्वर्थं चाध्येयं व्याकरणम्। 'ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्।**

**व्याख्या** – लघ्वर्थमिति। लाघवार्थं व्याकरणपठनं कार्यम्।

लाघवार्थम्

व्याकरणपठनेन भाषायां प्रावीण्यं सम्पादयितुं शक्यते। व्याकरणं सर्वशास्त्रोपकारकम्। यथा अकारन्तपुलिंङ्गस्य रामशब्दस्य निष्पत्तिपठनेन सर्वेषां अकारान्तपुंलिङ्गशब्दानां निष्पत्तिं ज्ञातुं शक्यते। इतरशास्त्रप्रवेशनस्य कवाटमेव व्याकरणम्। अपि च शब्दानां विशिष्य साधुशब्दानां ग्रहणं मानवैः अवश्यं कार्यम्। व्याकरणपठनेन शब्दज्ञानं सुखेन सिद्ध्यति।

**पाठभागः**

(पञ्चमं प्रयोजनम् असन्देहपदार्थनिरुपणभाष्यम् प्रदश्यति।)

**असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति - 'स्थूल-पृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवसति यदि पूर्वपदप्रकृतिस्ववरत्वं ततो बहुब्रीहिः अत समासान्तोदात्तत्वं ततस्तत्पुरुष इति।**

**व्याख्या** – असन्देहर्थमिति। असन्देहर्थं व्याकरणपठनं कार्यम्।

असन्देहः

न सन्देहः असन्देहः। सन्देहः संशयः। असन्देहर्थम् इत्यस्य संशयं विना वक्तुं प्रयोक्तुं च। कः समासः पूर्वादि प्रकृतिस्वरत्वे कः समासः अन्तोदात्तत्वे कः समासः इति वक्तुं वैयाकरणेनैव शक्यते। उदात्तनुदात्तस्वरितादीन् समासादीन् च वैयाकरणः जानाति। अग्नि-वरुणदेवौ उद्दिश्य प्रवर्तमाने यागे स्थूलपृषतिमनड्वाहीमालभेत' इति मन्त्रमस्ति। स्थूलं पीनम्। पृषत् बिन्दुः। स्तूलपृषतीमित्यत्र स्थूला चासौ पृषती च स्थूलपृषती इति अन्तोदात्तत्वे कर्मधारमसमासः। स्थूलानि पृषन्ति यस्याः सा स्थूलपृषति इत्यत्र पूर्वपदप्रकृतिस्वरे बहुव्रीहिः। अत्र कः आशयः इति सन्देहः। बहुव्रीहौ बिन्दूनामेव स्थूलत्वम् न तु गोः। वैयाकरणः स्वरानुसारं, समासानुसारं च अर्थं निर्दिशति। एवम् असन्देहार्थं व्याकरणाध्ययनं कार्यम्।

एतानि पञ्च प्रयोजनानि व्याकरणपठनेन आर्जयितुं शक्यते।

## शब्दानुशासनस्य आनुषङ्गिकप्रयोजनानि

**पाठभागः**

(व्याकरणाध्ययनसाधकागमप्रतीकभाष्यम्।)

आनुषङ्गिकप्रयोज-नानि

**इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशाम्यां पुत्रस्य। सुदेवो असि वरुण इति।**

**व्याख्या**- इमानीति। पूर्वोक्तानि त्रयोदश आनुषिङ्गिकप्रयोजनानि।

भाष्यं यथा।

**पाठभागः**

**'तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छा ह वा एष यदपशबदः'। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्। तेऽसुराः।**

**व्याख्या**– त इति। आनुषङ्गिकप्रयोजनेषु प्रथमम्।

पराबभूवुः

ते असुराः 'हेलयः हेलयः' इति वदन्तः निन्दार्हाः बभूवुः। 'हे अलयः' इत्यत्र 'हैहेप्रयोगे हैहयोः इति सूत्रेण प्लुते 'प्लुतप्रगृह्याचि नित्यम्' इति सूत्रेण प्रकृतिभावो च कर्तव्ये तदकरणमत्र कृतम्। ब्राह्मणः म्लेच्छभाषायां दुष्टभाषायां अपभाषाणम् (अशुद्धोच्चारणं) च करोति चेत् तदनुचितमेव। अतः व्याकरणपठनमावश्यकम्। शुद्धा भाषा प्रयोक्तव्या।

(द्वितीयमानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। इति।**

**दुष्टाञ्च शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणाम्। (दुष्टःशब्दाः)**

**व्याख्या**- दुष्ट इति। द्वितीयमानुषङ्गिकप्रयोजनं सूचयति।

स्वरेण वर्णेन वा मिथ्याप्रयुक्तः दुष्टः शब्दः यजमानं हिनस्ति नाशयति। यथा इन्द्रशत्रुः स्वरेण कृतापराधात्।

स्वरतः वर्णतः मिथ्याप्रयुक्तः दुष्टः शब्दः अद्दिष्टमाशयं पूर्णतः न प्रकाशयति। तादृशः दुष्टः शब्दः वाग्वज्रः भूत्वा यजमानं हिनस्ति।

स्वरेण वर्णेन वा मिथ्याप्रयुक्तः दूष्टः श-
ब्दः यजमानं हिनस्ति

इन्द्रशत्रुरित्यस्य इन्द्रघातकः इत्येकोऽर्थः। इन्द्रः शत्रुः यस्य स इन्द्रशत्रुः इत्यपरोऽर्थः। इन्द्रशत्रुर्वर्धस्व इति मन्त्रे अन्तोदात्ते कर्तव्ये अज्ञानवशाद् प्रकृतिस्वरत्वं कृतम्। अतः यागकर्ता ममार।

अतः युष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्।

(तृतीयमानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**'यदधीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्राविव शुष्कैधौ न तज्ज्वलति कर्हिचित्।।**

अविज्ञातम् अविदितस्वरादिसंस्कारत्वात् केवले न पाठमात्रेण आशयवागतिः न जायते

**व्याख्या**- यदधीतमिति। तृतीयमानुषङ्गिकप्रयोजनं विशदयति।

अविज्ञातम् अविदितस्वरादिसंस्कारत्वात् केवले न पाठमात्रेण आशयवागतिः न जायते। अगिनरहितं शुष्के इन्धनं न ज्वलति। अनग्नौ शुष्कैधः न तद् ज्वलति'। शुषकमिन्धनं भवत्यपि तद् दाहयितुं योग्यः अग्निरावश्यकः। एवं केवलेन पाठमात्रेण आशयवगतिः न जायते। शब्दानमर्थावबोधनाय योग्यं व्याकरणज्ञानमावश्यकम्।

(चतुर्थमानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावत् व्यवहारकाले।**

**सोऽनन्तमाप्नोति जयं परत्र वग्योगविद् दुष्यति चापशब्दैः।।**

**कः?**

**वाग्योगविदेव।**

**कुत एतत्?**

**यो हि शन्दान् जानाति, अपशब्दानप्यसौ जानाति।**

**यथैव हि शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः।**

**अथवा भूयानधर्मः प्राप्नोति। भूयांसोऽपशब्दः, अल्पीयांसः शब्दाः इति। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। तद्यथा गौरित्यस्य शब्दस्य गावि गोणी गोता गोपोतलिका इत्यादयो बहवोऽपभ्रंशाः । अथ योऽवाग्योगविद्, अज्ञानं तस्य शरणम्।**

**व्याख्या** – यस्त्विति। चतुर्थमानुषङ्गिकप्रयोजनं विशदयति।

यः समर्थः व्यवहारकाले (प्रयोगावसरे) यथावत् (यथाविधि) साधुशब्दान् प्रयुङ्क्ते सः अनन्तं जयं प्राप्नोति। किन्तु तस्मिन् स्थाने यः अपशब्दं प्रयुङ्क्ते सः दुष्यति।

तदानीं कः जयं प्राप्नोति।

यः अर्थं ज्ञात्वा यथावत् वाचः प्रयुङ्क्ते सः विजयते।

वाग्योगविद् दुष्यति चापशब्दैः

केन कारणेन ?

यः शब्दान् जानाति, सः अपशब्दानपि जानाति। यथैव शब्दज्ञाने धर्मः, तथा अपशब्दज्ञाने अधर्मः।

एवं चेत् अधिकतया अधर्मप्राप्तिः। हि बहवः अपभ्रंशशब्दः। साधुशब्दाः न्यूनाः। एकैकस्य शब्दस्य बहवः अपभ्रंशाः। यथा 'गौः' इत्येकस्य शब्दस्य 'गावी, गोणी, गोता, गोपोतलिका इत्यनेके अपभ्रंशाः। साधुशब्दः एक एव। गौः इति।

अतः यः वाचं सम्यक् जानाति, सः अज्ञानं (अधर्मं) प्राप्नोति इत्यायाति।

(तदानीं बाधकभाष्यमवतारयति)

**पाठभागः**

**विषम उपन्यासः। नात्यन्तायज्ञानं शरणं भावितुमर्हति। यो ह्यजानन् वै ब्राह्मणं हन्यात्सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्।**

**एवं तर्हि**

**'सोऽनन्तमाप्नोति जयं परत्र वाग्येगविद् दुष्यति चापशब्दै' ।**

**कः?**

**अवाग्योगाविदेव । अथ यो वाग्योगविद् विज्ञानं तस्य शरणम् ।**

वाग्योगविद् साधुशब्दप्रयुक्ता विजयते

**व्याख्या-** विषम इति। साधुशब्दं यः जानाति सोऽपि भूयांसं अधर्मं प्राप्नोति इति कार्यं विषमयुक्तं भवति। यः साधुशब्दं जानाति सः तस्य साधुशब्दस्य स्थाने वर्तमानान् असाधुशब्दानपि जानाति इति कारणात् सः दोषवान् न भवति। अज्ञात्व ब्राह्मणहननं सुरापानं वा करोति चेदपि तद् दोषाय कारणं न भवति। एवं तर्हि 'सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः इत्युक्तिः कथं सङ्गतं स्यादिति सन्देहः। तदानीम् अवाग्योगविदेव दुष्यति। साधुशब्दानभिज्ञः दुष्यति। वाग्योगवित् साधुशब्दप्रयोक्ता विजयते।

('सोऽनन्तमाप्नोति जयं परत्र - इति श्लोककार्ये आक्षेपः समाधानभाष्यम् अवतरति।)

**पाठभागः**

**क्व पुनरिदं पठितम्?**

**भ्राजा नाम श्लोकाः।**

**किं च भोः श्लोकाः अपि प्रमाणम्**

**किं चातः?**

**यदि श्लोकाः अपि प्रमाणम्, अयमपि श्लोकः प्रमाणं भवितुमर्हति**

**यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।**

**पीतं न गमयेद् स्वर्गं किं तत् क्रतुगतं नयेत्।। इति।**

**प्रमत्तगीत एव अत्र भवतः। यस्त्वमप्रमत्तगीतस्तत् प्रमाणम्। यस्तु प्रयुङ्क्ते।**

**व्याख्या** – क्वेति। पूर्वपक्ष 'सोऽनन्तमाप्नोति जयं परत्र' इत्ययं श्लोकः खलु। श्लोकः प्रमाणं किम् ? यदि श्लोकः प्रमाणं तर्हि यदुदुम्बरवर्णानां घटीनां मण्डलं महत् इत्यारभ्यमाणः श्लोकं प्रमाणमस्तु। (श्लोकेऽस्मिन् मदिरालयं वर्णयति।)

अत्रेदं समाधानम्। अप्रमत्तगीतः प्रमाणं भवेत्। यदुदुम्बरवर्णानाम् इति श्लोकः प्रमत्तगीतः। तत्र सः प्रमाणम् इति।

यः व्यवहारकाले प्रयोगकाले अर्थादिकं ज्ञात्वा यथावत् शब्दान् प्रयुङ्क्ते स अनन्तं विजयं प्राप्नोति

अस्य चतुर्थस्यानुषङ्गिकप्रयोजनस्य संक्षिप्तं रूपमधो दीयते। यः कुशलः व्यवहारकाले प्रयोगकाले अर्थादिकं ज्ञात्वा यथावत् शब्दान् प्रयुङ्क्ते स अनन्तं विजयं प्राप्नोति। सः वाग्योगवित् भवति। सः शब्दं शब्दार्थं च जानाति। सः उत्कर्षं प्राप्नोति। यः साधुशब्दान् जानाति सः अपशब्दानपि जानाति।

यदि शब्दज्ञाने धर्मः अपशब्दज्ञाने अधर्मः इति वक्तुं न शक्यते। भूयांसोऽपशब्दाः। अल्पीयांसाः। यथा गौः इति साधुशब्दस्य गावी गोणी गोता इत्यादयः बहवः अपभ्रंशाः।

तदानीं पूर्वपक्षी अमुं संशयमवतरति। 'सोऽनन्तमाप्नोति जयं परत्र...' इत्ययं श्लोकः खलु? श्लोकः प्रमाणं किम्? यदि श्लोकं प्रमाणं तर्हि 'यदुदुम्बरवर्णानां घटीनां मण्डलं महत्' इत्यारभ्यमाणं श्लोकं प्रमाणं भवतु। अत्र मदिरालयं वर्णयति।

अत्रेदं समाधानम्। अप्रमत्तगीतं प्रमाणं भवेत्। यदुदुम्बरवर्णानाम् इति श्लोकः प्रमत्तगीतः। तन्न प्रमाणम् इति

(पञ्चममानुषङ्गिप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**अविदासः प्रत्यभिवादे नाम्ना ये न प्लुतिं विदुः।**

**कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।।**

**अभिवादे स्त्रीवन्मा भूम इत्यध्येयं व्याकरणम्। अविद्वांसः।**

**व्याख्या** – अविद्वांस इति। पञ्चममानुषङ्गिकप्रयोजनं विशदयति।

प्रत्यभिवादे गुरुणा प्लुतः कार्यः। यः प्लुतिं न जानाति सः अविद्वान् भवति। सः स्त्रीषु इव 'अयमहम्' इति वदेत्' अभिवादये 'देवदत्तोऽहम्' इति संस्कृतेन वाक्येन वक्तव्यम्। किन्तु यः व्याकरणं न जानाति, प्लुतिं न जानाति सः परिहास्यः भविष्यति। अभिवादन- प्रत्यभिवादनज्ञानाय व्याकरणपठनं कार्यम्।

यः प्रत्यभिवादनाय प्लुतिं न जानाति सः अविद्वानेव

(षष्ठमानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**याज्ञिकाः पठन्ति- प्रयाजाः – सविभक्तिकाः कार्याः इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। विभक्तिं कुर्वन्ति।**

**व्याख्या** – विभक्तिमिति। षष्ठमानुषङ्गिकप्रयोजनमं विशदयति।

प्रयाजाः प्रयाजमन्त्राः। प्रयाजमन्त्राः सविभक्तिकाः कार्याः इत्यस्य उह्यमानाग्निशब्दप्रकृतिकविभक्तिकाः इत्यर्थः। यथा चर्तुषु प्रयाजेषु चतस्रो विभक्तिर्ददाति। सम्बोधनप्रथमा, सप्तमी, तृतीया, पञ्चमी चात्र यथेष्टं प्रयोक्तव्याः। व्याकरणपठनं विना एतत्कार्यं कर्तुं न शक्यते।

(सप्तममानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**यो वा इमां पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति। आर्त्विजीनाः स्याम इत्यध्येयं व्याकरण्। यो वा इमाम्।**

**व्याख्या** – य इति। सप्तममानुषङ्गिकप्रयोजनं विशदयति।

पदस्वरविज्ञानञ्च व्याकरणादेव भवति

आर्त्विजीनः यजमानः। ऋत्विजमर्हतीति आर्त्विजीनः। यजमानः निश्चयेन वेदरूपां वाणीं पदं पदं (पदशः) स्वरं स्वरं (स्वरशः),

अक्षरमक्षरं (अक्षरशः) च संस्करोति। तादृशं श्रेष्ठं जनं भवितुं व्याकरणपठनं कार्यम्।

(अष्टमानुषङ्गिकप्रयोजनभाष्यमवतारयति।)

**पाठभागः**

**चत्वारि ऋङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।।इति।**

**चत्वारि श्रृङ्गणि। चत्वारि पदजातानि नामख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः। त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे-द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त इस्तासो अस्य। सप्त विभक्तयः। त्रिधा बद्धः। त्रिषु स्थानेषु बद्धः। उरसि कण्ठे शिरसीति। वृषभो वर्षणात्। रोरवीति शब्दं करोति।**

**कुत एतद्?**

**रौतिः शब्दकर्मा। महादेवो मर्त्यां आविवेशेति। महान् देवः शब्दः। मर्त्या मरणधर्माणो मनुष्यास्तानाविवेश। महता देवेन नः साम्यं यथा स्यादित्याध्येयं व्याकरणम्।**

शब्दरूपस्य वृषभस्य चत्वारि श्रृङ्गाणि भवन्ति पदजातानि

**व्याख्या** –चत्वारीति। अष्टममानुषङ्गिकप्रयोजनं विशदयति।

चत्वारि श्रृङ्गाः इति मन्त्रस्य द्विधा व्याख्यानमस्ति। तेषु प्रथममिदम्। अत्र शब्दाः वृषभत्वेन निरूप्यते। अस्य वृषभस्य चत्वारि श्रृङ्गाणि। चत्वारि पदजातानि। तानि नामख्यातोपसर्गनिपाताः। अस्य त्रयः पादाः भूतभाविष्यद्वर्तमानाः भवन्ति। अस्य द्वे शीर्षे- द्वौ शब्दात्मानौ नित्यः कार्यश्च। अस्य सप्त हस्तासः विभक्तयः सन्ति। अमुं ऋषभं त्रिषु स्थानेषु बन्धितम् एव। उरसि कण्ठे शिरसि च बन्धितमेव।

अयं ऋषभः महान् देव एव। स देवः एव शब्दः। अयं शब्दः मरणशीलान् मर्त्यान् आविवेश। एवं महता देवेन असमाकं साम्यं प्राप्तुं व्याकरणपठनं कार्यम्।

(अपरं व्याख्यानमपि सूचयन्तं भाष्यमवतारयति ।)

**पाठभागः**

**अपर आह**

**'चत्वारि वाक्यपरिमिता पदानि तानि विदुर्ब्राह्मणाः ये मनीषिणः।**

**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' ॥**

**चत्वारी वाक्यपरिमिता पदानि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि विदुर्ब्राह्मणा ये मनीषिणः। मनसः ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गमन्ति। गुहायां त्रीणि निहितानि नेङ्गयन्ति। न चेष्ठन्ते। न निमिषन्तीत्यर्थः। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं वा एतद्वाचो यन्मनुष्येषु वर्तते। चतुर्थमित्यर्थः। चत्वारि।**

नामाख्यातोपसर्गनिपातश्च चत्वारि पदजातानि

**व्याख्या** – चत्वारि श्रृङ्गा इत्यस्य द्वितीयं व्याख्यानमेवं भवति। वाण्याः चत्वारि पदजातानि। नामानि (सुबन्तानि), आख्यातानि (तिङन्तानि) उपसर्गः निपातश्च। एतत्कार्यं ज्ञातवन्तः मनीषिणः भवन्ति। अवैयाकरणाः इमानि पदजातानि समानरूपेण गणयन्ति। परा-पश्यन्ति- मध्यमा- वैखरी चेति शब्दचतुष्टयम्। अज्ञानिनः गुहायां त्रीणि परा-पश्यन्ती-मध्यमा निहितानि भवन्ति। व्याकरणप्रदीपेन परापश्यन्त्यादयः प्रकाशन्ते। मनुष्याः वैखर्यां भाषन्ते।

(नवममानुषङ्गिकप्रयोजनभाष्यम् अवतारयति ।)

**पाठभागः**

**उत त्वः पश्यन् न ददर्श वाचम् उत त्वः न श्रृण्वन्न श्रृणोत्येनाम्।**

**उते त्वस्मै तन्वं विसस्रे जायेव पत्य उशति सुवासाः।**

**'उत त्वः'। अपि खल्वेकः पश्यन्नपि न पश्यति वाचम्। अपि खल्वेकः श्रृण्वन्नपि न श्रृणोत्येनाम् इति। अविद्वासमाहार्धम्।**

**उतो त्वस्मै तन्वं विसस्रे – तनुं विवृणुते। 'जायेव पत्य उशती सुवासाः' तद्यथा जाया पत्ये कामयमाना सुवासाः स्वम् आत्मानं विवृणुते, एवं वाग् वाग्विदे स्वात्मानं विवृणुते। वाङ्मो विवृणुयादात्मानमित्यध्येयं व्याकरणम्। (उत त्वः)**

पत्ये कामयामाना जाया स्वम् आत्मानं विवृणोति तथा वाक् वाग्विदे स्वात्मानं विवृणोति

**व्याख्या**- इतेति। नवममानुषङ्गिक्तप्रयोजनं विशदपति।

एकः पश्यन्नपि न पश्यति। श्रृण्वन्नपि न श्रृणोति। पत्ये कामयमाना जाया स्वभर्ते स्वात्मानं स्वशरीरं यथा प्रकाशयति तथा वाक् वागर्थविदे स्वात्मानामाशयं प्रकृतिप्रत्ययविवेचनपूर्वकम् उद्दिष्टमाशयं प्रकाशयति। असमाभ्यं आशयप्रकाशनाय व्याकरणज्ञानमावश्यकम्।

(दशममानुषङ्गिकप्रयोजनभाष्यम् विवृणोति।)

**पाठभागः**

**'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।**

**अत्र सखायः सख्यानि जानते भद्रैषां लक्ष्मिर्निहिताधिवाचि'।**

**सक्तुः सचतेर्दुधावो भवति। कसतेर्वा विपरीताद् विकसितो भवति। तितउ - परिभवनं भवति। ततवद्वा तुन्नवद्वा। धीराः ध्यानवन्तः। मनसा प्रज्ञानेन वाचमक्रत - वाचमकृषत। अत्र सखायः सख्यानि जानते। अत्र सखायाः सन्तः सख्यानि जानते।**

**क्व ?**

**य एष दुर्गो मार्गः, एकगम्यो वाग्विषयः।**

**के पुनस्ते ?**

**वैयाकरणाः।**

**कुतः एतत् ?**

**भद्रैषां लक्ष्मीर्निहिताधिवाचि। एषां वाचि भद्रा लक्ष्मिर्निहिता भवति। लक्ष्मीर्लक्षणाद् भासनात् परिवृढा भवति। सक्तुमिव।**

**व्याख्या** – सक्ततुमिव। दशममानुषङ्गिकप्रयोजनं विशदयाति।

लोके सक्तुः सूर्पेण यथा पवित्रीकरोति विद्वांसः वैयाकरणः तथा अपशब्देभ्यः विविच्य जानन्ति

धीराः (वैयाकरणाः) ध्यानवन्तः मनसा प्रज्ञानेन तितउना (चालिन्या) सक्तुमिव (यवचूर्णमिव) 'तितउ' नामकेनोपकरणेन तुषाद्यपनीयते तथा साधुशब्दान् विविच्य जानन्ति। चालिन्या सक्तुरुपे मनसि प्रज्ञाने साध्वसाधुशब्दान् यथावत् पवित्रिकत्य तण्टुलानीव साधुशब्दान् अपशब्देभ्यः विविच्य जानन्ति। तादृशाः ते सात्त्विकाः सख्यानि सायूज्यानि प्राप्नुवन्ति। तेषां मानसि लक्ष्मीरधिवसन्ति।

(एकदशमानुषङ्गिकप्रयोजनभाष्यं विवृणोति।)

**पाठभागः**

**याज्ञिकाः पठन्ति - 'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेद्" इति। प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणाम्। सारस्वतीम्।**

प्रायश्चित्ताय मावसरः देयः इत्यतः

**व्याख्या**- सारस्वतीमिति। एकादशमानुषङ्गिकप्रयोजनं विवृणोति।

यज्ञानुष्ठानसम्बद्धे मन्त्रे अग्न्याधानक्रियायाम्

अपशब्दं प्रयुज्य पुनः प्राश्चित्तरूपेण सारस्वतीम् इष्टिं चकार। अतः प्रायश्चित्ताय मावसरः देयः इत्यतः व्याकरणमध्येयम्।

(द्वादशमानुषङ्गिकप्रयोजनभाष्यं विवृणोति।)

**पाठभागः**

**याज्ञिकाः पठन्ति- 'दशम्युत्तरकालं जातस्य पुत्रस्य नाम विदध्याद् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानुकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति'। "द्वयक्षरं चतुरक्षरं वा नाम कृतं कुर्यन्न तद्धितम्" इति।**

**न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। दशम्यां पुत्रस्य।**

व्याकरणे पटुत्वं न वर्तते चेत् कृतः तद्धितः वा न ज्ञातुं शक्यते

**व्याख्या** – दशम्यामिति। द्वादशमानुषङ्गिकप्रयोजनं विवृणोति। यज्ञकाण्डसंबन्धिनि मन्त्रे एवं वदति यत् दशम्युत्तरकाले, एकादशे दिने, जातस्य पुत्रस्य नामकरणं कार्यम्। नाम तु घोषवदादिः घोषवन्तो ये वर्णाः तदादिः भवेत्। अन्तरन्तःस्थं, मध्ये अन्तःस्थवर्णौ (य व र ल) युक्तं भवेत्। तन्नाम त्रिपुरुषानूकं भवेत्। त्रयाणां पूर्वपुरुषाणां अनुरूपं, शत्रुषु अप्रसिद्धं च भवेत्। द्व्यक्षरं चतुरक्षरं वा नाम कृदन्तं भवेत्, न तद्धितान्तम्। व्याकरणे पटुत्वं न वर्तते चेत् कृतः तद्धितः वा न ज्ञातुं शक्यते।

(त्रयोदशमानुषङ्गिकप्रयोजनभाष्यमं विशदयति।)

**पाठभागः**

**'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।**

**अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव'॥**

हे वरुण, तव गलात् निस्सृता सप्तविभक्तयः तालुस्थानं प्राप्य प्रकाशन्ते

**'सुदेवो असि वरुण - सत्यदेवोऽसि। 'यस्य ते सप्त सिन्धवः' सप्तविभक्तयः। 'अनुक्षरन्ति काकुदम्'। काकुदं - तालु। काकुर्जिह्वा, सा अस्मिन्नुद्यत इति काकुदम्। 'सूर्म्य सुषिरामिव। तद्यथा शोभनामूर्मिं सुषिरामग्निरन्तः प्रविश्य दहति, एवं ते सप्त सिन्धवः सप्त विभक्तयः ताल्वानुक्षरन्ति। तेनासि सत्यदेवः। स्यामेत्यध्येयं व्याकरणम्। सत्यदेवो असि।**

**व्याख्या**-सुदेव इति। त्रयोदशमानुषङ्गिकप्रयोजनम्

वरुणस्येयं स्तुतिः। हे वरुण, त्वं सत्यदेवोऽसि। हि तव गलात् निस्तृता सप्त सिन्धवः सप्त विभक्तमः नद्य इव सूर्म्यं छिद्रयुक्तां लोहप्रतिमामिव काकुदं तालुं अनुक्षरन्ति प्रकाशयन्ति। यथा शोभनामूर्मिं सुषिरामग्निः अन्तः प्रविश्य दहति तथा सप्त विभक्तयः जिह्वायाः साहय्येन उद्दिष्टानां वाक्यानां रूपेण साहय्यकं भविष्यति।

एवं पतञ्जलिः व्याकरणाध्ययनस्य मुख्यानि अनुषङ्गिकानि च प्रयोजनानि विशदीकृतवान्।

## Summarised Overview

व्याकरणं शब्दव्युत्पत्तिपरकं साहित्यमेव। व्याकरणस्य वेदाङ्गत्वं वेदत्वमपि सिद्ध्यति। पतञ्जलिना व्याकरणाध्यायनस्य मुख्य पञ्च प्रयोजनानि विशदयति। रक्षोहागमलघ्वसन्देहाः च इति। लोपागमविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यतीति। अतः वेदानां रक्षार्थं व्याकरणाध्ययनं परमावश्यकम्। तत्र क्वचिद् शब्दस्य क्वचिद् विभक्तेः क्वचिद् लिङ्गस्य क्वचिद् वचनस्य विपरिणामः क्रियते। एषः विपरिणामः एव ऊहः कथ्यते। अतः यज्ञे यथोचितम् ऊहार्थं व्याकरणमध्ययनमावश्यकम्। आगमः अर्थात् शास्त्रम्। वेदज्ञानार्थं व्याकरणाध्ययनमावश्यकम्। इतरशास्त्र प्रवेशनस्य कवाटमेव व्याकरणम्। अपि च शब्दानां, विशिष्य साधु शब्दानां ग्रहणं मानवैः अवश्यं कार्यम्। अतः व्याकरणं विना लघुनोपायेन शब्दानां ज्ञानं भवितुं नार्हति। असन्देहार्थं - संशयं विना वक्तुं प्रोक्तुं च व्याकरणमध्ययनमावश्यकम्। अनन्तरं व्याकरणाध्यायनस्य त्रयोदश आनुषङ्गिकप्रयोजनानि (गौण प्रयोजनानि) प्रस्तूयते। तानि तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशाम्यां पुत्रस्य। सुदेवो असि वरुण इति। केवलेन पाठमात्रेण आशयावगतिः न जायते। अर्थज्ञानपुरस्सरं शब्दाः ज्ञातव्याः। अर्थज्ञानाय व्याकरणपठनमावश्यकम्।

## Assignments

**I. वाक्येन वाक्यद्वयेन वा उत्तरत।**

1. व्याकरणाध्यायनस्य कति मुख्य प्रयोजनानि ? तानि कानि?रक्षार्थं वेदानामध्येयं व्याकरणम् - विशदयत।
2. 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदः अध्येये ज्ञेयश्च' - आशयं विशदयत।

3. ' स्थूलपृषतीमनड्वाहीमालभत - विशदयत।

4. व्याकरणाध्यायनस्य आनुषङ्गिकप्रयोजनानि कति ?

5. 'भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः' - विशदयत।

6. नामकरणे श्रद्धेयाः कार्याः।

**II. टिप्पणीं लिखत।**

1. विभक्तिं कुर्वन्ति।

2. चत्वारि श्रृङ्गाः।

3. 'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव' - विशदयत।

4. यस्तु प्रयुङ्क्ते

**III. निबन्धात्मकः प्रश्नः।**

1. व्याकरणपठनस्य मुख्यप्रयोजनानि विशदयत।

2. व्याकरणाध्यायनस्य अनुषङ्गिकप्रयोजनानि कानि ? विशदयत।

## Suggested Readings


1. महामुनिपतञ्जलिविरचितं महाभाष्यम् पस्पशाह्निकम्, व्याख्यानं, रमण् कुमार् शर्मा, ईस्टन् लिंकर्स दिल्ली।

2. Prof. O.Valsala, Vyakarana Mahabhasya with Malayalam Commentary Punarnava, Chinmaya International foundation, Shodhsantham, Keralam.


## References


1. प्रोफ . कृष्णकुमारः, महाभाष्यार्थदीपिका (नवह्निकान्तः), प्रथमो भागः, चिन्मया

इन्टर्नाषणल् फौण्डेषन्, केरलम्, २०१५
2. पतञ्जलिः, व्याकरणमहाभाष्यम् (प्रदीपोद्योतसहितम्), प्रथमखण्डः, चौखम्बा संस्कृतप्रतिष्ठानम्, दिल्ली, १९९२
3. Prof. G. Sahadevan, Notes on Mahabhashya, Institute of Distance Education, Kerala University, Thiruvananthapuram, 2004, pages 6 - 16

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# शाब्दोपदेशः

## Learning Outcomes

- महाभाष्यस्य विषयान् अवगच्छति।
- शब्दानुशासनं कथं कर्तव्यमिति जानाति।
- शब्दस्य नित्यत्वानित्यत्वकार्ये सिद्धान्तपक्षं गृह्णाति।
- शास्त्रपूर्वकस्य शब्दप्रयोगेणअभ्युदयः जायते इति सिद्धान्तं गृह्णाति।

## Background

मुनित्रये अग्रगणयः भवति भगवान् पतञ्जलिमहर्षिः। तेन विरचितः विश्वप्रसिद्धः ग्रन्थः भवति महाभाष्यम्। तस्मिन् ग्रन्थं प्रथमाह्निके शब्दानां विशेषतां प्रतिपादयति। लौकिकवैदिकभेदेन शब्दाः द्विविद्याः। लौकिकशब्दानाम् उदाहरणेषु प्रथमतया सूचितास्य 'गौः इति शब्दस्य कोऽर्थः इति चर्चा कृता। येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्यये जायते सः गोशब्दः इति प्रथममुत्तरं स्थापयति। प्रतीतपदार्थको ध्वनिः शब्दः इत्युत्तरमपि उक्त्वा पतञ्जलिः सिद्धान्तं दृढयति। पुनः शब्दानुशासनस्य प्रयोजनानि कानि इति प्रश्नस्य उत्तरं ददाति। रक्षोहागमलध्वसन्देहाः मुख्यप्रयोजनानि इत्युक्त्वा एकैकं विशदयति। वेदानां रक्षार्थं अध्येयं व्याकरणम्। लोपागमवर्णविकरज्ञो सम्यक्त् वेदान् परिपालपयिष्यति। ऊहार्थं चाध्येयं व्याकरणम्। न सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदिताः। आगमज्ञानार्थं व्याकरणं पठनीयम्। ब्राह्मणेन षडङ्गो

वेदो अधितव्यः ज्ञेयश्च। व्याकरणपठनेन सर्वशास्त्रप्रवेशनं सुकरं भवति। असन्देहार्थं चाध्येयं व्याकरणम्।

शब्दानुशासनस्य त्रयोदश आनुषङ्गिकप्रयोजनानि सन्ति। केवलेन पाठमात्रेण आशयावगतिः न जायते। अर्थज्ञानपुरस्सरं शब्दाः ज्ञातव्याः। अर्थज्ञानाय व्याकरणपठनमावश्यकम्।

अस्मिन्नेकके शब्दानुशासनं कथं कर्तव्यम्, शब्दप्रयोगे कः पाठः स्वीकर्तव्यः, शब्दस्य नित्यत्वानित्वादिकार्याणि च विशदयति। तत्कथमिति पश्यामः।

## Keywords

भक्ष्यनियमेन - लघुत्वात् शब्दोपदेशः - प्रतिपदपाठः - अनभ्युपायः बृहस्पतिरिन्द्राय - चतुर्भिः प्रकारैः विद्योपयुक्ता - सिद्धे शब्दार्थसम्बन्धे - ध्रुवं कूटस्थं - प्रियतद्धिताः दाक्षिणात्याः - अप्रयुक्ताः शब्दाः - शब्दज्ञाने धर्मः - कूपखानकवद् - आचारे नियमः।

## Discussion

### शब्दानुशासनं कथं कर्तव्यम् इति विषये आक्षेपभाष्यम् अवतारयति।

(शब्दानुसासनं कथं कर्व्यम्)

**पाठभागः**

**शब्दानुशासनमिदानीं कर्तव्यम्। तत्कथं कर्तव्यम्। किं शब्दोपदेशः कर्तव्यः आहोस्विदपशब्दोपदेशः आहोस्विदुभयोपदेशः इति।**

**अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेन अभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा भक्ष्याः' इत्युक्ते गम्यत एतद् - अतोऽन्योऽभक्ष्या इति। अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा 'अभक्ष्यो,**

**ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर' इत्युक्ते गम्यत एतत् 'आरण्यो भक्ष्य इति। एवमिहापि। यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद् गाव्यादयोऽपशब्दाः इति। अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद् गौरित्येष शब्द इति।**

**व्याख्या** – शब्दानुशासनमिति।

शब्दानुशासनं कथं कर्तव्यमिति चर्चा।

1. किं शब्दोपदेशः कर्तव्यः?
2. आहोस्वित् अपशब्दोपदेशः?
3. आहोस्विद् उभयोपदेशः?

अन्यतरोपदेशः

एषु प्रथमद्वितीययोः अन्यतरोपदेशेन कृतं स्यात्। तद्यथा भक्ष्यनियमेन अभक्ष्यप्रतिषेपो गम्यते। 'पञ्च पञ्चनखाः भक्ष्याः' इत्युक्ते गम्यत एतद् अतोऽन्ये अभक्ष्या इति।

एवमिहापि। यदि तावत् शब्दोपदेशः क्रियते, गौरित्येतस्मिन् उपदिष्टे गम्यत एतद् - ' गव्यादयो अपशब्दः इति।

अथाप्यपशब्दोपदेशः क्रियते, गव्यादिषु उपदिष्टेषु गम्यत एतद् – गौरित्येष शब्द इति।

(आक्षेपभाष्यमवतारयति।)

**पाठभागः**

**किं पुनरत्र ज्यायः?**

शब्देपदेशः कार्यः

**लघुत्वाच्छब्दोपदेशः।**

**लघीयञ्छब्दोपदेशः। गरियान् अपशब्दोपदेशः। एकैकस्य शब्दस्य बहवो अपभ्रंशाः। तद्यथा - गौरित्यस्य शब्दस्य गावी गौणी गोता गोपोतलिकेत्येवमादयः अपभ्रंशाः। इष्टान्वाख्यानां खल्वपि भवति।**

**व्याख्या-** किमिति।

अक्षेपभाष्यमवतरति – किं पुनरत्र ज्यायः? (अधिकतया साधुः इति)

समाधानभाष्यम्- लघुत्वात् शब्दोपदेशः। शब्दोपदेशे लाघवत्वं वर्तते। अपशब्दोपदशे गौरवं वर्तते। हि एकस्य साधुशब्दस्य अनेके अपभ्रंशाः - गौः इत्येकः साधुशब्दः।

तस्य अनेके अपभ्रंशाः - गावी, गोणी, गोता, गोपोतलिका इतिवत्। शब्देपदेशः समीचीनः मार्गः।

(प्रतिपदपाठः कर्तव्यः वा नवेति आक्षेपभाष्यमवतरति।)

**पाठभागः**

**अथैतस्मिन् शब्दोपदेशे सति, किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः - गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमादयः शब्दाः पठितव्याः।**

प्रतिपादपाठक्रमः स्वीकर्तुं न शक्यते

**नेत्याह अनभ्युपायः एषां शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं ही श्रुयते- बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपादोक्तानां शब्दानां शब्दपारायणं प्रोवाच, न चान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्च अध्येता, दिव्यं वर्षसहस्रमाध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे? यः सर्वथा चिरं जीवति, वर्षशतं जीवति।**

**चतुर्भिश्च प्रकारैः विद्योपयुक्ता भवति- आगमनकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यावहारकालेनेति। तत्र च अस्य आगमकालेनैव आयुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्माद् अनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः।**

**व्याख्या-** अथोति। प्रतिपदपाठक्रमः अन्भ्युपायः इति विशदयति। पूर्वपक्षः 'शब्दोपदेशे प्रतिपदपाठक्रमः स्वीकर्तव्यः वा' इति सन्देहः अवतरति।

प्रतिपदपाठक्रमः नाम एकैकस्य पदस्य सर्वाः सविशेषताः प्रदर्श्य द्वितीयं पदं पठितुमारम्भः। यथा गौः अश्वः पुरुषः इत्यादिषु लौकिकशब्दो दाहरणेषु एकैकस्य पदस्य 'गौः' इत्यस्य सविशदव्याख्यानन्तरं अश्वपदस्य इत्येवम्।

अत्रेदं समाधानम्। प्रतिपदपाठक्रमः न युज्यते। एवं श्रूयते - देवगुरुः बृहस्पतिः प्रतिपदपाठक्रमानुसारम् इन्द्रं व्याकरणं पाठितवान्। कति कालः? दिव्यं सहस्रवर्षम्। किं संजातम्? अन्तं न जागाम। विद्याविचक्षणः बृहस्पतिः गुरुः, धिषणाशाली इन्द्रः शिष्यत्वे दिव्येन सहस्रवर्षपाठनेनापि अन्तः न प्राप्तः। एवं चेत् अद्यत्वे किं कर्तुं शक्यते? इन्द्रबृहस्पती मरणरहितौ।

विद्याग्रहणाय चत्वारः मार्गाः

विद्यां ग्रहीतुं चत्वारः प्रकारः सन्ति। आगमकालः (पठनकालः) स्वाध्यायकालः (स्वयंपठनकालः) प्रवचनकालः (विद्यावितरणकालः) व्यवहारकालः (जीविते प्रयोक्तुं योग्यः कालः) च। पूर्णस्य आयुषः उपयोगेनापि पठनकार्यमपि स्वायत्तीकर्तुं न शक्यते यदि प्रतिपदपाठक्रमः स्वीकरोति चेत्। अतः न योग्यं प्रतिपदपाठक्रमः।

(शब्दः कथं पठितव्यः इति आक्षेपमाष्यम् अवतरति।)

**पाठभागः**

**कथं तर्हि इमे शब्दाः प्रतिपत्तव्याः?**

**किञ्चित्सामन्यविशेषवत् लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतोः महतः शब्दौघान् प्रतिपाद्येरन्।**

**किं पुनस्तत्?**

**उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः। कश्चिदपवादः।**

शब्दाः कथं पठितव्याः

**कथञ्जातीयकः पुनरुत्सर्गः कर्तव्यः? कथं जातीयकः अपवादः? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा- 'कर्मण्यण्'। तस्य विशेषेणापवादः। तद्यथा 'आतोऽनुपसर्गे कः'।**

**व्याख्या** – कथमिति। शब्दान् कथं पठेत् इति पूर्वपक्षी।

केषुचित् स्थलेषु सामान्यनियमानां पठनमाद्यं कार्यम्। पुनः विशेषनियमानाम्। अल्पेन प्रयत्नेन बहून् शब्दान् ज्ञातुं अनया रीत्या शक्यते। यथा रामशब्दस्य रुपाणि प्रथमं पठति। तस्य पठनेन बहून्

अकारान्तपुंलिङ्गशब्दान् ज्ञातुं शक्यते। पुनः ततः ईषत् व्यतिरिक्तः शब्दः। तज्ज्ञानं विशेषः।

केषुचिदवसरेषु उत्सर्गापवादसूत्राणां पठनं कार्यम्। समान्यविधिः उत्सर्गः। विशेषविधिः अपवादः। यथा 'कर्मण्यम्' इति सूत्रेण कर्मणि उपपदे धातोः अण् (अ) प्रत्ययः। 'आतोऽनुपसर्गे कः' इति सूत्रेण कर्मणि उपपदेऽपि अनुपसर्गात् धातोः क (अ) प्रत्ययः न अण्। अणः स्थानयोग्ये कप्रत्ययागमनम् अपवादः भवति।

(जातिव्यक्ति पदार्थनिर्णये आक्षेपभाष्यम् अवतरति।)

**पाठभागः**

**किं पुनः आकृतिः पदार्थः, आहोस्वित् द्रव्यम्?**

**उभयमित्याह। कथं ज्ञायते?**

जातिव्यक्त्योः पदार्थनिर्णयः

**उभयथा हि आचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इत्युच्यते।**

**द्रव्यं पदार्थं मत्वा 'सरूपाणामेकशेषमेकास्मिन्' इत्येकशेषः आरभ्यते।**

**व्याख्या-** किमिति। पदानां पक्षाश्रयणे पक्षद्वयमपि आचार्येण अङ्गिकृतम्। आकृतिं पदार्थं मत्वा सूचितमुदाहरणं भवति 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्'। द्रव्यं पदार्थं मत्वा सूचितमुदाहरणं भवति 'सरुपाणामेकशेषमेकस्मिन्' इति सूत्रम्।

(शब्दस्य नित्यत्वानित्यत्वनिर्णयाय आक्षेपभाष्यम्)

**पाठभागः**

**किं पुनर्नित्यः शब्दः, आहोस्वित् कार्यः ?**

**संग्रह एतत्प्राधान्येन परीक्षितम् - 'नित्यो वा स्यात् कार्यो वेति। तत्रोक्ताः दोषाः प्रयोजनान्यपि उक्तानि। तत्र त्वेष निर्णयः - यद्येव नित्यः, अथापि कार्यः, उभयथापि लक्षणं प्रवृत्यम् इति।**

**कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्?**

शब्दस्य नित्यत्वानित्यत्व विचारः

**‘सिद्धे शब्दार्थसम्बन्धे’**

**सिद्धे शब्देऽर्थे सम्बन्धे चेति।**

**अथ सिद्धशब्दस्य कः पदार्थः?**

**नित्यपर्यायवाचि सिद्धशब्दः।**

**कथं ज्ञायते?**

**यत्कूटस्थेषु अविचालितेषु भावेषु वर्तते। तद्यथा - सिद्धा द्यौः सिद्धा पृथिवी, सिद्धामाकाशमिति।**

**व्याख्या** – किमिति- शब्दस्य नित्यत्वानित्यत्वविचारः।

शब्दस्य नित्यत्वानित्यत्वचिषये ‘संग्रहे’ वर्तमानं कार्यं सूचयति। व्याडिना संग्रहः रचितः। संग्रेहे लक्षसंख्याकाः श्लोकाः सन्ति। संग्रहे शब्दविषये चर्चा प्रचलिता। तत्र दोषाः उक्ताः प्रयोजनानि च उक्तानि। तत्र निर्णयः एवं भवति- यद्येव नित्यः, अथापि कार्यः। उभयथा अपि व्याकरणशास्त्रं प्रवर्त्यम्।

तदानीं पूर्वपक्षी एवं पृच्छति। कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम् इति। तस्य उत्तररूपेण दत्तं वार्तिकं भवति ‘सिद्धे शब्दार्थसम्बन्धे’। (वार्तिकस्य प्रथमः भागः।) शब्दार्थसम्बन्धं नित्यं मत्वा इदमुत्तरं दत्तम्।

सिद्धे शब्देऽर्थे सम्बन्धे चेति।

तदानीं सिद्धशब्दस्यार्थः कः इति पूर्वपक्षी।

उत्तरम् – नित्यपर्यायवाची सिद्धशब्दः।

प्रश्नः - कथं ज्ञायते?

उत्तरम्- सिद्धा द्यौः सिद्धा पृथिवी, सिद्धमाकाशम् इत्यादिषु नित्यपर्यायत्वेन सिद्धशब्दः प्रयुक्तः। नित्यशब्दः कुटस्थेषु अविचालिषु भावेषु वर्तते। कूटस्थेषु – अविनाशिषु। अविचालिषु – देशान्तरप्राप्ति

रहितेषु। द्युलोकः पृथिवी आकाशः च । कूटस्थाः अविचालिनः च भवन्ति।

(अत्र पूर्वपक्षिणः अभिप्रायं सूचयति।)

**पाठभागः**

**ननु च भोः कार्यष्वपि वर्तते। तद्यथा- सिद्ध ओदनः सिद्धः सूपः सिद्धा यवागूरिति। यावता कार्यष्वपि वर्तते, तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणम्, न पुनः कार्ये यः सिद्धशब्द इति?**

**व्याख्या-** नन्वति।

अनित्यार्थेऽपि सिद्धशब्दः प्रयुज्यते

'सिद्धः ओदनः', 'सिद्धः सूपः', 'सिद्धा यवागूः' इत्यदिषु सिद्धशब्दः अनित्यार्थे वर्तते। अतः सिद्धशब्दस्य नित्यपर्यायवाचकत्वं कथं स्यादिति पूर्वपक्षिणः संशयः।

सिद्धशब्दस्य आवश्यकताविषये सिद्धान्तपक्षमवतरति।

**पाठभागः**

**संग्रहे तावत् कार्यप्रतिद्वन्द्विभावान् मन्यामहे नित्यपर्यायवाचिनो ग्रहणमिति। इहापि तदेव।**

**अथवा सन्त्येकपदान्यपि अवधारणानि। तद्याथा- अब्भक्षो वायुभक्षा इति – अप एव भक्षयति इति। वायुमेव भक्षयति इति गम्यते। एवमिहापि सिद्ध एव, न साध्य इति।**

**अथवा- पूर्वपदलोपोऽत्र द्रष्टव्यः - अत्यन्तसिद्धः सिद्ध इति। तद्यथा- देवदत्तो दत्तः सत्यभामा भामेति।**

**अथवा 'व्यख्यानतो विशेषप्रतिपात्तिर्नहि सन्देहादलक्षणम्' – इति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यस्यामः।**

**व्याख्या** – संग्रह इति। सिद्धशब्दस्य नित्यर्थकत्वं चतुर्भिः वाक्यैः सिद्धान्तपक्षी प्रदर्शयति।

1. संग्रहे तावत् कार्यप्रतिद्वन्द्विभावात् सिद्धशब्दस्य नित्यार्थः। कार्यप्रतिद्वन्दिभावः नित्यः
2. सन्त्येकपदानि अवधारणानि। एकेन पदेन साकम् 'एव शब्दः' प्रयुज्यते चेद् तद् अवधारणप्रतीतिं जनयति। अवधारणं नियमः। यथा 'राम एव पठति' इत्युच्यते चेद् अन्यः न पठति इति। एवशब्दप्रयोगः अवधारणार्थे भवति।
3. पूर्वपदलोपऽत्र द्रव्यव्यः अत्यन्तसिद्धः सिद्ध इति। यथा देवदत्तः दत्त इति।
4. व्याख्यानतो विशेषप्रतिपत्तिः, न हि सन्देहादलक्षणम् इति। ('कुतः सिद्धशब्दः प्रयुक्तः' इति पूर्वपक्षिणः संशयमवतरति।)

**पाठभागः**

**किं पुनरनेन पदेन? किं न महता कण्ठेन नित्यशब्द एवोपात्तः, यस्मिन्नुपादीयमानेऽसन्देहः स्यात्?**

**मङ्गलार्थम्।**

**माङ्गलिकः आचार्यो महतः शस्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः। प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मात्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति।**

**व्याख्या-** किमिति। सिद्धपदप्रयोगस्यावश्यकतां सूचयति।

नित्यशब्दः आदितः प्रयुक्तः

आचार्यः केन कारणेन नित्यपदस्य स्थाने सिद्धशब्दं प्रयुक्तवान् इति पूर्वपक्षी। उत्तरं तु मङ्गलार्थं सिद्धशब्दः आचार्येण आदितः प्रयुक्तः। मङ्गलादीनि शास्त्राणि प्रथन्ते। प्रथन्ते विस्तारयन्ति (प्रचारयन्ति)। मङ्गलाचरणेन वीरपुरुषाणि आयुष्मत्पुरुषाणि चाध्येतारः स्युः इति।

(नित्यत्वस्थापनाय समाधानभाष्यम् अवतरति।)

**पाठभागः**

**अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्तते।**

**किं तर्हि?**

**आभीक्ष्ण्येपि वर्तते। तद्यथा नित्यप्रहसितो नित्यप्रजल्पित इति। यावताभीक्ष्ण्येऽपि वर्तते। तत्राप्यनेनैवार्थः स्यात् - 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणाम्' इति। पश्यति त्वचार्यो मङ्गलार्थश्चैव सिद्धशब्द आदितः प्रयुक्तो भविष्यति, शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति । अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः।**

नित्यशब्दः आभीक्ष्ण्योऽर्थे पि वर्तते

**व्याख्या-** अयमिति।

नित्यशब्दः न केवलं कूटस्थेषु अविचालिषु भावेषु किन्तु आभीक्ष्ण्येऽपि वर्तते। आभीक्ष्ण्यं नाम पुनः पुनः वर्धनम्। अधिकवर्धनम्। यथा नित्यप्रहसितो नित्यप्रजल्पित इति। नित्यप्रहसितः नाम यः पुनः पुनः प्रहसति (हसति) सः। व्याख्यानेन विशेषप्रतिपत्तिः जायते। अतः सिद्धशब्दः आचार्येण प्रयुक्तः। सिद्धपदप्रयोगात् नित्यत्वं मङ्गलार्थत्वं च सिद्ध्याति।

(सिद्धे शब्दार्थसम्बन्धे इति वार्तिकभागे जात्यकृतिन्यक्तिरूपेषु पदार्थेषु कं पदार्थं स्वीकृत्य विग्रहस्वीकार इत्यशङ्कां प्रदर्शयति।)

**पाठभागः**

**अथ कं पुनः पथार्थं मत्वा एषः विग्रहः क्रियते। सिद्धे शब्देऽर्थे सम्बन्धे चेति।**

**आकृतिमित्याह।**

**कुत एतत्?**

**आकृतिः नित्या, द्रव्यमनित्यम्।**

**अथ द्रव्ये पदार्थे कथं विग्रहः कर्तव्यः?**

**सिद्धे शब्दे अर्थसम्बन्धे चेति। नित्यो हि अर्थवतामर्थः सम्बन्धः।**

**अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः – सिद्धे शब्दे अर्थे सम्बन्धे चेति। द्रव्यं हि नित्यम्, आकृतिरनित्या।**

**कथं ज्ञायते?**

**एवं हि दृश्यते लोके – मृत् कयाचिदाकृत्या युक्ता पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिम् उपमृद्य कुण्डिकाः क्रियन्ते।**

अकृतिः नित्या

**तथा सुवर्णं कयाचिदाकृत्या युक्तः पिण्डो भवति पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्य कटकाः क्रियन्ते । कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तः सुवर्णपिण्डः पुनरपरया आकृत्या युक्तः खदिराङ्गारसवर्णे कुण्डले भवतः। आकृतिरन्या चान्या च भवति, द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते।**

**व्याख्या** – अथेति। कः पदार्थः इति।

आकृतिः पदार्थः इति विचार्य 'सिद्धे शब्दे अर्थे सम्बन्धे च' इति विग्रहः क्रियते। द्रव्यं पदार्थः इति अङ्गीकारे - सिद्धे शब्दे अर्थसम्बन्धे चेति विग्रहः। द्रव्यं नित्यं आकृतिरनित्या च।

एवं सुवर्णं कयाचिदाकृत्या पिण्डरूपेण, पुनः पिण्डाकृतिमुपमृद्य रुचकाः (मालाः) उत्पादयितुं शक्यते। पुनः कटकान्, कटकेभ्यः स्वास्तिकाचिह्नरूपां मालां, मालभ्यः कुण्डलानि च निर्मातुं शक्यते। सर्वत्रापि आकृतिः भिन्ना। द्रव्ये नित्यत्वम्। द्रव्यमवशिष्यते।

(आकृतावपि पदार्थे सिद्धे शब्दे अर्थे सम्बन्धे च इति विग्रहः युज्यते इति आकृतिपदार्थाभ्युपगभाष्यम् अवतरति।

**पाठभागः**

**अकृतावपि पदार्थ एष विग्रहो न्याय्यः - सिद्धे शब्दे अर्थे सम्बन्धे चेति। ननु चोक्तम्- 'आकृतिरनित्या' इति।**

**नैतदस्ति। नित्या आकृतिः।**

**कथम्?**

**न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था ह्युपलभ्यते।**

आकृतावपि सिद्धे शब्दे अर्थे सम्बन्धे च इति विग्रहः योग्यः

**अथवा नेदमेव नित्यलक्षणम् – ध्रुवं कूटस्थमविचाल्यनपायोपजन विकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यास्मिंस्तत्त्वं न विहन्यते।**

**व्याख्या-** आकृताविति। आकृतिः पदार्थः इति पक्षेऽपि 'सिद्धे शब्दार्थसम्बन्धे' इत्यस्य विग्रहः 'सिद्धे शब्दे अर्थे सम्बन्धे च' इति भवति।

तदानीं 'आकृतिरनित्या' इति भवता पूर्वोक्तं कथं युज्यते इति पूर्वपक्षी।

अत्रेदं समाधानम् – नित्य आकृतिः। क्वचित् अव्यक्ततया अप्रत्यक्षतया वर्तते इत्यतः सर्वत्र अप्रत्यक्षता न संभवति। द्रव्यान्तरे तत् वर्तेते। नित्यमित्यस्य लक्षणद्वयं वर्तते।

1. ध्रुवं कूटस्थम् अविचालि अनपायम् उपजनविकाररहितं, अनुत्पत्तिरहितं, अवृद्धिपहितं, अव्यययोगि यत् तत् नित्यम्। ध्रुवं-दृढम्। अनपायम् अपायरहितम्। अव्यययोगि - व्ययरहितम्।
2. यस्मिन् तत्वं न विहन्यते तद् नित्यम्। यत् तस्य स्वरूपं न नाशयति तद् नित्यम्।

(किं तत्वमिति अप्रकृतबोधकभाष्यम् अवतरति।)

**पाठभागः**

**किं पुनः तत्त्वम्?**

**तस्य भावस्तत्त्वम्। आकृतावपि तत्वं न विहन्यते।**

किं नाम तत्त्वम्

**अथवा किं न एतेन- इदं नित्यमिदमनित्यमिति। यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते- सिद्धे शब्दे अर्थे सम्बन्धे चेति।**

**कथं पुनर्ज्ञायते – सिद्धः - शब्दोऽर्थः सम्बन्धश्चेति। लोकतः।**

**यल्लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते, नौषां निर्वृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्याः भावाः निर्वृत्तो तावत्तेषां यत्नः क्रियते। तद्यथा- घटेन कार्यं**

**करिष्यन् कुम्भकारकुलं गत्वाह- कुरु घटं कार्यमनेन करिष्यामीति। न तद्वत् शब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह-कुरु शब्दान् प्रयोक्ष्य इति।**

**व्याख्या-** किमिति। आकृतिरपि नित्या। आकृतौ तस्य भावः न विनश्यति।

पतञ्जलिमहर्षिः पदार्थगतं भावं (धर्मं) अपि नित्यत्वेन गणयन् 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकभागस्य सिद्धे शब्दे अर्थे सम्बन्धे च इति विग्रहं कथितवान्।

तदानीं पूर्वपक्षी – 'सिद्धे शब्दे अर्थे सम्बन्धे च इति कथं ज्ञायते' इति पृच्छति।

तदा 'लोकतः' इति वार्तिकस्य द्वितीयभागं सूचयति सिद्धान्ती। लोके कस्यचित् वस्तुनः प्रयोगं दृष्ट्वा शब्दान् प्रयुञ्जते। तत्र शब्दानाम् उत्पादनाय (निर्वृत्यर्थं) न कोऽपि यत्नं करोति। यथा घटेन कार्यं करिष्यन् कश्चित् कुलालकुलं गत्वा 'घटं कुरु' तेन प्रयोजनमस्ति इति यथा वदति तथा शब्दप्रयोगं कर्तृमिच्छन् कोऽपि वैयाकरणकुलं गत्वा न कथयति 'शब्दं निष्पादयतु' प्रयोक्ष्ये इति। कुलालकुलगमनं विना अर्थं ज्ञात्वा शब्दान् प्रयुज्यते।

(लोक एव प्रमाणं चेत् शास्त्रेण किं प्रयोजनमिति पूर्वपक्षी।)

**पाठभागः**

**यदि तर्हि लोक एषु प्रमाण् , किं शास्त्रेण क्रियते? 'लोकतोऽर्थप्रयुक्ते शब्द प्रयोगे शास्त्रेणधर्मनियमः क्रियते'। लोकतोऽर्थप्रयुक्ते शब्द प्रयोगे शास्त्रेणधर्मनियमः क्रियते। किमिदं धर्मनियमः इति।**

लोक एव प्रमाणं चेत् शास्त्रेण किं प्रयोजनम्

**धर्माय नियमो धर्मनियमः धर्मार्थौ वा नियमो - धर्मनियमः, धर्मप्रयोजनो वा नियमो धर्मनियमः।**

**यथा लौकिक वैदिकेषु**

**प्रियतद्धिताः दाक्षिणात्याः - यथा लोके वेदे च इति प्रयोक्तव्ये तथा लौकिकवौदिकेषु इति प्रयुञ्जते।**

**अथवा युक्त एवात्र तद्धितार्थः। यथा लौकिकेषु वैदिकेषु च कृतान्तेषु।**

**लोके तावद् –'अभक्ष्यो- ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते। शक्यं – चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्। तत्र नियमः क्रियते- 'इदं भक्ष्यम्' 'इदम् अभक्ष्यम्' इति।**

**व्याख्या -** यदीति। पूर्वपक्षी एकं संशयं पृच्छति- 'यदि शब्दानां नित्यत्वे लोकव्यवहारात् एव प्रमाणं तर्हि शास्त्रेण किं प्रयोजनम्' इति। तदानीमुत्तररूपेण वार्तिकस्य तृतीय भागमवतरति।

'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति। लोकानुसारं अर्थयुक्ते शब्दप्रयोगे धर्मनियमः क्रियते। धर्मनियमः इत्यस्य धर्माय नियमः धर्मार्थौ वा नियमः, धर्मप्रयोजनो वा नियमः धर्मनियमः। यथा लौकिकेवैदिकेषु। तद्धितप्रियाः दक्षिणदेशगताः वैयाकरणाः लोके वेदे च इति प्रयोक्तव्ये लौकिकवैदिकेषु इति प्रयुक्तवान्तः।

अपि च अत्रत्यः तद्धितप्रत्ययार्थः साधुरेव। यथा लौकिकवैदिकेषु च कृतन्तेषु (सिद्धान्तेषु)। लोके तावत् 'अभक्ष्यः ग्राम्यकुक्कुटः' इत्युच्यते। भक्ष्यं च नाम क्षुत्प्रतिघातार्थम् उपादीयते। भक्ष्यं भोजनवस्तु। क्षुधः शान्त्यर्थं स्वीकर्तुं योग्यं भक्ष्यम्। श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं शक्यते इत्यतः अभक्ष्यो ग्राम्यकुक्कुटः इत्यादिषु नियमः क्रियते 'इदं भक्ष्यम्' 'इदम् अभक्ष्यम्' इति।

(धर्मनियमः इत्यस्य अन्यानि उदाहरणानि प्रदर्शयति।)

**पाठभागः**

**तथा खेदात् स्त्रीषु प्रवृत्तिर्भिवति। समानश्च खेदविगमो गम्ययां चागम्ययां च। तत्र नियमः क्रियते –इयं गम्या, इयमगम्येति।**

**वेदे खल्वपि 'पयोव्रतो, ब्राह्मणो, यवागूव्रते, राजन्यः आमिक्षाव्रतो वैश्यः' इत्युच्यते। व्रतं च नामाभ्यवहारार्थमुपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। तत्र नियमः क्रियते।**

**तथा 'बैल्वः खादिरो वा यूपः स्याद्' इत्युच्यते। यूपश्च नाम पश्वनुबन्धार्थमुपादीयते। शक्यं चानेन यत्किञ्चिदेव काष्टमुच्छ्रित्य अनुच्छ्रित्य वा पशुरनुबन्धुम्। तत्र नियमः क्रियते।**

**तथा 'अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते भृगुणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्' इति। अन्तरेणापि मन्त्रमग्निर्दहनकर्ता कपालानि संतापयति। तत्र च नियमः क्रियते – एवं क्रियमाणम् अभ्युदयकारि भवतीति।**

धर्मनियम इत्यस्य अन्यानि उदाहरणानि

**एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते - शब्देनैवार्थोऽभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदय कारि भवतीति।**

**व्याख्या** - तथेति। लोकतः शब्दार्थसम्बन्धनित्यत्वे सिद्धे शास्त्रेण धर्मनियमः क्रियते। तथा खेदात् स्त्रीषु प्रवृत्तिर्भवति। खेदः - रागः कामवासनादिः। खेदयतीति खेदः रागः। इन्द्रियनियमासामर्थ्यं वा खेदः। रागस्य शान्त्यर्थं समागमयोग्याभिः स्त्रीभिः समागमः क्रियते। तदानीं समाजे 'इयं गम्या, इयमगाम्या' इति धर्मचिन्तारूपः नियमः वर्तते, तं नियममनुसरति।

वेदेऽपि धर्मनियमः वर्तते। पयोव्रतो ब्राह्मणः, यवागूव्रतो क्षत्रियः आमिक्षाव्रतो वैश्यः इत्युच्यते। आमिक्षा पक्वक्षीरे दधि योजना। व्रतं नाम अभ्यवहारार्थं (भक्षणार्थं) उपादीयते। शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम्। शालिः – तण्डुलम्। तत्र नियमः क्रियते।

अपरमुदाहरणं – बैल्वः खादिरो वा यूपः स्याद्' इति। यूपः – पश्वनुबन्धार्थमुपयुज्यमानः काष्टः। अनेन बैल्वेन खादिरेण वा युपः कार्यः इति नियमः क्रियते।

उदाहरणान्तरं सूचयति 'अंग्नौ कपालान्यधिश्रित्य अभिमन्त्रयते – भृगूणामङ्गिरसां धर्मस्य तपसा तप्यध्वम्' इति। कपालानि यागपात्राणि। मन्त्रमन्तरेणापि अग्निः कपालानि सन्तापयति। तत्र नियमः क्रियते। एवं क्रियमाणमभ्युदकारि भवतीति।

एवम् शब्देन अपशब्देन च अर्थवबोधे जाते धर्मनियमः क्रियते यत् शब्देनैव अर्थवबोधे अभ्युदयः जायते अपशब्देन न।

**शब्दः नित्यः कार्यो वा विशदयत** - कः पुनर्शब्दः? नित्यः अहोस्वित् कार्यः? शब्दस्य नित्यत्वानित्यत्वविषये बहवः वादाः सन्ति। केषाञ्चन आचार्याणां मते शब्दस्य नित्यत्वमस्ति। इतरे केचन अनित्यत्वं वदन्ति। पाणिन्यादीनाम् आचार्याणां मतं किमिति प्रश्ने, महाभाष्यकारः पतञ्जलिः एवं विशदयति।

आचार्येण व्याडिना रचिते संग्रहनामके ग्रन्थे एतत्कार्यं सविशदं प्रतिपादितम् तत्र नित्यत्वपक्षे वर्तमानान् गुणन् तथा दोषान् च सूचयन्ति। अनित्यत्वपक्षे वर्तमानान् गुणान् दोषान् च प्रतिपादितमस्ति। 'संग्रहे' एतत् प्राधान्येन परीक्षितम् - नित्यो वा स्यात् कार्ये वेति। तत्रत्याः दोषाः उक्ताः प्रयोजनानि च उक्तानि' इति। तत्र शब्दस्य नित्यत्वमनित्यत्वं च समर्थितमस्ति। साध्वसाधुपद निर्णयात्मके व्याकरणशास्त्रे उभयमपि स्वीकर्तव्यम्।

किन्तु आचार्यः पाणिनिः शब्दस्य नित्यतामङ्गीकृतवान्। अपि च महतः शब्दस्य, अर्थस्य, शब्दार्थसम्बन्धस्य च नित्यताम् अङ्गीकृतवान्। स्फोटरूपः शब्दः नित्यः। जातिरूपेऽर्थोऽपि नित्यः। शब्दार्थयोः नित्यता अस्ति चेत् तयोः सम्बन्धोऽपि नित्यः एव। वार्तिककारेण कात्यायनेन सूचिते 'सिद्धे शब्दार्थसम्बन्धे' इति वार्तिकभागेऽपि शब्दस्य अर्थस्य सम्बन्धस्य च नित्यतां प्रदर्शयति। सर्वे वैयाकरणाः शब्दस्य अर्थस्य सम्बन्धस्य च नित्यताम् अङ्गीकुर्वन्ति।

(अप्रयुक्तशब्दानाम्। अन्वाख्यानं विशदयति।)

पाठभागः

अस्त्यप्रयुक्तः।

सन्ति वै शब्दा अप्रयुक्ताः। तद्यथा- ऊष, तेर, चक्र, पेचेति।

किमतो यत्सन्त्यप्रयुक्ताः।

प्रयोगाद्धि भवाञ्छब्दानां साधुत्वमध्यवस्यति। य इदानीमप्रयुक्ता नामी साधवः स्युः।

अप्रयुक्तशब्दानाम् अन्वाख्यानम्

इदं तावत् विप्रतिषिद्धम् यदुच्यते 'सन्ति वै शब्दाः अप्रयुक्ताः' इति। यदि सन्ति नाप्रयुक्ताः अथाप्रयुक्ताः न सन्ति। सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्। प्रयुञ्जान एव खलु भवानाह – सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानी मन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्।

नैतद्विप्रतिषिद्धम्। सन्तीति तावद् ब्रूमः। यदेतान् शास्त्रविदः शास्त्रेणानुविदधते। अप्रयुक्ता इति ब्रूमः। यल्लोकेऽप्रयुक्ता इति। यदप्युच्युते कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति।

किं तर्हि?

लोकेऽप्रयुक्ता इति।

ननु च भवानप्यभ्यन्तरो लोके।

अभ्यन्तरोऽहं लोके, नत्वहं लोकः।

अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्।

अस्त्यप्रयुक्त इति चेत्। तन्न। किं कारणम्? अर्थेषु शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यन्ते।

अप्रयोगः प्रयोगान्यत्वात्।

अप्रयोगः खल्वप्येषां शब्दानां न्याय्यः। कुतः? प्रयोगान्यत्वात्। यदेषां शब्दानामर्थेऽन्यान् शब्दान् प्रयुञ्जते। तद्यथा ऊषेत्यस्य शब्दास्यार्थे – 'क्व

यूयमुषिताः,' तेरेत्यस्यार्थे 'क्व यूयं तीर्णाः' चक्रेत्यस्यार्थे 'क्व यूयं कृतवन्तः'। पेचेत्यस्यार्थे 'क्व यूयं पक्ववन्तः इति।

अप्रयुक्ते दीर्घसत्रवत्।

यद्यप्यप्रयुक्ताः, अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः। तद्यथा – दीर्घसत्राणि वार्षशतिकानि वार्षसाहसस्रिकाणि च। न चाद्यत्वे कश्चिदप्याहरति। केवलमृषिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते।

सर्वे देशान्तरे।

सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते।

न चैवौपलभ्यन्ते।

उपलब्धौ यत्नः क्रियताम्। महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती त्रयो लोकाः। चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा भिन्ना एकशताध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशाम्य सन्त्यप्रयुक्ता इति वचनं केवलं साहसमात्रमेव।

एतस्मिंश्चातिमहती शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते। तद्यथा शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एवैनमार्य भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु। ये चाप्येते भवतोऽप्रयुक्ताः अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते। क्व? वेदे। तद्यथा - 'सप्तास्ये रेवती रेवदूष, यद्वो रेवती रेवत्यां तमूष यन्मे नरः श्रुत्यं ब्रह्म- चक्र, यत्रा नश्चक्रा जरसं तनूनाम्' इति।

**व्याख्या** - अस्तीति।

अप्रयुक्ताः केचन शब्दाः सन्ति। ऊष,तेर, चक, पेचे इत्यादयः। सामन्यतः प्रयोगाभावादेव तान् अप्रयुक्तान् वदन्ति। अप्रयुक्तः न सन्ति शब्दप्रयोगात्। एतेषां शब्दानां अर्थेषु अन्यान् शब्दान् प्रयुञ्जते, यथा ऊष इत्यस्यार्थे 'क्व यूयमुषिताः' तेर इत्यस्यार्थे 'क्व यूयं तीर्णाः, चक्र इत्यस्यार्थे 'क्व यूयं कृतवन्तः इति।

यद्यपि ऊष-तेर-चक्र- इत्यादयः शब्दाः अप्रयुक्ताः तथापि दीर्घसत्रवत् विरलतया प्रयुज्यन्ते। यथा दीर्घसत्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। अद्यत्वे एतादृशः यज्ञः न प्रचलति। केवलं ऋषिसम्प्रदायः धर्मः इति कृत्वा याज्ञिकाः शास्त्रेण अनुविदधते। अपि च सर्वे खल्वेते शब्दाः देशान्तरेषु प्रयुज्यन्ते।

महान् शब्दस्य प्रयोगविषयः। सपृद्वीपा, भूमिः, त्रयो लोकाः, चत्वारः वेदाः, वेदाङ्गानि, अनेके उपनिषद्ग्रन्थाः एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, ऋग्वेदस्य एकविंशतीशाखाः, अथर्ववेदस्य नव प्रकाराः उक्तिप्रत्युक्तिरूपः ग्रन्थः, इतिहासः पुराणं, वैद्यकम् इत्येतावान् विपुलः शब्दस्य प्रयोगविषयः।

शब्दस्य प्रयोगविषये प्रादेशिकभेदाः दृश्यन्ते। यथा शवतिः गतिकर्मा कम्बोजेषु। आर्याः विकारर्थे शवतिः प्रयुञ्जन्ते। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमिति आर्याः। प्राच्याः लवनार्थे दातिः दात्रमिति उदीच्येषु।

वेदोऽपि अप्रयुक्ताः इति अभिमतानां शब्दानां प्रयोगे दृश्यते। किन्तु तादृशानां शब्दानां अन्वारव्यानं (तिरस्कारः) आचार्येण कृतम्।

(शब्दज्ञाने धर्मः उत प्रयोगे इति विषयमवतरति।)

**पाठभागः**

**किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे?**

**कश्चात्र विशेषः?**

**‘ज्ञाने धर्म इति चेत्तथाधर्मः’**

**ज्ञाने धर्म इति चेत्तथाधर्मोऽपि प्राप्नोति। यो हि शब्दान् जानात्यपशब्दानपि असौ जानाति। यथैव शब्दज्ञाने धर्म एवम् अपशब्दज्ञानेऽप्यधर्मः।**

ज्ञाने धर्मः इति चेत् तथा अधर्मः

**अथवा भूयान् अधर्मः प्राप्नोति। भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः। एकैकस्य शब्दस्य बहवोऽपभ्रंशः। तद्यथा गौरित्यस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः।**

**व्याख्या** – किमिति। शब्दज्ञानविषये पक्षद्वयमस्ति। शब्दस्य ज्ञाने धर्मः इत्येकः पक्षः। तस्मिन् पक्षे भूयान् अधर्मः स्यादिति पूर्वपक्षिणः संशयः। शब्दज्ञाने धर्मः इति चेत् अपशब्दज्ञाने अधर्मः । हि अपशब्दाः अधिकाः। गौः इति साधुशब्दस्य गावी गोणी गोता इत्यादयः बहवः अपभ्रंशाः।

(ज्ञानपक्षे दूषणान्तरवार्तिकमवतरति।)

**पाठभागः**

**‘आचारे नियमः’।**

**आचारे पुनः ऋषिर्नियमं वेदयते - तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः ।इति।**

**अस्तु तर्हि प्रयोगे।**

**‘प्रयोगे सर्वलोकस्य’।**

ज्ञानपक्षेऽपि दोषः

**यदि प्रयोगे धर्मः, सर्वो लोकोऽभ्युदयेन युज्येत।**

**कश्चेदानीं भवतो मत्सरः, यदि सर्वो लोकोऽभ्युदयेन युज्येत। न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता च नाम प्रयत्नेन भवितव्यम्। न च प्रयत्नः फलाद् व्यतिरेच्यः।**

**ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान् प्रयोक्ष्यन्ते, त एव साधियोऽभ्युदयेन योक्ष्यन्ते।**

**व्यतिरेकोऽपि वै लक्ष्यते। दृश्यन्ते हि कृतप्रयत्नाः चाप्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलेव्यतिरेकोऽपि स्यात्।**

**व्याख्या –** आचार इति।

आचारे नियम चेत् 'तेऽसुराः' इत्यादीनां प्रयोगेण अनिष्टत्वं संजातम्। अतः प्रयोगे धर्मः इति पक्षे 'प्रयोगे सर्वलोकस्य' इति वार्तिकं दुषणरूपेण वर्तते। यदि प्रयोगे धर्मः सर्वलोकः अभ्युदयेन युज्येत। प्रयत्नस्य अनर्थक्यं जायते। अर्थात् कृतप्रयत्नाः (ये सम्यक् प्रयत्नं कुर्वन्ति ते) अप्रवीणाः भविष्यन्ति। अकृतप्रयत्नाः प्रवीणाः च भविष्यन्ति।

(पक्षद्वयनिराकरणभाष्यम् सिद्धान्तभाष्यं चावतरति)

**पाठभागः**

**एवं तर्हि नापि ज्ञाने एव धर्मो नापि प्रयोगे एव।**

**किं तर्हि?**

**'शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन'। शास्त्रपूर्वकं यः शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदशब्दाः अप्येवमभिवदन्ति 'योऽग्निष्टोमेन यजते य उ चैनमेव वेद' योऽग्निं नाचिकेतं चिनुते य उ चैनमेव वेद'।**

सिद्धान्तपक्षम्

**अपर आह तत्तुल्यं वेदशब्देनेति। यथा वेदशब्दाः नियमपूर्वमधीताः फलवन्तो भवन्त्येवं यः शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते इति।**

**व्याख्या-** एवमिति। सिद्धान्तपक्षमवतरति। (1) शास्त्रपूर्वके प्रयोगे धर्मः। तद् वेदतुल्यं भवति। यः वेदानुसारं यागादिकं करोति स उद्दिष्टं फलं प्राप्नोति। एवं यः सूत्रादिकं यथावद् ज्ञात्वा उचितया रीत्या प्रयुङ्क्ते चेत् सः अभ्युदयं प्राप्नोति। सिद्धान्तन्तरमवतरति। (2) शब्दः वेदतुल्य एव। नियमानुसारं वेदं पठति चेदभ्युदयः। व्याकरणमपि तथैव।

(शाने धर्मः इति पक्षाभ्युदयभाष्यम् अवतरति।)

**पाठभागः**

**अथवा पुनरस्तु ज्ञान एव धर्म इति।**

**ननु चोक्तं ज्ञाने धर्म इति चेत्तथाधर्म इति।**

**नैषदोषः, शब्दप्रमाणकाः वयम्, यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह, नापशब्दज्ञानेऽधर्मम्। यच्च पुनरशिष्टाप्रतिषिद्धम्, नैव तद्दोषाय भवति, नाभ्युदयाय। तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति, नाभ्युदयाय।**

ज्ञाने धर्मः इति पक्षमपि युज्यते

**अथवा अभ्युपाय एवापशब्दज्ञानं शब्दज्ञाने। यो ह्यापशब्दान् जानाति शब्दानप्यसौ जानाति। तदेवं 'ज्ञाने धर्मः' इति ब्रुवतोऽर्थादापन्नं भवति- 'अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति।**

**अथवा कूपखानकवदेतद् भविष्यति। तद्यथा- कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति। सोऽप्सु संजातासु तत एव तं गुणमासादयति। येन च स दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति।**

**एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मस्तथापि यस्त्वसौ शब्दज्ञाने धर्मज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते भूयसा चाभ्युदयेन योगो भवति।**

**यदप्युच्यते आचारे नियम इति।**

**याज्ञे कर्मणि स नियमोऽन्यत्रानियमः। एवं हि श्रूयते 'यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञः विदितवेदितव्या अधिगतयाथातथ्याः। ते तत्र भवन्तो यद्वा नस्ताद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे पुनः कर्मणि नापभाषन्ते। तैः पुनरसूरैर्याज्ञे कर्मण्यपभाषितम् ततस्ते पराभूताः।**

**व्याख्या** – अथवेति। ज्ञाने धर्मः इति पक्षे अस्य प्राप्तिपरि।

शब्दज्ञाने धर्म इति पक्षं स्वीकर्तुं शक्यते। तदानीं 'ज्ञाने धर्मः इति चेत्तथाऽधर्मः इति दूषणमत्र न। अशिष्टानाम् अप्रतिषेधः न दोषाय, नाभ्युदयाय च भवति। यथा हिक्कितं (अव्यक्ततया शब्दजातं) इसितं, कण्डूयितं (कण्डूयनकर्म) दोषाय वा अभ्युदयाय न भवति।

अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः

अपशब्दज्ञानं शब्दज्ञाने साहाय्यकमेव। यः अपशब्दान् जानाति सः अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः। साधुशब्दानपि। ज्ञाने धर्मः इत्यस्यापशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः।

कूपखानकः यदा खनति तदा मृदा रेणुभिश्च शरीरं मलिनयति। यदा कूपखननेन जलं संजायते तदा तेन जलेन शरीरशुद्धिः जायते। एवम् अपशब्दज्ञानेन साधुशब्दज्ञानोत्पत्तिः। अभ्युदयप्राप्तिश्च।

यदि प्रयोगे नियमः इत्युक्तेऽपि न दोषः। यज्ञसम्बन्धि कार्ये प्रयोगे नियमः अन्यत्र अनियमः यथा 'यद्वा न तद्वा न' इति प्रयोक्तव्ये यर्वाणस्तर्वाणं इति प्रयुज्य पराबभूवुः । अर्थात् अनिष्टावस्थां प्रापुः। अतः शास्त्रपूर्वके प्रयोगे अभ्युदयः।

'शब्दस्य ज्ञाने धर्मः उत प्रयोगे' अस्य प्रश्नस्य संक्षिप्तीकरणं यथा

(क) शब्दस्य ज्ञाने धर्मः। अत्र वर्तमानाः दोषाः

(१) ज्ञाने धर्म इति चेत्तथाऽधर्मा।

(२) आचारे नियमः।

(ख) प्रयोगे धर्म इति चेद्।

(१) प्रयोगे सर्वलोकस्य।

(२) प्रयत्नानर्थक्यम्।

(ग) सिद्धान्तः।

(१) शास्त्रपूर्वके प्रयोगेऽभ्युदयः तत्तुल्यं वेदशब्देन।

(२) 'ज्ञाने एव धर्मः' इति पक्षमपि स्वीकर्तुं शक्यते।

## Summarised Overview

पतञ्जलिमहर्षिणा विरचितः विश्वप्रसिद्धः ग्रन्थः भवति महाभाष्यम्। लघुत्वात् शब्दोपदेशः कार्यः। प्रतिपदपाठक्रमः अनभ्युपायः भवति। शब्दाः 'सामान्यविशेषवत्' रीत्या प्रतिपत्तव्याः (पठितव्याः) पदार्थः आकृतिः द्रव्यं च भवति। संग्रहे सिद्धशब्दः नित्यशब्दस्य स्थाने प्रयुक्तवान् आचार्यः व्याडिः। नित्यशब्दः आभीक्ष्ण्येऽर्थेऽपि वर्तते। शब्दाः अर्थाः तेषां सम्बन्धाः च नित्याः। सिद्धशब्दप्रयोगः मङ्गलार्थकः नित्यपर्यायवाचि च भवति। ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्यनुत्पत्त्यवृद्धव्यय योगि नित्यम्। यस्मिन् तत्त्वं न निहन्यते तत् नित्यम्। ऊष तेर, चक्र, पेच इत्यादयः प्रायेण अप्रयुक्ताः शब्दाः भवन्ति। दीर्घसत्रवत् विरलेनैव अप्रयुक्तशब्दानां प्रयोगः। अप्रयुक्ताः इव प्रतीयमानाः शब्दाः देशान्तरेषु प्रयुज्यन्ते। शब्दस्य प्रयोगविषये प्रादेशिकभेदाः सन्ति। विरलेन वैदिकेष्वपि अप्रयुक्ताः शब्दाः सन्ति। अप्रयुक्तशब्दानाम् अन्वाख्यानं (तिरस्कारः) कार्यम्। लोके कस्यचित् वस्तुनः प्रयोगं दृष्ट्वा शब्दान् प्रयुज्यते। तेषां शब्दानां उत्पादनाय (निवृत्तौ) न कमपि यत्नः करोति। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः। अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. कति प्रकारैः विद्योपयुक्ता भवति?
2. सिद्धशब्दस्य आद्यत्वेन प्रयोगः किमर्थः?
3. शब्दानां प्रतिपत्तौ कः प्रयोगः अनुभ्युपायः?
4. किं पुनराकृतिः पदार्थः आहोस्वित् द्रव्यम्?
5. नित्यम् इति पदस्य लक्षणद्वयं किम्?
6. शब्दस्य प्रयोगे धर्मः इति पक्षे पूर्वपक्षिणा सूचितौ दोषौ कौ?
7. जातिव्यक्तिपक्षयोः आचार्येण कः पक्षःअङ्गिकृतः?
8. भक्ष्यं किमर्थमुपयुज्यते ?
9. शब्दानुशासनं कथं कर्तव्यम्?

**II. टिप्पणीं लिखत**

1. यथा लौकिकवैदेकेषु।

2. अप्रयुक्ते दीर्घसत्रवत्।

3. अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकरः।

4. अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्मः।

5. तैः पुनरसुरैः याज्ञे कर्मण्यपभाषितम् ततस्ते पराभूताः।

6. लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः।

7. अस्त्यप्रयुक्तः इति चेन्नार्थे शब्दप्रयोगात्।

8. सर्वे देशान्तरे।

9. व्याख्यानतो विशेषप्रतिपत्तिः नहि सन्देहादलक्षणम्।

10. दृश्यन्ते हि कृतप्रयत्नाः प्रवीणाः, अकृतप्रयत्नाश्च प्रवीणाः।

**III. निबन्धात्मकः प्रश्नः**

10. शब्दस्य ज्ञाने धर्मः उत प्रयोगे – विशदयत।

11. किं. पुनः नित्यः शब्दः अहोस्वित् कार्यः?

12. अप्रयुक्तशब्दानम् अन्वाख्यानं विशदयत।

## Suggested Readings


1. महामुनिपतञ्जलिविरचितं महाभाष्यम् पस्पशाह्निकम्, व्याख्यानं, रमण् कुमार् शर्मा, ईस्टन् लिंकर्स दिल्ली।

2. Prof. O.Valsala, Vyakarana Mahabhasya with Malayalam Commentary Punarnava, Chinmaya International foundation, Shodhsantham, Keralam.


## References


1. प्र.कृष्णकुमारः, महाभाष्यदीपिका (नवाह्निकान्तः) प्रथमो भागः चिन्मया इन्टर्नाषणल् फौण्टेषन्, केरलम्, 2014.

2. पतञ्जलिः, महाभाष्यम्।
3. Prof. G. Sahadevan, Notes on Mahabhashya, Institute of Distance Education, Kerala University, Thiruvananthapuram, Page 24-64, 2014.

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# व्याकरणपदार्थविचारः

## Learning Outcomes

- व्याकरणशास्त्रस्य प्राधान्यमवगच्छति।
- पदसाधुत्वनिर्णये व्याकरणस्य स्वाधीनतां जानाति।
- महाभाष्यस्य शैलीमवगच्छति।
- व्याकरणम् इति पदस्य विशेषतां गृह्णाति।

## Background

पतञ्जलिः स्वग्रन्थे महाभाष्ये प्रथमे आह्निके लौकिकानां वैदिकानां च शब्दानामुदाहरणानि प्रदर्श्य शब्दानुशासनस्य प्रयोजनानि सूचितानि। शब्दानां प्रतिपत्तौ प्रतिपदपाठः अनभ्युपायः इति निर्दिश्य पदार्थः एकस्मिन्नेव समये आकृतिः द्रव्यं च भवति इति सूचयति। लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते इति संसूच्य शब्दस्य नित्यत्वं स्थापयति। अप्रयुक्तशब्दानां तिरस्कारः कार्यः इति सूचयन् अयं दार्शनिकः शब्दज्ञाने धर्मः उत प्रयोग इति विषयं सविस्तरं प्रतिपादयति। शास्त्रपूर्वके प्रयोगेऽभ्युदयः तत्तुल्यं वेदशब्देन इति सिद्धान्तमङ्गीकरोति। अपि च 'ज्ञाने धर्मः' इति पक्षमपि युज्यते इति वदति।

अनन्तरं व्याकरणमित्यस्य कः पदार्थः इति कार्यं विशदयति। आचार्येण अत्र सूत्रं, शब्दः, लक्ष्यलक्षणे व्याकरणमिति पक्षत्रयमवतारितम्। अन्ते सूत्रमेव व्याकरणमिति तथा लक्ष्यलक्षणे व्याकरणमिति समर्थयति। तदत्र अवलोकयामः।

## Keywords

सूत्रम् - षष्ठ्यर्थोऽनुपपन्नः - शब्दे लुडर्थः - भावे च तद्धितः – कृत्यल्युटो बहुलम् – लक्ष्यलक्षणे व्याकरणम् – पूर्वे पाञ्चालाः – वाक्याध्याहारः।

## Discussion

(व्याकरणपदार्थनिरुपणाक्षेपभाष्यम्)

**पाठभागः**

**अथ व्याकरणमित्यस्य कः पदार्थः?**

**सूत्रम्।**

सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः

**सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः।**

**सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते – व्याकरणस्य सूत्रम् इति।**

**किं हि तदन्यत् सूत्राद् व्याकरणम्, यस्यादः सूत्रं स्यात्।**

**शब्दाप्रतिपत्तिः।**

**शब्दानां चाप्रतिपत्तिः प्राप्नोति – 'व्याकरणाच्छब्दान् प्रतिपद्यामहे' इति। न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते।**

**किं तर्हि?**

**व्याख्यानतश्च।**

**व्याख्या-** अथेति। व्याकरणमित्यस्य कः पदार्थः इति प्रश्नः।

सूत्रम् इत्युत्तरम्। सूत्रं व्याकरणं इत्युच्यते चेद् व्याकरणस्य सूत्रम् इति। षष्ठ्यर्थः न युज्यते इत्याशयः।

यदि व्याकरणपदस्य वाच्यार्थः सूत्रं भवति चेत् व्याकरणस्य सूत्रम् इति प्रयोगे षष्ठीविभक्तेरर्थः नोपपद्यते इति वाच्यम्। किञ्च सूत्राद् भिन्नं भवति व्याकरणम् इत्यप्यायाति। अपि च शब्दाप्रतिपत्तिः जायते। व्याख्यान- रहितसूत्रमात्रश्रवणाद् शब्दाः न प्रतीयन्ते। किन्तु सूत्रेण व्याख्यानेन च इत्यर्थः। तदुच्यते व्याख्यानतः इति। व्याख्यानेन शब्दप्रतीतिः जायते।

(व्याख्यानसम्बन्धि आक्षेपबाधकभाष्यम्।)

**पाठभागः**

**ननु तदेव विगृहीतं व्याख्यानं भवति।**

**न केवलानि चर्चा पदानि व्याख्यानाम् – 'वृद्धिः आत्, ऐच्' इति।**

**किं तर्हि?**

**उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्येतत्समुदितं व्याख्यानं भवति**

शब्दे ल्युडर्थः

**एवं तर्हि शब्दः।**

**शब्दे ल्युडर्थः।**

**यदि शब्दे व्याकरणं ल्युडर्थो नोपपद्यते - व्याक्रियन्ते शब्दा अनेनेति व्याकरणम्। नहि शब्देन किञ्चित् व्याक्रियते।**

**केन तर्हि?**

**सूत्रेण।**

**व्याख्या-** नन्वति। पूर्वपक्षस्य संशयः अयम्।

सूत्रपदानां विग्रहादिना (लब्धेन) सूत्रव्याख्यानेन शब्दज्ञानम् उत्पद्यते इति पूर्वपक्षी। 'वृद्धिः, आत्, ऐच्' इति पदच्छेदमात्रेण व्याख्यानं न भवति। व्याख्याने उदाहरणं, प्रत्युदाहरणं पूर्वसूत्रादनुवर्तनादिकार्यं सर्वमन्तर्भवति।

व्याकरणं नाम शब्दः इत्युच्यते चेद् 'शब्दे ल्युडर्थः' नोपपद्यते इति दोषः स्यादिति पूर्वपक्षः अवतरति। ल्युट्प्रत्ययस्यार्थः न सिद्ध्यतीति आशङ्का। व्याकरणम् इति रूपसिद्ध्यर्थं करणार्थे ल्युट् प्रत्ययः आवश्यकः। व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम्। तच्च व्याकरणं शब्दभिन्नं चेत् व्याकरणशब्दयोः समानार्थकत्वं भवेत्। यथार्थतः शब्दतः कस्यपि व्याकृतिः न किन्तु शब्दस्यैव व्याकृतिः संभवति। एवं- चेत् केन व्याकृतिः जायते इत्युच्यते चेत् सूत्रेण इति।

(आक्षेपान्तरवर्तिकमवतरति।)

**पाठभागः**

**भवे च तद्धितः।**

सूत्रेण व्याकृतिः चेत् तद्धितप्रत्ययः न स्यादिति आशङ्का

**भवे च तद्धितो नोपपद्यते – 'व्याकरणे भवो योगो वैयाकरणः' इति। नहि शब्दे भवो योगः।**

**क्व तर्हि?**

**सूत्रे।**

**प्रोक्तादयश्च तद्धिताः।**

**प्रोक्तादयश्च तद्धिता नोपपद्यन्ते। पाणिनिना प्रोक्तं पाणिनीयम्। आपिशलं काशकृत्स्नमिति। नहि पाणिनिना शब्दाः प्रोक्ताः।**

**किं तर्हि?**

**सूत्रम्।**

**व्याख्या -** भव इति। सूत्रेण व्याकृतिः जायते चेत् 'भवे च तद्धितः' इति आक्षेपः जायते। भवार्थे (तत्र भवः) तद्धितप्रत्ययः नोपपद्यते। यथा वैयाकरणः इति रूपं नोपपद्यते। व्याकरणे भवः, व्याकरणे योगः वैयाकरणः।

सूत्रे व्याकरणमित्युच्यते चेत् 'प्रोक्तादयश्च तद्धिताः' इति आक्षेपः जायते। पाणिनिना प्रोक्तं पाणिनीयम् इत्यत्र 'तेन प्रोक्तम्' इति सूत्रेण विधीयमानः छप्रत्ययः न उपपद्यते। एवम् 'आपिशलम्' 'काशकृत्स्नम्' इत्यादयः च पाणिनिना शब्दा न प्रोक्ताः, किन्तु सूत्रमेव प्रोक्तम्।

(पूर्वपक्षिणः आक्षेपभाष्यमवतरति।)

**पाठभागः**

**किमर्थमिदमुभयमुच्यते- 'भवे प्रोक्तादयश्च तद्धिताः' इति। न 'प्रोक्तादयश्च तद्धिता' इत्येव भवेऽपि तद्धितश्चोदितः स्यात्।**

**पुरस्तादिदमाचार्येण दृष्टम् 'भवे च तद्धितः इति, तत्पठितम्। तत् उत्तरकालमिदं दृष्टम् 'प्रोक्तादयश्च तद्धिताः' इति, तदपि पठितम्। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति। अयं तावददोषः। यदुच्यते 'शब्दे लुडर्थे' इति। नावश्यं करणाधिकरणयोः एव ल्युड्विधीयते।**

प्रोक्तादयश्च तद्धिताः

**किं तर्हि?**

**अन्येष्वपि कारकेषु- 'कृत्यल्युटो बहुलम्' इति। तद्यथा – प्रस्कन्दनं प्रपतनमिति।**

**अथवा शब्दैरपि शब्दाः व्याक्रियन्ते। तद्यथा – 'गौरित्युक्ते सर्वे सन्देहाः निवर्तन्ते, नाश्वो न गर्दभः इति।**

**अयं तर्हि दोषः – 'भवे प्रोक्तादयश्च तद्धिताः' इति**

**व्याख्या** – किमिति।

पूर्वमाचार्यः यदपश्यत् तद पठितवान्। पुनः द्वितीयमपश्यत्। तदा तद् पठितम्। पुनः पुनरपि दृश्यते चेत् तद् सूचयिष्यति।

यदि शब्दः व्याकरणम् इत्युच्यते चेदपि, तत्र न दोषः। 'करणाधिकरणयोश्च' इत्येव ल्युट् विधीयते इति नियमो नास्ति। 'कृत्यल्युटो बहुलम्' इति सूत्रेण ल्युट् प्रत्ययस्य कर्मार्थे विधीयमानत्वात्। व्याक्रियते यत् तत्व्याकरणं शब्दः इत्यर्थः । एवं प्रस्कन्दनं (प्रस्कन्दते अस्मात्), प्रपतनं (प्रपतति अस्मात्) इत्यादि रूपाणि।

शब्दै शब्दाः व्याक्रियन्ते। यथा गौः इत्युक्ते न अश्वः न गर्दभः इति सर्वे सन्देहः निवर्तन्ते।

(सिद्धान्तवार्तिकमवतरति।)

**पाठभागः**

**एवं तर्हि –**

**'लक्ष्यलक्षणे व्याकरणम्'।**

**लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति।**

**किं पुनर्लक्ष्यम्, किं वा लक्षणम्?**

समुदाये व्याकरणशब्दः प्रवृत्तेऽवयवेषु वर्तते

**शब्दो लक्ष्यः, सूत्रं लक्षणम्।**

**एवमप्ययं दोषः समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते। सूत्राणि चाधीयान इष्यते- वैयाकरण इति।**

**नैष दोषः। समुदायेषु हि शब्दाः प्रवृत्ता अवयेवष्वपि वर्तन्ते। तद्यथा पूर्वे पाञ्चालाः उत्तरे पाञ्चालाः, तैलं भुक्तं, घृतं भुक्तं, शुक्लो नीलः कपिलः कृष्ण इति। एवमयं समुदाये व्याकरणशब्दः प्रकृत्तेऽवयवेष्वपि वर्तते।**

**व्याख्या** – एवमिति। किं पुनः व्याकरण् इत्युक्त्वे 'लक्ष्यलक्षणे व्याकरणम्' इति तस्य समाधानम्। शब्दो लक्ष्यम्। सूत्रं लक्षणम्।

'लक्ष्यलक्ष्यणे व्याकरणम्' इत्युच्यते चेद् समुदाये प्रवृत्तः व्याकरणशब्दः अवयवेषु नोपपद्यते।

अयं न दोषः। समुदाये प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्ते। यथा पूर्वे पाञ्चालाः, उत्तरे पाञ्चालाः इत्यादौ पाञ्चालदेशस्य पूर्वभागः पाञ्चलदेशस्य उत्तरभागः। तैलं भुक्तं, घृतं भुक्तम् इत्यादि व्यवहारः तैल घृतादीनां ओषधिभोजनादिषु अधिकतया विद्यमानत्वात्।

(सूत्रपक्षसमर्थनम्)

**पाठभागः**

**अथवा पुनरस्तु सूत्रम्।**

**ननु चोक्तम् – सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः इति? नैष दोषः व्यवदेशिवद्भावेन भविष्यति।**

**यदप्युच्यते 'शब्दाप्रतिपत्तिः' इति। नहि सूत्रत एव शब्दान् प्रतिपद्यन्ते।**

लक्ष्यलक्षणे व्याकरणम्

**किं तर्हि?**

**व्याख्यानतश्चेति।**

**परिहृतमेतत्- तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति।**

**ननु चोक्तम्- 'न केवलानि चर्चापदानि व्याख्यानम् – वृद्धिः आत् ऐजिति।**

**किं तर्हि?**

**उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्येतत्समुदितं व्याख्यानं भवति इति।**

**अविजानत एतदेवं भवति। सूत्रत एव शब्दान् प्रतिपद्यन्ते। आतश्च सूत्रत एव। यो ह्युत्सूत्रं कथयेन्नादो गृह्येत।**

**व्याख्या-** अथवेति। व्याकरणं सूत्रमिति उच्यते चेद् तदपि साधु भवति। तदानीं 'षष्ठ्यर्थोऽनुपपन्नः इति दोषः न। व्यपदेशिवद्भावेन दोषः दूरीकर्तुं शक्यते।

सूत्रं व्याकरणमित्युच्यते चेद् 'शब्दाप्रतिपत्तिः' स्यात् इत्याशङ्का नोचिता। व्याख्यानेन परिहर्तुं शक्यते। 'वृद्धिरादैच्' इति सूत्रे 'आत् ऐच्' इत्येवं रूपेण पदविच्छेदनं व्याख्यानं न भवति। उदाहरणं, प्रत्युदाहरणं, वाक्याध्याहारः(अनुवृत्तिः) एतत् सर्वं मिलित्वा एव व्याख्यानमुद्दिष्टम्। पण्डितः सूत्रतः एव शब्दज्ञानं सम्पादयति। सूत्रातिक्रमणे, अशुद्धरीत्या सूत्रकल्पनं वा तादृशः जनः न स्वीकरोति। तादृशान् शब्दान् नादरूपेण गणयति। तेनार्थवबोधः न जायते। अतः व्याकरणम् इत्यस्य वाच्यार्थः सूत्रमेव।

## Summarised Overview

व्याकरणमित्यस्य कः पदार्थः इति प्रश्ने महाभाष्यकारः पतञ्जलिः विविधान् मतान् आलोच्य सूत्रमेव व्याकरणमिति समर्थमति। लोके सूत्रेषु प्रयोगेषु च व्याकरणशब्दप्रयोगः दृश्यते। महाभाष्ये पक्षत्रयं सिद्धान्तितम्।

(क) सूत्रम् । सूत्रं व्याकरणमिति उच्यते चेद् ' व्याकरणस्य सूत्रम्' इत्यत्र षष्ठ्यर्थोऽनुपपन्नः। केवलसूत्रात् शब्दानां प्रतिपत्तिः न भवतीति 'व्याकरणशब्दान् प्रतिपद्यामहे' इति व्यवहारविरोधः दृश्यते। उदाहरणादिविशिष्टस्यैव व्याख्यानतया सन्धिविच्छेदमात्रे व्याख्यानसम्भवे सूत्रमात्रात् शब्दप्रतिपत्तिः।

(ख) शब्दः - यदि शब्दः व्याकरणमिति स्वीक्रियते तदा 'षष्ठ्यर्थोऽनुपपन्नः' इति दोषः परिहर्तुं शक्यते। तथापि 'शब्दाप्रतिपत्तिः' इति दोषः स्थिर एव। व्याक्रियन्ते शब्दाः अनेन इति करणार्थे ल्युट्प्रत्ययस्यानुपपत्तिः।

शब्देन कस्यापि अव्याकृतत्वात्। अपि च सूत्रेणैव किञ्चित् व्याक्रियते। अपि च 'भवे च तद्धित इति' आक्षेपमप्यस्ति। 'भवे च तद्धितो नोपपद्यते। व्याकरणे भवो योगो वैयाकरण इति। नहि शब्दे भवो

योगः 'प्रोक्तादयश्च तद्धिताः' इत्ययं दोषोऽपि स्यात्। किन्तु 'कृत्यल्युटो बहुलम्' इति सूत्रेण कर्मार्थे ल्युट् विधीयते। तथा व्याक्रियते यत् तत् व्याकरणं शब्दः।

लक्ष्यलक्षणे व्याकरणम्। लक्ष्यलक्षणे व्याकरणम् इति मतम्। लक्ष्यं शब्दः। लक्षणं सूत्रम्। समुदाये प्रवृत्तशब्दानाम् अवयवेऽपि प्रयोगदर्शनात् केवले सूत्रे शब्दे वा व्याकरणपदप्रयोगसम्भवः। यथार्थतः सूत्रमेव व्याकरणपदार्थः। 'राहोः शिरः इति वद् व्यवदेशिवद्भावेन षष्ठ्यर्थनुपपत्तिं परिहर्तुं शक्यते। अल्पज्ञानामेव शब्दाप्रतिपत्तिरूपदोषदर्शनम्। विदुषस्तु सूत्रमात्रेणैव शब्दप्रतिपत्तिः संभवति।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. व्यपदेशिवद्भावेन कस्य व्याकरणत्वं लभते ?
2. किं नाम व्याख्यानम् ?
3. सूत्रे व्याकरणे इत्यत्र कस्यार्थस्य अनुपपत्तिं स्यात् इति पूर्वपक्षी ?
4. शब्दो व्याकरणं चेत् कोऽर्थः नोपपद्यते इत पूर्वपक्षी ?
5. व्यपदेशिवद्भावस्य एकमुदाहरणं किम् ?

**II. टिप्पणीं लिखत-**

1. सूत्रे व्याकरणे षष्ठ्यर्थे ऽनुपपन्नः।
2. पूर्वे पाञ्चालाः उत्तरे पाञ्चालाः तैलं भुक्तम् इत्यादीनामाशयः।
3. शब्दाप्रतिपत्तिः।
4. लक्ष्यलक्षणे व्याकरणम् इत्यस्यार्थः।

**III. निबन्धात्मकः प्रश्नः -**

1. व्याकरणमित्यत्र कः पदार्थः?

## Suggested Readings

1. महामुनिपतञ्जलिविरचितं महाभाष्यम् पस्पशाह्निकम्, व्यारव्यानं, रमण् कुमार् शर्मा, ईस्टन् लिंकर्स दिल्ली ।
2. Prof. O.Valsala, Vyakarana Mahabhasya with Malayalam Commentary Punarnava, Chinmaya International foundation, Shodhsantham, Keralam.

## References

1. पतञ्जलिः महाभाष्यम्, पस्पशाह्निकः ।
2. पतञ्जलिः व्याकरण महाभाष्यम् (प्रदीपोद्योतसाहितम् प्रथमखण्डः चौखम्बा संस्कृत संस्थान्, दिल्ली, 1992.
3. Prof. G. Sahadevan, Notes on Mahabhashya, Institute of Distance Education, Kerala University, Thiruvananthapuram, 2004, page 50-64.

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# वाक्यपदीयम् - 1

## BLOCK - 3

SGOU

UNIT 1

# शब्दब्रह्मस्वरूपम्

## Learning Outcomes

- वैयाकरणं भर्तृहरिं प्रत्यभिजानाति।
- वाक्यपदीयस्य प्राधान्यं गृह्णाति।
- स्फोटवादस्य सविशेषताम् अवगच्छति।
- शब्दब्रह्मस्वरूपं जानाति।

## Background

अनेके वैयाकरणाः भारतेषु सन्त्यपि श्रेष्ठयोः पतञ्जलिभर्तृहर्योः नामनी नितरां विराजेते। एकस्मिन्नेव लालित्यं गाम्भीर्यं च युगपत् महाभाष्ये द्रष्टुं शक्यते। तद्वत् अगाधं गाम्भीर्ययुक्तमाशयं ललितैः पदैः भर्तृहरिः स्वग्रन्थे वाक्यपदीये विशदयति। शब्दतत्वस्वरूपं स्फोटसिद्धान्तस्य बीजावापः वेदेषु द्रष्टुं शक्यते। किन्तु अस्य बीजस्य वृक्षरूपेण वृद्धिः स्फोटब्रह्मरूपेण प्रोन्नतिः भर्तृहरेः वाक्यपदीयरचनया संजाता एव।

वेदमन्त्रेषु शब्दस्य प्रतीकरूपेण वृषभकल्पना दृश्यते। 'वृषभो वर्षणात्' 'चत्वारि श्रृङ्गाः त्रयोऽस्य पादाः द्वे शीर्षे सप्तहस्तासोऽस्य' 'त्रिधा बद्धः वृषभो रोरवीति' इत्यादिषु ऋषभं शब्दत्वेन कल्पयति महाभाष्यकारः पतञ्जलिः। पाणिनिः स्वग्रन्थे अष्टाध्याय्यां स्फोटायनाचार्यसम्बन्धिसूत्रं रचितवान् 'अवङ्स्फोटानस्य' इति। स्फोटसिद्धान्तस्य वक्ता भवत्ययमाचार्यः इति हरदत्तः

काशिकाव्याख्याने 'पदमञ्जर्याम्' सूचयति। पाणिनेः समकालिके व्याडिना रचिते ग्रन्थे संग्रहेऽपि 'शब्दः नित्यो वा कार्यो वेति' सूचनाऽस्तीति महाभाष्यकारः पतञ्जलिः। शब्दस्य नित्यत्वं स्फोटवादानुसृतमेव। एवं सूचनाः पौराणिककाले सन्त्यपि शब्दतत्वं अक्षरमेव, तद् अर्थभावेन विवृत्य जगतः उत्पत्तेः कारणमिति समर्थयति भर्तृहरिः।

अस्मिन्नेकके शब्दब्रह्मस्वरूपं विशदीकुर्वन्तः चत्वारः श्लोकाः सन्ति। तेषां श्लोकानां पठनमस्माभिः कार्यम्।

## Keywords

शब्दतत्त्वम् - - विवर्तते - जगतः - आम्नातं - शक्तिव्यपाश्रयात् - शक्तिभ्यः - कालशक्तिं - विकाराः - योनयः - सर्वबीजस्य - भोक्तृभोक्तव्यरूपेण - भोगरूपेण।

## Discussion

भर्तृहरिः न केवलं व्याकरणशास्त्रे किन्तु मीमांसायां धर्मशास्त्रे वेदान्ते च नितरां निष्णातः आसीत्। तेनानेके ग्रन्थाः विरचिताः। महाभाष्यदीपिका, जैमिनीयमीमांसावृत्तिः, वेदान्तसूत्रवृत्तिः, शब्दधातुवृत्तिः, भट्टिकाव्यं,भागवृत्तिः इत्यादयः तेषु अन्तर्भवन्ति। तेषु वाक्यपदीयमेव श्रेष्ठः ग्रन्थः।

'शब्दतत्वमेव ब्रह्म' इति सिद्धान्तं स्वग्रन्थे वाक्यपदीये सोऽयं महाभागः प्रतिपादयति। शब्दब्रह्मस्वरूपमवतारयन् कविः मङ्गलाचरणमपि प्रथमेन श्लोकेन करोति।

**श्लोकः 1**

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ १ ॥**

**पदच्छेदः -** यदक्षरम् - यत् + अक्षरम्।
विवर्ततेऽर्थभावेन - विवर्तते + अर्थभावेन।
जगतो यतः - जगतः+ यतः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यत् अक्षरम् | यत् नाशरहितं (क्षयरहितं) |
| अर्थभावेन विवर्तते | चराचरात्मकस्वरूपेण भासते |
| यतः जगतः प्रक्रिया (भवति) | यस्मात् भुवनस्य व्यवहारः संभवति |
| तत् शब्दतत्वं | सः शब्दस्वरूपः |
| अनादिनिधनं ब्रह्म (भवति) | उत्पत्तिविनाशरहितम् ब्रह्म भवति। |

अक्षरं ब्रह्मा

**सारः**

यत् नाशरहितमक्षरं चराचरात्मकस्वरूपेण परिवर्तते, यस्मात् सर्वव्यवहारः जायते तत् शब्दतत्त्वं उत्पत्तिविनाशरहितं ब्रह्म भवति।

उत्पत्तिविनाशरहितं सर्वव्यापृतं शब्दत्तत्वं ब्रह्म एव। अक्षरमेव सर्वव्यापकस्य हेतुः। तत् अक्षरं विविधपदार्थरूपेण विवर्त्य अवतिष्ठते।

सद्वस्तु असद्रूपेण अन्यवस्तुनः जनयति चेत् स एव विवर्तः। यथा रज्जुसर्पे रज्जोः विवर्तमेव सर्पः। अत्र सद्वस्तु रज्जुः। प्रकाशाभावे रज्जुः सर्परूपेण विवर्तते।

शब्दानां चत्वारो भेदाः। परा, पश्यन्ती, मध्यमा, वैखरी चेति। अस्मिन् दर्शने शब्दः इत्यनेन परारूपं शब्दमेव विवक्षितः। अयं शब्दरूपः तु 'परा वाङ्मूलचक्रस्था' भवति। अयं शब्दः योगिनामप्यवगमः भवति।

वेदान्ते वर्तमानं ब्रह्म एव व्याकरणदर्शने शब्दतत्त्वम्। सर्वे पदार्थाः शब्दनिबद्धाः इत्यतः शब्दः सर्वेषां पदार्थानां प्रकृतिरेव। अपि च

'शब्देष्वविवक्षिताः शक्तिः विश्वस्यास्य निबन्धनी' इत्युक्तञ्च । 'प्रपञ्चः शब्दस्य परिणामोऽयम्'। 'वागेव विश्वा भुवनानि जज्ञे' इति श्रुतिरप्यस्ति।

**श्लोकः 2**

**एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।**
**अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते॥ २ ॥**

**पदच्छेदः** - यदाम्नातं - यद् + आम्नातं।
अपृथक्त्वेऽपि - अपृथक्त्वे+अपि।
पृथक्त्वेनेव - पृथक्त्वेन + इव।

एकमेव शब्दब्रह्मं पृथक्त्वेनेव वर्तते

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यत् एकमेव | यत् शब्दब्रह्म एकमिति |
| (मुनिभिः) आम्नातं | महर्षिभिः कथितम् |
| शक्तिव्यपाश्रयात् | तत् विविधाभिः शक्तिभिः परस्परबन्धनात् |
| भिन्नं | भिन्नत्वेन प्रतिभाति। |
| अपृथक्त्वेऽपि | अभिन्नत्तवेऽपि सत्यपि |
| शक्तिभ्यः | विविधशक्तिकारणात् |
| पृथक्त्वेन इव वर्त्तते | भिन्नमिति रूपेण वर्तते। |

**सारः**

एकमेव शब्दब्रह्मं विविधाभिः शक्तिभिः उपाश्रितः सन् विविधरूपैः प्रतिभाति। विविधरूपैरापन्नानां तेषां पदार्थानां हेतुरेकः भवति।

'एकमेवाद्वितीयं ब्रह्म' इति श्रुतिः । जलविकाराः भवन्ति आवर्तः,फेनं शीकरादयः। तानि जले अन्तर्भवन्ति। तेषाम् कारणं जलमेव।

हार-कङ्कण-पादसरादयः भिन्नाः सन्त्यपि तत्र वर्तमानं लोहम् (सुवर्णं) एकमेव। एवं प्रपञ्चे वर्तमानानि सर्वाणि वस्तूनि कारणरूपात् शब्दतत्वाज्जातमेव। शब्दतत्वं तन्निष्ठशक्तिः च नित्या एव।

**श्लोकः 3**

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**

**जन्मादयो विकाराः षट् भावभेदस्य योनयः॥ ३ ।।**

**पदच्छेदः -** जन्मादयो विकाराः- जन्मादयः+ विकाराः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यस्य अध्याहितकलां | ब्रह्मणः आरोपितभेदयुक्तां |
| कालशक्तिं | कालनामिकां शक्तिं |
| उपाश्रिताः | समाश्रिताः इति कारणात् |
| जन्मादयः षड्विकाराः | जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, नश्यति इत्येवं रूपाः षड्विकाराः |
| भावभोदस्य योनयः | पदार्थानां क्रमिकभेदस्य कारणानि भवन्ति |

जन्मादयः षड् भावविकाराः

**सारः**

ब्रह्म एव प्रपञ्चरूपेण परिवर्तते। प्रपञ्चरूपेण परिवर्तनाय कालमपि हेतुः भवति। अनुकूले काले जन्मादयः षट् भावविकाराः जायन्ते।

जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, नश्यति इति षड् भावविकाराः। कालः षण्णां भावविकाराणां कारणमेव।

**श्लोकः 4**

**एकस्य सर्वबीजस्य यस्य चेयमनेकधा।**

**भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ।।४।।**

**पदच्छेदः -** चेयमनेकधा - च + इयम् + अनेकधा।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| सर्वबीजस्य यस्य एकस्य | सर्वेषामुत्पत्तौ कारणभूतस्य शब्दतत्त्वस्य |
| इयं स्थितिः | दृश्यप्रपञ्चरूपेण वर्तमाना स्थिति |
| अनेकधा | अनेकरूपेण भवति। |

| | |
|---|---|
| भोक्तृभोक्तव्यरूपेण भोगरूपेण च (वर्तते) | भोक्ता - पुरुषः, भोक्तव्याः विषयाः, भोगः - सुखदुःखाद्यनुभव एवं च वर्तते। |

सर्वबीजः शब्दः एक एव, तत् अनेकरूपेण वर्तते

**सारः**

सर्वेषामुत्पत्तौ कारणभूतं शब्दतत्त्वं अनेकदृश्यप्रपञ्चरूपेण वर्तते। एतच्छब्दतत्वमेव भोक्तृ भोक्तव्य - भोगरूपेण (पुरुष - वस्तु - सुख दुःखाद्यनुभवरूपेण) वर्तते।

एकस्मिन्नेव सस्ये पत्रेषु रूपलावण्यं, पक्के फले मधुररसः, मनोहरे पुष्पे सुगन्धः च वर्तते । सर्वमपि सस्याज्जातमेव । एवम् पदेषु पदार्थेषु च वैरुद्ध्ये सत्यपि शब्दतत्वमेकमेव।

एकमेव शब्दतत्त्वं भोक्ता (भोक्तृरूपेण),भोक्तव्यरूपेन (भोज्यरूपेण), भोगरूपेण (सुखाद्यनुभवरूपेण) विविधप्रतीतिविषयः भवति। एकमेव दर्शन - दृश्य - द्रष्टरूपेण, ज्ञाता-ज्ञेयरूपेण च वर्तते।

## Summarised Overview

वाक्यपदीयकारः भर्तृहरिणा स्वग्रन्थे मङ्गलकारिकाद्वारा अक्षरं ब्रह्म इति प्रतिपादयति। यत् नाशरहितमक्षरं चराचरात्मकस्वरूपेण परिवर्तते, यस्मात् सर्वव्यवहारः जायते तत् शब्दतत्त्वं उत्पत्तिविनाशरहितं ब्रह्म भवति । एकमेव शब्दब्रह्मं विविधाभिः शक्तिभिः उपाश्रितः सन् विविधरूपैः प्रतिभाति । विविधरूपैरापन्नानां तेषां पदार्थानां हेतुरेकः भवति । ब्रह्म एव प्रपञ्चरूपेण परिवर्तते। प्रपञ्चरूपेण परिवर्तनाय कालमपि हेतुः भवति। अनुकूले काले जन्मादयः षट् भावविकाराः जायन्ते। जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, नश्यति इति षड् भावविकाराः। कालः षण्णां भावविकाराणां कारणमेव । सर्वेषामुत्पत्तौ कारणभूतं शब्दतत्त्वं अनेकदृश्यप्रपञ्चरूपेण वर्तते। एतच्छब्दतत्वमेव भोक्तृ भोक्तव्य - भोगरूपेण (पुरुष - वस्तु - सुख दुःखाद्यनुभवरूपेण) वर्तते।

# Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत –**

1. वेदमन्त्रेषु शब्दस्य प्रतीकरूपेण वर्तमाना कल्पना का ?
2. अनादिनिधनं किम् ?
3. शब्दानां चत्वारः भेदाः के ?
4. षट् भावविकाराः के ?

**II. टिप्पणीं लिखत -**

1. भर्तृहरिः
2. एकस्य सर्वबीजस्य केन केन रूपेण स्थितिः ?
3. अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् ।
   विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ कारिका व्याख्यायत ।
4. एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात् ।
   अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते ॥ कारिका व्याख्यायत ।
5. अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
   जन्मादयो विकाराः षट् भावभेदस्य योनयः ।।कारिका व्याख्यायत ।

**III. निबन्धात्मकः प्रश्नः -**

1. शब्दब्रह्मस्वरूपं विशदयत ।

# Suggested Readings


1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ही, 2002

2. Dr.Chandrasekharan Nair, Vakyapadiyam, Brahmakandam, Sunilpriya Malayalam commentary, Jai Karthik Book, 2000

## References


1. भर्तृहरिः, वाक्यपदीयम्।
2. पण्डितरघुनाथशर्मा, वाक्यपदीयम्(ब्रह्मकाण्डम्), व्याख्याद्वयोपेतम्, सम्पूर्णानन्द विश्वविद्यालयः, वाराणसी, 1998


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# शब्दब्रह्मप्राप्तये उपायः

## Learning Outcomes

- वैयाकरणं भर्तृहरिमभिजानाति।
- वाक्यपदीयस्य कारिकाभिः परिचयः।
- शब्दब्रह्मस्वरूपं जानाति।
- शब्दब्रह्मप्राप्तये वर्तमानान् उपायान् गृह्णाति।

## Background

व्याकरणदर्शनस्य महिमातिशयं भर्तृहरिः वाक्यपदीये ललितैः पदैः अगाधं गाम्भीर्ययुक्तमाशयं विशदीकृतवान्। शब्दतत्वस्वरूपस्य स्फोटसिद्धान्तस्य बीजावापः वेदेषु द्रष्टुं शक्यते। तथापि स्फोटसिद्धान्तस्य सविशदं व्याख्यानं वाक्यपदीये दृश्यते। शब्दतत्वमक्षरमेव तद् अर्थभावेन विवृत्य जगतः कारणमेव। अनादिनिधनं ब्रह्म। एकमेव शब्दब्रह्म पृथग्त्वेन वर्तते। विविधाभिः शक्तिभिरुपाश्रितं शब्दब्रह्म विविधरूपैः प्रतिभाति। जन्मादीनां षण्णां भावविकाराणां हेतुः शब्दब्रह्म एव। एकमेव शब्दब्रह्म भोक्ता-भोज्यं-सुखदुःखादि भोगाश्च भवति।

शब्दब्रह्मणः प्राप्त्यर्थं केचनोपायाः सन्ति। अस्मिन्नेकके षट्भिः कारिकाभिः तानुपायान् विशदयति। तदत्र पश्यामः।

## Keywords

प्राप्त्युपायोऽनुकरश्च - यतशक्तित्व - दृष्टादृष्टप्रयोजनाः - अर्थवादरूपाणि - द्वैतिनां - सत्या विशुद्धिः - एकपदागमा - अङ्गोपाङ्गनिबन्धनाः।

## Discussion

**श्लोकः 5**

**प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।**
**एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक् ।।५।।**

**पदच्छेदः -** प्राप्त्युपायोऽनुकरश्च - प्राप्त्युपायः + अनुकरः + च।
वेदो महर्षिभिः - वेदः + महर्षिभिः।
एकोऽप्यनेकवर्त्मेव - एकः + अपि + अनेकवत्मा + इव।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तस्य प्राप्त्युपायः | शब्दतत्त्वस्य प्राप्त्यर्थं यः मार्गः |
| अनुकारः च वेदः भवति | प्रतिमा(मनोमयीरूपा) वेदः भवति। |
| एकोऽपि | सः वेदः एकः सन्नपि |
| अनेकवर्त्मा इव | अनेकशाखा इव |
| पृथक् पृथक् महर्षिभिः समाम्नातः | नानारूपेण(ऋषिभिः) उक्तः वर्तते। |

शब्दब्रह्मणः प्राप्तुपायः वेद इति आह

**सारः**

शब्दब्रह्मणः प्राप्त्यर्थं वर्तमानः मार्गः मनोमयीरूपा प्रतिमा च वेदः एव। सः वेदः एकः सन्नपि अनेकशाखायुक्तः इव पृथक् पृथक् ऋषिभिः उक्तः।

अनुकारः - प्रतिमा। शब्दात्मकस्य ज्ञानरूपस्य स्वरूपः भवति मनोमयी (प्रतिमा)।

वेदः ज्ञानाकारः। ज्ञानं शब्दतत्वम्। वेदः एकः सन्नपि ऋग्वेद-यजुर्वेद-सामवेदादिरूपैः महर्षिभिः बहुविधैरुक्ताः भवन्ति।

**श्लोकः 6**

**भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।**
**शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते।।६।।**

**पदच्छेदः** - कर्मण्येकत्र - कर्मणि + एकत्र।
चाङ्गता - च + अङ्गता।

वेदस्य नानात्वे अवान्तरभेदे सन्त्यपि वेदस्यैकत्वम्

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तस्य भेदानां | ऋग्वेदादिवेदस्य शाखानां |
| बहुमार्गत्वं | अवान्तरभेदाः सन्ति |
| एकत्र कर्मणि अङ्गता च | एकस्मिन् यागकर्मणि एककर्मबोधकत्वं च वर्तते |
| तस्य शाखासु | तस्य वेदस्य शाखासु |
| शब्दानां यतशक्तित्वं | कर्मविधायकवाक्यानां निश्चितकार्यजननसामर्थ्यं |
| दृश्यते | वर्तते |

**सारः**

ऋग्वेदादीनां बहवः अवान्तरभेदाः सन्त्यपि यागानुष्ठानेषु वेदमन्त्राणां निश्चितं सामर्थ्यं (फलप्राप्त्यनुकूलं सामर्थ्यं) वर्तते। यागादिकार्येषु फलोत्पादने च आन्तरिकः भेदः न। वेदस्य घटनानां स्वरे च भेदे सत्यपि लक्ष्ये भेदः न। मन्त्राणामदृष्टप्रतिपादिका शक्तिः समाना।

**श्लोकः 7 -**

> **स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।**
>
> **तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः॥ ७॥**

**पदच्छेदः -** स्मृतयो बहुरूपाश्च - स्मृतयः+ बहुरूपाः+ च।
तमेवाश्रित्य - तम् + एव + आश्रित्य।
लिङ्गेभ्यो वेदविद्भिः -लिङ्गेभ्यः+ वेदविद्भिः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| वेदविद्भिः तमेवाश्रित्य | वेदज्ञैः वेदमेव आधारीकृत्य |
| लिङ्गेभ्यः | तत्कार्यानुशासनेभ्यः मन्त्रेभ्यः |
| दृष्टादृष्टप्रयोजनाः | प्रत्यक्षात्प्रत्यक्षप्रयोजनप्रदाः |
| बहुरूपाः स्मृतयः | अनेकानि स्मृतिवचनानि |
| प्रकल्पिताः (भवन्ति) | कल्पिताः भवन्ति। |

स्मृतीनां वेदमूलकत्वात् प्रामाण्यं वर्तते

**सारः**

वेदज्ञाः स्मृतिवचनानां वेदमूलकत्वात् प्रत्यक्षात्प्रत्यक्षप्रयोजनवत्वाच्च वेदप्रामाण्यं कल्पयन्ति।

वेदानां स्वतः प्रामाण्यं वर्तते। स्मृतीनां वेदानुसृतत्वात् तासामपि वेदप्रामाण्यं वेदज्ञाः कल्पयन्ति। वेदविहितकार्याणि स्मृतिसु विशदयति।

प्रयोजनानि द्विविधानि-दृष्टप्रयोजनानि अदृष्टप्रयोजनानि च। नीतिशास्त्र-अर्थशास्त्रादयः दृष्टप्रयोजनवन्तः। गम्यागम्य-भक्ष्यनियमाः अदृष्टप्रयोजनप्रदाः भवन्ति।

वक्तुः श्रोतुश्चेच्छानुसारं विविधान् सिद्धान्तान् अवलम्बन्ते

**श्लोकः 8-**

> **तस्यार्थवादरूपाणि निश्रित्यः स्वविकल्पजाः।**
>
> **एकत्विनां द्वैतिनां च प्रवादा बहुधा मताः॥ ८।।**

**पदच्छेदः -** तस्यार्थवादरूपाणि - तस्य + अर्थवादरूपाणि।
प्रवादा बहुधा -प्रवादाः+ बहुधा।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तस्य अर्थवादरूपाणि | वेदस्य मन्त्रावलम्बनानि कथनानि (वेदस्य अर्थवादा - नर्थवादरूपाणि) |
| स्वविकल्पजाः | प्रयोक्तुः श्रोतुश्च बुद्ध्यनुसारं |
| निश्चित्य | आश्रित्य |
| एकत्विनां द्वैतिनां च | अद्वैतवादिनां द्वैतवादिनां च |
| बहुधा प्रवादाः | अनेकधा दर्शनभेदाः |
| मताः (सन्ति) | स्वीकृताः भवन्ति |

**सारः**

वेदस्य मन्त्राणामाधारे अनेकाः कथाः प्रयोक्तुः श्रोतुः च बुद्ध्यनुसारं रचिताः सन्ति। ब्रह्मविषये अद्वैतिनां द्वैतिनां च प्रवादाः भिन्नाः भवन्ति।

**श्लोकः-9**

**सत्या विशुद्धिस्तत्रोक्ता विद्यैवैकपदागमा।**
**युक्ता प्रणवरूपेण सर्ववादाविरोधिनी ।।९।।**

**पदच्छेदः-** विशुद्धिस्तत्रोक्ता – विशुद्धिः + तत्र + उक्ता।
विद्यैवैकपदागमा- विद्या + एव + एकपदागमा।

प्रणवरूपेण वर्तमानं व्याकरणदर्शनमेव सत्या विशुद्धिः

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तत्र | विविध दर्शनेषु |
| प्रणवरूपेण युक्ता | ॐ (ओम्) इति प्रणवरूपेण सहिता |
| सर्ववादाविरोधिनी | सर्वैः दर्शनैरङ्गीकृता |
| विद्या एव सत्या | शब्दब्रह्मरूपा विद्या एव यथार्थरूपा |
| विशुद्धिः इव उक्ता | विशिष्टा शुद्धिः इति बुधैरुक्ता |

**सारः -** विविधैः दर्शनैः अङ्गीकृतं भवति ओंकाररूपं प्रणवम्। सर्वाणि दर्शनानि शब्दब्रह्मरूपां व्याकरणविद्यामङ्गीकुर्वन्ति। सत्यप्रकाशकः नादरूपः प्रणवमन्त्रः व्याकरणदर्शनमिति बुधाः वदन्ति।

व्याकरणेन प्रकृतिप्रत्ययविभागेन साध्वसाधुशब्दचयनं तस्य बाह्यरूपमेव। व्याकरणदर्शनस्य आन्तरिकं लक्ष्यं भवति यत् शब्दब्रह्मसाक्षात्कारप्रदानम्। शब्दरूपया वैखर्या मध्यमां, मध्यमया पश्यन्तीं,पश्यन्त्या परायां प्राप्तुं व्याकरणदर्शनमेव साहाय्यकम्।

**श्लोकः 10-**

**विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः।**

**विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः॥ १०।।**

**पदच्छेदः** - विधातुस्तस्य - विधातुः + तस्य।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| लोकानां विधातुः | जगतां सृष्टिस्थितिसंहार नि-यन्तुः |
| तस्य | तस्य शब्दतत्त्वस्य |
| अङ्गोपाङ्गनिबन्धनाः | अङ्गानामुपाङ्गानां च मूलभूताः |
| विद्याभेदाः प्रतायन्ते | विद्याशाखाः विस्तृताः भवन्ति। |

सर्वे विद्याभेदाः शब्दतत्वस्यैव

**सारः** - जगतां सृष्टिस्थितिसंहारहेतुभूतस्य शब्दतत्त्वस्य प्रणवस्य ज्ञानसंस्कारयोः कारणभूताः वेद-वेदाङ्ग-उपाङ्गमूलभूताः विद्याभेदाः विस्तृताः भवन्ति।

अस्य प्रपञ्चस्य प्रकृतिः वेदः । वेदः नादात्मकशब्दतत्त्वमेव । वेदः अङ्गभूतानां व्याकरणादीनां उपाङ्गानां पुराण - न्याय - मीमांसा - धर्मशास्त्रादीनां च मूलकारणम्। एते अङ्गोपाङ्गाः ज्ञानस्य तद्वारा संस्कारस्य च निदानम्।

## Summarised Overview

अनादिनिधनं ब्रह्म। शब्दब्रह्मणः प्राप्त्यर्थं वर्तमानः मार्गः मनोमयीरूपा प्रतिमा च वेदः एव। सः वेदः

एकः सन्नपि अनेकशाखायुक्तः इव पृथक् पृथक् ऋषिभिः उक्तः। वेदः ज्ञानाकारः। ज्ञानं शब्दतत्वम्। वेदः एकः सन्नपि ऋग्वेद-यजुर्वेद-सामवेदादिरूपैः महर्षिभिः बहुविधैरुक्ताः भवन्ति। वेदस्य नानात्वे अवान्तरभेदे सन्त्यपि वेदस्यैकत्वम्। तस्य एकत्वे अपि दोषो नास्ति इति वदन्ति। वेदज्ञाः स्मृतिवचनानां वेदमूलकत्वात् प्रत्यक्षात्प्रत्यक्षप्रयोजनवत्वाच्च वेदप्रामाण्यं कल्पयन्ति । वेदस्य मन्त्राणामाधारे अनेकाः कथाः प्रयोक्तुः श्रोतुः च बुद्ध्यनुसारं रचिताः सन्ति। ब्रह्मविषये अद्वैतिनां द्वैतिनां च प्रवादाः भिन्नाः भवन्ति। विविधैः दर्शनैः अङ्गीकृतं भवति ओंकाररूपं प्रणवम्। सर्वाणि दर्शनानि शब्दब्रह्मरूपां व्याकरणविद्यामङ्गीकुर्वन्ति। सत्यप्रकाशकः नादरूपः प्रणवमन्त्रः व्याकरणदर्शनमिति बुधाः वदन्ति। अस्य प्रपञ्चस्य प्रकृतिः वेदः। वेदः नादात्मकशब्दतत्त्वमेव। वेदः अङ्गभूतानां व्याकरणादीनां उपाङ्गानां पुराण - न्याय - मीमांसा - धर्मशास्त्रादीनां च मूलकारणम्। एते अङ्गोपाङ्गाः ज्ञानस्य तद्वारा संस्कारस्य च निदानम्।

## Assignments

**I. उत्तरत -**

1. शब्दब्रह्मणः प्राप्त्युपायः कः?
2. 'एकोऽप्यनेकवर्त्मेव'- अनेकमार्गत्वं कथम् ?
3. केषां स्वतः प्रामाण्यं वर्तते ?
4. एकपदागमा विद्या का?
5. विद्याभेदाः के ?

**II . निबन्धात्मकः प्रश्नः-**

1. शब्दब्रह्मप्राप्तये वर्तामानान् उपायान् विशदयत।

## Suggested Readings

1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002
2. Dr.Chandrasekharan Nair, Vakyapadiyam, Brahmakandam, Sunilpriya Malayalam commentary, Jai Karthik Book, 2000

## References

1. भर्तृहरिः,वाक्यपदीयम्।
2. रघुनाथशर्मा,वाक्यपदीयम्(ब्रह्मकाण्डम्) व्यारव्याद्वयोपेतम्,सम्पूर्णानन्दविद्यालयः, वाराणसी, 1998

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# शब्दशास्त्रस्य महत्त्वम्

## Learning Outcomes

- भर्तृहरिं,तस्य शैलीं चावगच्छति।
- वाक्यपदीयस्य प्राधान्यं गृह्णाति।
- व्याकरणदर्शनस्य सर्वदर्शनाङ्गीकरणं जानाति।
- शब्दशास्त्रस्य महत्त्वमवगच्छति।

## Background

व्याकरणेतिहासे आचार्ययोः पतञ्जलिभर्तृहर्योः महत्त्वं सीमातीतमेव । स्फोटसिद्धान्तस्य प्रचारकः भवति भर्तृहरिः। शब्दशास्त्रस्य नित्यत्वं स्फोटानुसृतमेव। सर्वशास्त्रपारङ्गतः भर्तृहरिः'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्' इत्यनेन वाक्यपदीयरचना आरब्धा। शब्दतत्त्वादेव अस्य जगतः उत्पत्तिः। अक्षरमेव विविधपदार्थरूपेण विवर्त्यास्मिन् लोके वर्तते। शब्दः सर्वेषां पदार्थानां प्रकृतिः। एकमेव शब्दब्रह्म शक्तिव्यपाश्रयात् विवधरूपैः प्रतिभाति। जन्मादयः षट् विकाराः भावभेदस्य कारणानि भवन्ति। शब्दब्रह्मणः प्राप्त्युपायः वेद एव। एकोऽपि वेदः अनेकशाखायुक्तः इव पृथक् पृथक् वर्तते। वेदमूलकत्वात् स्मृतीनामपि प्रामाण्यं वर्तते । वेदविहितकार्याणि स्मृतिषु विशदयति । वेदाश्रयाः विविधाः सिद्धान्ताः वक्तुः श्रोतुश्चेच्छानुसारं संजाताः। नानाविधानि अर्थवादरूपाणि सन्ति।

वेदाङ्गेषु प्रधाननस्य व्याकरणस्य प्राधान्यमस्मिन् एकके सूचिताः सन्ति। पश्यामस्तावत्।

SGOU

## Keywords

तपसामुत्तमं - पुण्यतमं ज्योतिः - अर्थप्रकृतितत्वानां - अधिविद्यम् - शब्दाकृतिनिबन्धनाः - अजिह्वा राजपद्धतिः - छन्दसाम् योनिं ज्योतिः शुद्धम् - आलोकतमसीव्यतीत्य - प्रतिबिम्बवत् - अथर्वणाम्

## Discussion

**श्लोकः 11-**

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥ ११।।**

**पदच्छेदः -** ब्रह्मणस्तस्य - ब्रह्मणः + तस्य।
प्राहुर्व्याकरणम् -प्राहुः + व्याकरणम्।

व्याकरणाध्ययनस्य प्राशस्त्यं विशदयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| बुधाः तस्य ब्रह्मणः | महर्षयः तस्य नादब्रह्मणः |
| आसन्नं तपसाम् उत्तमं तपः | समीपवर्ती तपसां मध्ये श्रेष्टं तपः |
| छन्दसां प्रथमाङ्गं च | वेदानां ज्ञानाय प्रधानमवश्यं च अङ्गं |
| व्याकरणं प्राहुः | व्याकरणशास्त्रमिति वदन्ति |

**सारः**

महर्षयः वेदस्वरूपस्य ब्रह्मणः निकटतमं, तपसां मध्ये श्रेष्ठं, वेदानामर्थज्ञानाय प्रधानमवश्यम् अङ्गं च भवति व्याकरणमिति वदन्ति।

वेदाख्यस्य शब्दब्रह्मणः सायुज्यप्राप्त्यर्थं शब्दज्ञानमावश्यकम्। शब्दानां शास्त्रीयावबोधाय व्याकरणज्ञानमावश्यकम्।

'मुखं व्याकरणं स्मृतम्' इति प्रमाणवचनम्।

**श्लोकः-12**

**प्राप्तरूपविभागायाः यो वाचः प्रथमो रसः।**

**यत्तं पुण्यतमं ज्योतिः तस्य मार्गोऽयमाञ्जसा ।।१२।।**

**पदच्छेदः** -यो वाचः – यः+वाचः।

प्रथमो रसः -प्रथमः+ रसः।

मार्गोऽयम्- मार्गः+अयम्।

शब्दतत्त्वस्य प्राप्तये व्याकरणं साहाय्यं भवति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| प्राप्तरूपविभागायाः | रूपविभागमं प्राप्तायाः (वर्ण - पद - वाक्य - रूपेण) |
| वाचः यः परमः रसः | शब्दात्मनः यः सर्वोत्कृष्टः सारः |
| यत तत् पुण्यतमं ज्योतिः | यत् श्रुतिप्रसिद्धा पुण्या दीप्तप्रभा |
| तस्य आञ्जसः मार्गः अयं (भवति) | तस्याः प्रभायाः प्राप्तये अयमेव सरलः मार्गः। |

**सारः**

शब्दः वर्ण-पद-वाक्यरूपेण रूपं प्राप्तस्य शब्दस्य सर्वोत्कृष्टाशयग्रहणाय सरलः मार्गः व्याकरणाध्ययनमेव।

वर्ण-पद-वाक्यरूपेण रूपं प्राप्तस्य शब्दस्य परमः रसः तस्य साधुशब्दा एव। साधुशब्दा एव पवित्रा ज्योतिः।

**श्लोकः १३-**

**अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।**

**तत्वावबोधशब्दानां नास्ति व्याकरणादृते॥ १३।।**

**पदच्छेदः -** शब्दा एव - शब्दाः + एव।
नास्ति - न + अस्ति।
व्याकरणादृते - व्याकरणात् + ऋते।

| **अन्वयः** | **अन्वयार्थः** |
| --- | --- |
| अर्थप्रवृत्तितत्वानां | सूक्ष्मतया अर्थबोधप्रक्रि - याणां |
| शब्दा एव निबन्धनं | साधुशब्दाः एव कारणं |
| शब्दानां तत्वावबोधः | साधुशब्दानां स्वरूपज्ञानं |
| व्याकरणादृते नास्ति | व्याकरणात् विना न लभते (व्याकरणादेव भवति) |

व्याकरणं अर्थबोधप्रक्रियायै साहाय्यं भवति

**सारः -**

साधुशब्दा एव अर्थावबोधप्रक्रियायै कारणानि। शब्दानां स्वरूपार्थज्ञानाय व्याकरणं विना अन्योपायः नास्ति।

शब्दानां यथार्थज्ञानाय व्याकरणाध्ययनं कार्यम्। व्याकरणज्ञानं विना कः समासः, उद्दिष्ट आशयः कः इति सन्देहं विना वक्तुं न शक्यते।

**श्लोकः 14-**

**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥ १४।।**

**पदच्छेदः -** तद्वारम् - तत् + द्वारम्।
वाङ्मलानां – वाक् + मलानां ।

व्याकरणं सर्वशास्त्रोपकारकम्

| **अन्वयः** | **अन्वयार्थः** |
| --- | --- |
| तद् अपवर्गस्य द्वारं | व्याकरणम् मोक्षस्योपायः भवति। |
| वाङ्मलानां चिकित्सितं | वाग्दोषाणां प्रतिविधिः |
| सर्वविद्यानां पवित्रं | सर्वासु विद्यासु पावनं (श्रेष्ठम्) |

| | |
|---|---|
| अधिविद्यं प्रकाशते | सर्वशास्त्रेषु स्वीकार्यतां प्रकाशते। |

**सारः**

व्याकरणशास्त्रं मोक्षोपायस्य कारणं भवति। वाग्दोषाणां परिहाराय व्याकरणौषधं स्वीकर्तव्यम्। सर्वासु विद्यासु सर्वेषु शास्त्रेषु च व्याकरणं पवित्रं श्रेष्ठं च भवति।

अपवर्गः फलप्राप्तिः। शब्दज्ञानोपायाय व्याकरणाध्ययनं कार्यम्। व्याकरणज्ञानेन अज्ञानकल्मषं दूरीकर्तुं शक्यते। सर्वशास्त्रेषु व्याकरणं प्रकाशते।

**श्लोकः 15 -**

**यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।**
**तथैव लोके विद्यानामेषा विद्या परायणम्॥ १५।।**

**पदच्छेदः -** यथार्थजातयः - यथा + अर्थजातयः।
तथैव - तथा + एव।

लौकिकशब्दानां ज्ञानाय व्याकरणाध्ययनं कार्यम्

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यथा सर्वाः अर्थजातयः | येन प्रकारेण घटादिसमवेताः घटत्वादिजातयः |
| शब्दाकृतिनिबन्धनाः | घटत्वपटत्वादि बोधाय शब्दाः एव निमित्तभूताः |
| तथैव लोके | तेन प्रकारेण अस्मिन् लोके |
| विद्यानां | कोशकाव्यादीनां |
| एषा विद्या परायणं | इयं वाग्विद्या श्रेष्ठः मार्गः भवति। |

**सारः –**

अर्थजातिबोधस्य आधारः शब्दः एव। पदस्य शक्तिग्रहे प्रधानं व्याकरणमेव। लौकिकानां वैदिकानां च शब्दानामर्थावबोधने

व्याकरणमेव कारणम्। अपि च शब्दब्रह्मसाक्षात्काराय अनायासमार्ग एव व्याकरणम्।

**श्लोकः 16-**

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**

**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।।१६।।**

मोक्षप्राप्त्युपायस्य प्रमुखं सोपानं व्याकरणमेव

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| इदं सिद्धिसोपानपर्वणां | इदं व्याकरणं मोक्षप्राप्त्युपायेषु |
| आद्यं पदस्थानं(भवति) | प्रथमं प्रधानं च सोपानं भवति। |
| सा इयं मोक्षमाणानां | सा इयं व्याकरणविद्या मोक्षेच्छूणां |
| अजिह्मा राजपद्धतिः | कापट्यरहितः विशालमार्गः। |

**सारः**

ब्रह्मपदप्राप्त्यर्थमुपयुक्तानां प्रधानं प्रथमं च सोपानमेव व्याकरणम्। मोक्षेच्छवः विशालेन व्याकरणमार्गेण सञ्चार्य मोक्षपदं प्राप्नुवन्ति। इतरदर्शनाध्ययनैरपि मोक्षप्राप्तिः जायते चेदपि व्याकरणमार्गमेव राजपद्धतिः।

**श्लोकः 17**

**अत्रातीतविपर्यासः केवलामनुपश्यति।**

**छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम्॥ १७।।**

भ्रमज्ञाननिवारणेन शब्दसाक्षात्कारसाधनरूपं व्याकरण ब्रह्मसाक्षात्कारसाधनं च भवति

**पदच्छेदः -** अत्रातीतविपर्यासः - अत्र + अतीतविपर्यासः।
छन्दस्यश्छन्दसां - छन्दस्यः + छन्दसाम्।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अत्र अतीतविपर्यासः | व्याकरणे सम्यज्ञानवान् |

| | |
|---|---|
| छन्दस्यः आत्मा | वेदग्रहणसमर्थः पुरुषः (वैयाकरणः) |
| छन्दसां केवलां योनिं | वेदानां शुद्धां कारणावस्थां |
| छन्दोमयीं तनुं पश्यति | छन्दोरूपं तनुं पश्यति। |

**सारः-**

व्याकरणे व्युत्पत्तिमान् भ्रमज्ञानदूरीकृतः वैयाकरणः एव वेदरक्षकः। सः वेदानां मूलप्रकृतिरूपं नादात्मकं शब्दतत्वं जानाति।

वेदयोनिः भवति ओंकाररूपं प्रणवम्। 'ओंकार एव सर्वावाक्' इति श्रुतिः।

**श्लोकः18-**

**प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम्।**
**तदस्मिन्नेव तमसि ज्योतिः शुद्धं विवर्तते॥ १८।।**

शब्द एव ब्रह्म, शब्दज्ञानमेव ब्रह्मज्ञानं, ब्रह्मज्ञानेन एव मोक्ष

**पदच्छेदः** - प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम् - प्रत्यस्तमितभेदायाः + यत् + वाचोरूपम् + उत्तमम्।
तदस्मिन्नेव – तत्+अस्मिन्+एव।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| प्रत्यस्तमितभेदायाः वाचः | भेदरहितस्य वाग्स्वरूपस्य |
| यत् उत्तमं रूपं | यत् सर्वोत्तमं ब्रह्मस्वरूपं |
| तत् शुद्धं ज्योतिः | तत् पावनं ज्ञानरूपं ज्योतिरस्ति |
| (तत्) अस्मिन्नेव तमसि | तत् वैकृतध्वनि रूपे तमसि एव |
| विवर्तते | आच्छादितं वर्तते। |

**सारः -**

सर्वोत्तमे शब्दतत्वे शब्दप्रकाशकाः ध्वनिभेदाः न सन्ति । शुद्धे शब्दज्योतिषि पावनं ज्ञानं वर्तते । तत् अज्ञानरूपे तमसि प्रपञ्चरूपेण भासते ।

**श्लोकः 19-**

**वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।**

**व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥ १९ । ।**

**पदच्छेदः -** व्यतीत्यालोकतमसी - व्यतीत्य + आलोकतमसी

प्राकृवैकृतध्वनिभि-न्नं स्फोटं व्यवस्थापयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| वैकृतं मूर्तिव्यापारदर्शनं | वैकृतध्वनिसम्बन्धि देश-कालभेदं |
| समतिक्रान्ता | स्फोटे आरेपयन्तः |
| आलोकतमसी व्यतीत्य | प्राकृतवैकृतध्वनिभिन्नं |
| यं प्रकाशमुपासते | स्फोचाख्यं प्रकाशं जानन्ति |

**सारः**

वैकृतध्वनिसम्बन्धि देशकालभेदं स्फोटे अनारोपयन्तः योगिनः प्रकृतवैकृतध्वनिभिन्नं स्फोटाख्यं प्रकाशं जानन्ति ।

प्राकृतः वैकृतश्चेति ध्वनिः द्विविधः। प्रवृत्तौ (स्फोटे) भवः प्राकृतः। सेफाटिभिव्यञ्जक इति यावत् ।

**श्लोकः 20-**

**यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः ।**

**शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत् ॥ २० । ।**

**पदच्छेदः -** वाचो निमित्तानि - वाचः + निमित्तानि।
चिह्नानीवाक्षरस्मृतेः - चिह्नानि + इव + अक्षरस्मृतेः।

शब्दे व्यवहारनिमित्तानि वर्ण-पद-वाक्यप्रतीतिजनकानि प्रतिबिम्बानि च ज्ञातुं व्याकरणपठनं कार्यम्

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यत्र वाचः अक्षरस्मृतेः | यस्मिन् शब्दस्य अ इ उ इत्यादीनां अक्षरस्मृतेः इव। |
| चिह्नानि निमित्तानि | चिह्नानि ज्ञाननिमित्तानि भवन्ति। |
| शब्दपूर्वेण योगेन | पदानां प्रयोगेण शब्दसम्बन्धेन |
| प्रतिबिम्बवत् भासन्ते | प्रतिबिम्बवत् प्रकाशन्ते तत् व्याकरणाध्ययनेन एव भवति। |

**सारः -** शब्दस्य चिह्नरूपाणि अक्षराणि ज्ञाननिमित्तानि भवन्ति। व्यवहारनिमित्तं वर्णपदवाक्यप्रतीतिः जायते। इयं प्रतीतिः प्रतिबिम्बवत् भवति। शब्दतत्त्वमेव सत्यम्। एतत्सत्यज्ञानाय व्याकरणपठनं कार्यम्।

**श्लोकः 21**

**अर्थवर्णामङ्गिरसां साम्नां ऋग्यजुषस्य च।**

**यस्मिन्नुच्चावचाः वर्णाः पृथक् स्थिति परिग्रहाः॥ २१।।**

**पदच्छेदः -** यस्मिन्नुच्चावचाः - यस्मिन् + उच्चावचाः।

उदात्तानुदात्तस्वरितज्ञानाय व्याकरणपठनं कार्यम्

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यस्मिन् ऋग्यजुषस्य | यस्मिन् शब्दब्रह्मणि ऋग्वेदस्य यजुर्वेदस्य च |
| साम्नां अङ्गिरसां अथर्वणां च | सामवेदस्य अङ्गिरगोत्रस्य अथर्ववेदस्य च |
| उच्चावचाःवर्णाः | उदात्तानुदात्तस्वरितभेदाः वर्णाः प्रतीयन्ते |

| | |
|---|---|
| (ये) पृथक्तया स्थितिपरिग्रहाः | ये पृथक्तया स्थितिः अस्तित्व-बोधकाः च वर्तन्ते ते व्याकरणाध्ययनेनैव सिद्ध्यति। |

**सारः -** शब्दब्रह्मणि ऋग्यजुसामाथर्ववेदाः विविधाः सन्त्यपि उच्चारणे उदात्तानुदात्तस्वरितभेदाः सन्ति। तेषां पृथक्तया व्यस्तरूपेण स्थितौ बोधजनकाय व्याकरणाध्ययनमेवावश्यकम्।

**श्लोकः 22**

> **यदेकं प्रक्रियाभेदैः बहुधा प्रविभज्यते।**
>
> **तद् व्याकरणमागम्यं परं ब्रह्माधिगम्यते॥ २२।।**

**पदच्छेदः -** यदेकं - यत् + एकं।
ब्रह्माधिगम्यते - ब्रह्म + अधिगम्यते।

व्याकरणज्ञानेन नादब्रह्माणं प्राप्तुं शक्यते

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यत् परं ब्रह्म | यत् परं श्रेष्ठः नादब्रह्म |
| एकम् (अपि) प्रक्रियाभेदैः | एकः सन्नपि विविधान् अवलम्ब्य |
| बहुधा प्रविभज्यते | विविधप्रकारैः भेदैः वर्ण्यते |
| तत् व्याकरणमागम्य | तत् परं ब्रह्म व्याकरणज्ञानेन |
| अधिगम्यते | साक्षात्क्रियते |

**सारः-** नादब्रह्म एकं सन्नपि विविधान् मार्गानवलम्ब्य विविधप्रकारैः भेदैः वर्ण्यते। तत् ब्रह्म व्याकरणज्ञानेन साक्षात्क्रियते।

## Summarised Overview

शब्दतत्वादेवास्य जगतः उत्पत्तिः। अतः छन्दसां प्रथममङ्गं व्याकरणमिति प्राहुः । शब्दानां स्वरूपज्ञानाय व्याकरण विना अन्योपायः नास्ति । वेदाख्यस्य शब्दब्रह्मणः सायुज्यप्राप्त्यर्थं शब्दज्ञानमावश्यकम् । शब्दानां शास्त्रीयावबोधाय व्याकरणज्ञानमावश्यकम् । 'मुखं व्याकरणं स्मृतम्' इति प्रमाणवचनम् । शब्दानां यथार्थज्ञानाय व्याकरणाध्ययनं कार्यम् । व्याकरणज्ञानं विना कः समासः, उद्दिष्ट आशयः कः इति सन्देहं विना वक्तुं न शक्यते । व्याकरणशास्त्रं मोक्षोपायस्य कारणं भवति । वाग्दोषाणां परिहाराय व्याकरणौषधं स्वीकर्तव्यम् । सर्वासु विद्यासु सर्वेषु शास्त्रेषु च व्याकरणं पवित्रं श्रेष्ठं च भवति । लौकिकानां वैदिकानां च शब्दानामर्थावबोधने व्याकरणमेव कारणम् । अपि च शब्दब्रह्मसाक्षात्काराय अनार्यासमार्ग एव व्याकरणम् । मोक्षप्राप्त्युपायस्य प्रमुखं सोपानं व्याकरणमेव । पावनं ज्ञानरूपं ज्योतिः भवति व्याकरणम् । व्याकरणज्ञानेन ब्रह्मसाक्षात्कारः । शब्दस्य चिह्नरूपाणि अक्षराणि ज्ञाननिमित्तानि । व्याकरणज्ञानेन ज्ञानब्रह्माणं ज्ञातुं शक्यते ।

## Assignments

**I. उत्तरत-**

1. स्मृतीनां प्रामाण्यं कथं सिद्ध्यति ?
2. तपसामुत्तमं तपः किम् ?
3. 'तस्य मार्गोऽयमाञ्जसः' कस्य?
4. 'पवित्रंसर्वविद्यानाम्'-किम्?
5. 'एषा विद्या परायणम्' – विद्या का?
6. आद्यं पदस्थानं किम्?
7. अस्मिन्नेव तमसि शुद्धं विवर्तते -किम्?
8. किं निमित्तं वर्णपदवाक्यप्रतीतिः जायते ?
9. प्रक्रियाभेदैः बहुधा प्रविभज्यते-किम्?

10. केन नादब्रह्म साक्षात्क्रियते ?इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्वा राजपद्धतिः ॥ कारिका व्याख्यायत।

**II निबन्धात्मकः प्रश्नः**

1. व्याकरणाध्ययनस्य प्राशस्त्यं विशदयत।

## Suggested Readings

1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002
2. Dr. K chandrashekharan Nair, Vakyapadeeyam Brahmakanda, sunilpriya Malayalam commentary, Jai Karthika Books, Tiruvanatapuram, 2000

## References


1. पण्डितरघुनाथशर्मा,वाक्यपदीयम् (ब्रह्मकाण्डम्) व्याख्याद्वयोपेतम्, सम्पूर्णानन्दविश्व विद्यालयः, वारणासी, 1998
2. भर्तृहरिः,वाक्यपदीयम्।


SGOU

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 4

# शब्दार्थसंबन्धम्

## Learning Outcomes

- व्याकरणं भर्तृहरिं च प्रत्यभिजानाति।
- वाक्यपदीयस्य कारिकाभिः परिचयः सम्पादयति।
- व्याकरणदर्शनस्य प्राधान्यमवगच्छति।
- शब्दार्थसम्बन्धं जानाति।

## Background

भारतेषु अनेके वैयाकरणाचार्याः सन्त्यपि पतञ्जलिभर्तृहरी नितरां शोभेते । पतञ्जलिः स्वग्रन्थे महाभाष्ये शब्दस्य नित्यतां समर्थयति। शब्दस्य नित्यत्वं भर्तृहरेः स्फोटवादानुसृतमेव। शब्दतत्त्वं अक्षरमेव, तत् अर्थभावेन विवृत्य जगतः कारणमेव। शब्दब्रह्मण प्रस्युपायः वेद एव। वेदाङ्गेषु प्रधानं व्याकरणं तपसामुत्तमं तपः भवति। शब्द -वर्ण -पद -वाक्यरूपेण प्राप्तस्य शब्दस्य आशयग्रहणाय सरलः मार्गः व्याकरणाध्ययनमेव। साधुशब्दानां स्वरूपज्ञानं व्याकरणात् विना न जायते। व्याकरणागमः मोक्षस्योपायः भवति। अपि च व्याकरणेन अज्ञानकल्मषं दूरीकर्तुं शक्यते।अर्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः भवन्ति। अर्थगतिजातिबोधाय आधारः शब्द एव। मोक्षेच्छवः विशालेन व्याकरणमार्गेण सञ्चार्य मोक्षपदं प्राप्नुवन्ति। वेदरक्षकरूपः पुरुषः व्याकरणमेव। शब्दज्ञानमेव

ब्रह्मज्ञानं, ब्रह्मज्ञानमेव मोक्षः। शुद्धे शब्दज्योतिषि पावनं ज्ञानं वर्तते। व्याकरणाध्ययनेन ज्ञानप्रकाशं सिध्यति। सत्यात्मकस्य शब्दतत्त्वस्य बोधाय व्याकरणपठनं कार्यम्। तेनैव उदात्तानुदात्तस्वरितभेदान् वर्णान् ग्रहीतुं शक्यते। नादब्रह्मं व्याकरणज्ञानेन साक्षात्क्रियते।

अस्मिन्नेकके शब्दस्य नित्यत्वं शब्दः, अर्थः, शब्दार्थयोः संबन्धः चाधिकृत्य भर्तृहरेः मतं ज्ञातुमवसरं सिद्ध्यति। तस्मादत्र प्रविश्यामः।

## Keywords

नित्याः शब्दार्थसंबन्धाः - अपोद्धारपदार्थाः प्रतिपादकाः साध्वसाधुषु स्मृत्यर्थं -अर्थप्रत्यायनात् नित्यत्वे कृतत्वे वा नित्यता साधुत्वविषया स्मृतिः।

## Discussion

**श्लोकः 23**

**नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः।**
**सूत्राणामनुतन्त्राणां भाष्याणां च प्रणेतृभिः ।।२३।।**

**पदच्छेदः** - तत्राम्नाता - तत्र + आम्नातः।

मुनित्रयं शब्द-अर्थ -तयोः सम्बधस्य च नित्यस्थापनं सूचयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तत्र सूत्राणाम् | व्याकरणशास्त्रे सूत्राणां |
| अनुतन्त्राणां भाष्याणां च | वार्तिकाणां भाष्याणां च |
| प्रणेतृभिः महर्षिभिः | रचयितृभिः महर्षिभिः |
| शब्दार्थसम्बन्धाः नित्या | शब्दः अर्थः तयोः संबन्धः च शब्दार्थसंबन्धाः, ते नित्याः। |
| समाम्नाताः | प्रख्यापिताः। |

**सारः** - व्याकरणशास्त्रे पाणिनिवररुचि पतञ्जलिनामकैः आचार्यैः रचितेषु सूत्र - वार्तिक - भाष्येषु शब्दस्य अर्थस्य शब्दार्थयोः संबन्धस्य च नित्यत्वं प्रस्थापिताः।

उत्पत्तिविनारहितः नित्यः।

**श्लोकः 24**

**अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।**
**अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः ।।२४।।**

**पदच्छेदः** - अपोद्धारपदार्था ये - अपोद्धारपदार्थाः +ये।
चार्थाः - च + अर्थाः।
अन्वाख्येयाश्च - अन्वाख्येयाः +च।
चापि -च + अपि।

व्याकरणशास्त्रस्य प्रतिपाद्यविषयाः

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| ये अन्वाख्येयाः | साध्वसाधुशब्देषु ये पद-वाक्य रूपाः |
| ये च प्रतिपादकाः | ये प्रकृतिप्रत्ययरूपाः शब्दाः। |
| ये अपोद्धारपदार्थाः | प्रकृतेः प्रत्ययस्य च अर्थ-व्यक्तीकरणयोग्याः |
| स्थितलक्षणाः अर्थाः | नाशरहितस्वरूपाः अर्थाः च सन्ति। |

**सारः** - साध्वसाधुशब्देषु पदवाक्यरूपाः प्रकृतिप्रत्ययरूपाः शब्दाः सन्ति। अपि च प्रकृतिप्रत्ययानां अर्थव्यक्तीकरणयोग्यानि पदानि नाशरहितस्वरूपाः अर्थाः च सन्ति।

विविच्य प्रदर्शयितुं योग्याः शब्दाः अन्वाख्येयशब्दाः।

यथा पचति इत्यस्य पच् - शप् - तिप् इति व्यवच्छेदुं शक्यते। पच् प्रकृति (अत्र धातुः)। शप् विकरणप्रत्ययः। तिप् प्रथमपुरुष एकवचनम्। प्रतिपादकाः इत्यस्य प्रकृतिप्रत्ययज्ञानदायकाः इत्यर्थः।

अपोद्धारपदार्थाः प्रकृतिप्रत्ययादीनामार्थव्यक्तीकरणयोग्याः पदार्थाः।

स्थितलक्षणाः इत्यस्य विनाशरहितस्वरूपाः इत्यर्थः। वाक्यार्थज्ञाने पदार्थाः अप्रत्यक्षाः भवन्ति। वाक्यार्थाः पदार्थान् अपेक्ष्य स्थितलक्षणाः भवन्ति।

**श्लोकः 25**

**कार्यकारणभावेन योग्यभावेन च स्थिताः।**

**धर्मे च प्रत्यये चाङ्गं सम्बन्धाः साध्वसाधुषु ।।२५।।**

**पदच्छेदः** - चाङ्गं - च +अङ्गम्।

शब्दस्य अर्थस्य च कार्यकारणसम्बन्धादीन् सूचयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| साध्वसाधुषु | साध्वसाधुषु शब्देषु |
| कार्यकारणभावेन | ये कार्यं कारणमिति भावेन |
| योग्यभावेन च स्थिताः संबन्धाः | उचितभावेन च वर्तमानाः सम्बन्धाः |
| धर्मे च प्रत्यये च | ये धर्मावबोधे अर्थबोधे च |
| अङ्गं (भवन्ति) | सहायकं भवन्ति ते अस्मिन् वाक्यपदीये विवृणोति। |

**सारः** - साध्वसाधुषु शब्देषु ये कार्यकारणभावेन उचितभावेन च वर्तमानाः सम्बधाः तथा धर्मावबोधे च साहायकाः सम्बधाः चास्मिन् ग्रन्थे वाक्यपदीये प्रतिपादिताः सन्ति।

शब्दस्य अर्थस्य च कार्यकारणरूपः सम्बन्धः अस्ति। शब्दः अर्थः च कार्यं तथा कारणमपि भवति। यः शब्दं उच्चरति। तस्य कृते अर्थः कारणं, शब्दः कार्यं च। यः शब्दं श्रृणोति तस्य कृते शब्दः कारणं, अर्थः कार्यं च। शब्दार्थयोः योग्यतारूपः कश्चन संबन्धोऽप्यस्ति। शब्दविशेषं अर्थविशेषं बोधयति।

शास्त्रीयः शब्दप्रयोगः धर्मस्य (मोक्षस्य) प्रत्ययस्य (ज्ञानस्य) च साहायकमेव।

**श्लोकः 26**

**ते लिङ्गैश्च स्वशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः**

**स्मृत्यर्थमनुगम्यन्ते केचिदेव यथागमम् ।।२६।।**

**पदच्छेदः** - लिङ्गैश्च -लिङ्गैः + च।
स्वशब्दैश्च - स्वशब्दैः +च।
शास्त्रेऽस्मिन्नुपवर्णिताः - शास्त्रे + अस्मिन् + उपवर्णिताः।
केचिदेव - केचित् +एव।

ज्ञापकादयोऽपि व्याकरणशा-स्त्रे अन्तर्भवन्ति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| लिङ्गैः च स्वशब्दैः च | ये शब्दाः सूचकैः (ज्ञापकैः) स्वशब्दैः सूत्रैः च |
| अस्मिन् शास्त्रे उपवर्णिताः | स्पष्टतया अस्मिन् व्याकरण-शास्त्रे वर्णिताः |
| ते स्मृत्यर्थं केचित् एव | ते अनायासेन स्मरणार्थं - अल्पतया एव |
| यथागमम् अत्र अनुगम्यन्ते | शास्त्रानुसारमत्र विवृण्वन्ते। |

**सारः** - ये शब्दाः ज्ञापकैः (सूचकैः) सूत्रैः च अस्मिन् व्याकरणे शास्त्रे स्पष्टतया शास्त्रानुसारं विवृण्वन्ते।

श्लोकस्य संक्षिप्तः आशयः।

**श्लोकः 27**

**शिष्टेभ्यः आगमात् सिद्धाः साधवो धर्मसाधनम्।**

**अर्थप्रत्ययनाभेदे विपरीतास्त्वसाधवः ।।२७।।**

**पदच्छेदः** - शिष्टेभ्य आगमात् - शिष्टेभ्यः + आगमात्।
साधवो धर्मसाधनम् - साधवः + धर्मसाधनम्।
विपरीतस्त्वसाधवः - विपरीताः + तु + असाधवः।

साध्वसाधुशब्दप्रयोगे अर्थसिद्धौ साधुशब्दप्रयोगः कार्यः

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| शिष्टेभ्यः आगमात् | शिष्टाचार्येभ्यः लब्धात् व्याकरणात् |
| अर्थप्रत्ययानाभेदे | अर्थबोधकत्वस्य तुल्यत्वेऽपि |
| सिद्धाः (शब्दाः) साधवः | सिद्धाः शब्दाः साधवः (धर्म-साधन त्वेन बोधिताः साधुशब्दाः) |

SGOU

| | |
|---|---|
| धर्मसाधनम् | अभ्युदयाय मोक्षाय च हेतवः भवन्ति। |
| विपरीताः असाधवः | असाधुशब्दाः अधर्मसाधकाः एव। |

**सारः** - साध्वसाधुशब्देभ्यः अर्थबोधे सम्भवत्यपि शिष्टाचारैः इन्द्रचन्द्राद्यचार्येभ्यः सूचिताः सिद्धाः शब्दाः अभ्युदाय मोक्षाय च हेतवः भवन्ति। तद्विपरीताः असाधुशब्दाः अधर्मसाधकाः भवन्ति। शब्दाः द्विविधाः - अन्वाख्येयाः, प्रतिपादकाः च। अर्थाः द्विविधाः - अपोद्धार-पदार्थाः, स्थितलक्षणाः च। सम्बधाः द्विविधाः - कार्यकारणभावः योग्यभावः च। प्रयोजनम् द्विविधम् - धर्मः, अर्थबोधः च।

**श्लोकः 28**

**नित्यत्वे कृतकत्वे वा तेषामपि विद्यते।**
**प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते ।।२८।।**

शब्दस्य अनाद्यनन्तत्वमस्ति

**पदच्छेदः** - आदिर्न - आदिः +न।
चैषा -च +एषा।
नित्यतोच्यते -नित्यता +उच्यते।

| अन्वयः | अन्वयार्थः |
|---|---|
| नित्यत्वे कृतकत्वे वा | शब्दनित्यत्ववादे शब्दानित्यत्ववादे वा |
| तेषां आदिः न विद्यते | शब्दानामादिः न अस्ति। |
| सा च एषा व्यवस्था | शब्दस्य नित्यानित्यत्व व्यवस्था |
| प्राणिनां नित्यता इव उच्यते | जीवीनां नित्यानित्यत्वमिव निश्चितम् इति उच्यते। |

**सारः** - शब्दाः नित्याः। केचन शब्दाः उत्पन्नाः अतः अनित्याः इति वदन्ति। तथापि शब्दस्य प्राणिनामिव अनाद्यनन्तत्वमुच्यते।

वैयाकरणाः मीमांसकाः च शब्दस्य नित्यत्वमङ्गीकुर्वन्ति। वैशेषिकाः शब्दः अनित्य इति वदन्ति। तथापि शब्दस्य अनाद्यनन्तत्वं वर्तते।

**श्लोकः 29**

**नानर्थिकामिमं कश्चिद् व्यवस्थां कर्तुमर्हति।**
**तस्मान्निबध्यते शिष्टैः साधुत्वविषया स्मृतिः ।।२९।।**

**पदच्छेदः -** नानर्थिकाम् - न + अनर्थिकाम्।
तस्मान्निबध्यते - तस्मात् +निबध्यते।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| इमां व्यवस्थां | शब्दस्य अर्थस्य तयोः सम्बन्धस्य च नित्यत्व-व्यवस्थां |
| अनर्थिकां कर्तुं | व्यर्थमिति समर्थयितुम् |
| कश्चित् नार्हति | कोऽपि नार्हः |
| तस्मात् शिष्टैः | साधुत्वबोधकात् शिष्टाचारैः |
| साधुत्वविषया स्मृतिः | शब्दसाधुत्वबोधकं व्याकरण शास्त्रम् |
| निबध्यते | निबन्धनं कृतम्। |

शब्दस्य अर्थस्य तयोः सम्बन्धस्य च नित्यत्वबोधाय साधुत्वबोधकशब्दज्ञानाय व्याकरणपठनं कार्यम्

**सारः -** शब्दस्य अर्थस्य तयोः सम्बन्धस्य च नित्यत्वं समर्थितम्। तस्य व्यर्थताम् समर्थयितुम् केनापि न शक्यते। अतः शब्दसाधुत्वबोधाय व्याकरणशास्त्रमध्येयम्।

## Summarised Overview

व्याकरणदर्शनस्य प्राधान्यं भर्तृहरिः विशदयति । व्याकरणशास्त्रे पाणिनिवररुचि पतञ्जलिनामकैः आचार्यैः रचितेषु सूत्र - वार्तिक - भाष्येषु शब्दस्य अर्थस्य शब्दार्थयोः संबन्धस्य च नित्यत्वं प्रस्थापिताः। नित्यः नाम उत्पत्तिविनाशरहितः। शब्दस्य अर्थस्य तयोः सम्बन्धस्य च नित्यत्वं पतञ्जलिना अपि अङ्गीकृतमेव । साध्वसाधुशब्देषु पदवाक्यरूपाः प्रकृतिप्रत्ययरूपाः शब्दाः सन्ति। अपि च प्रकृतिप्रत्ययानां अर्थव्यक्तीकरणयोग्यानि पदानि नाशरहितस्वरूपाः अर्थाः च सन्ति । साध्वसाधुषु शब्देषु ये कार्यकारणभावेन उचितभावेन च वर्तमानाः सम्बधाः तथा धर्मावबोधे च साहायकाः सम्बधाः चास्मिन् ग्रन्थे वाक्यपदीये प्रतिपादिताः सन्ति । नित्याः शब्दार्थसम्बन्धाः

महर्षिभिः समाम्नाताः। अपोद्धारपदार्थाः स्थितलक्षणाः चेति अर्थाः द्विविधाः। शब्दानां अनाद्यन्तमस्ति। शब्दसाधुत्वबोधकाय व्याकरणशास्त्रमध्येतव्यम्।

## Assignments

I. **एकेन वाक्येन वाक्यद्वयेन वा उत्तरत-**

1. शब्दस्य द्वैविद्यं कथम्?
2. किं नाम स्थितलक्षणाः?
3. सम्बन्धाः कति विधाः? विशदयत
4. केन कारणेन साधुशब्दाः एव प्रयोक्तव्याः?
5. के के शब्दस्य नित्यत्वमङ्गीकुर्वन्ति?

II. **टिप्पणिं लिखत -**

1. व्याकरणाध्ययनस्य प्राधान्यम्।
2. अर्थस्य द्वैविध्यं।
3. अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
   अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः।। कारिका व्याख्यायत।
4. कार्यकारणभावेन योग्यभावेन च स्थिताः।
   धर्मे च प्रत्यये च चाङ्गं सम्बन्धाः साध्वसाधुषु।। कारिका व्याख्यायत।
5. नित्यत्वे कृतकत्वे वा तेषामपि विद्यते।
   प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते।। कारिका व्याख्यायत।

III. **निबन्धात्मकः प्रश्नः -**

1. शब्दस्य अर्थस्य सम्बन्धस्य च नित्यत्वं वाक्यपदीयदिशा विशदयत।

# Suggested Readings


1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002
2. Dr.Chandrasekharan Nair, Vakyapadiyam, Brahmakandam, Sunilpriya Malayalam commentary, Jai Karthik Book, 2000


# References


1. भर्तृहरिः वाक्यपदीयम्
2. पण्डितसाधुनाथशर्म, वाक्यपदीयम् (ब्र्ह्मकाण्डं) व्यारव्याद्वयोपेतम्, सम्पूर्णनन्दविश्व विद्यालयः वारणासि , 1988


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# वाक्यपदीयम् -2

## BLOCK - 4

SGOU

UNIT 1

# आगमस्य प्रामाण्यम्

## Learning Outcomes

- स्फोटसिद्धान्तप्रचोदकं भर्तृहरिं परिचाययति।
- वाक्यपदीयस्य कारिकाभिः परिचयं सम्पादयति।
- शब्दतत्त्वस्य प्राधान्यं जानाति।
- भर्तृहरिणा अङ्गीकृतानि प्रमाणानि जानाति।
- आगमप्रामाण्यं गृह्णाति।

## Background

भर्तृहरिः स्वग्रन्थे वाक्यपदीये प्रथमे ब्रह्मकाण्डे अक्षरमेव ब्रह्मेति प्रतिपाद्य जगतः सर्वव्यवहारः अक्षररूपात् शब्दतत्त्वात् जायते इति स्थापयति। ब्रह्म एव प्रपञ्चरूपेण परिवर्तते। शब्दब्रह्मणः प्राप्त्युपायः वेद एव। वेदज्ञानाय व्याकरणस्याध्ययनं कार्यमेव। पुनः व्याकरणस्य प्राशास्त्यं विशदयति। प्रणवरूपेण वर्तमानं व्याकरणदर्शनं सत्या विद्या एव। सर्वे विद्याभेदाः शब्दतत्त्वस्यैव। व्याकरणं सर्वशास्त्रोपकारकं भवति। लौकिकशब्दानां ज्ञानाय व्याकरणाध्ययनं कार्यम्। शब्दे व्यवहारनिमित्तानि वर्ण-पद-वाक्यप्रतीतिजनकानि प्रतिबिम्बानि च ज्ञातुं अस्य शास्त्रस्य पठनमावश्यकम्। शब्दस्य अर्थस्य सम्बन्धस्य च नित्यताम् आचार्यः समर्थयति। शब्दस्य साधुताम् निर्णेतुं योग्यानि प्रमाणानि भर्तृहरिः विशदयति।

SGOU

आचार्यश्रेष्ठोऽयं पञ्च प्रमाणानि अङ्गीकृतवान्। तानि प्रत्यक्षम्, अनुमानं, शब्दः, अभ्यासः, अदृष्टं च। शब्द एव आगमप्रमाणम्। अस्मिन्नेकके आगमस्य प्रामाण्यं समर्थयति। तदत्र पश्यामः।

## Keywords

आगमादृते - अव्ययच्छिन्नाः - व्यवस्थिताः - अवस्थादेशकालानां - अनुमानेन प्रसिद्धिः अतिदुर्लभा - विशिष्टद्रव्यसंबन्धे - कुशलैरनुमातृभिः मणिरूप्यादि विज्ञानं -पितृरक्षपिशाचानां - कर्मजाः।

## Discussion

**श्लोकः 30**

**न चागमादृते धर्मः तर्केण व्यपदिष्टते।**
**ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।।३०।।**

**पदच्छेदः** - चागमादृते - च + आगमात् + ऋते।
यज्ज्ञानं -यत् +ज्ञानं।
तदप्यागमपूर्वकम् -तत् +अपि +आगमपूर्वकम्।

आगमप्रमाणस्य विशेषता

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| धर्मः आगमात् ऋते | धार्मिकं व्यवहारज्ञानम् आगम प्रमाणात् विना |
| तर्केण न व्यपदिष्टते | हेतुवादेन न व्यवस्थां कर्तुं शक्यते। |
| ऋषीणामपि यत् तदपि | महर्षीणामपि यत् अतीन्द्रियज्ञानं भवति। |
| आगमपूर्वकं भवति | आगमप्रमाणेनैव। |

**सारः** - धार्मिकं व्यवहारज्ञानं तर्केण व्यवस्थां कर्तुं न शक्यते। ऋषीणां यत् ज्ञानं तदपि आगमपूर्वकमेव। अनुमानप्रमाणेन शब्दस्य साधुतां

व्यवस्थापयितुं न शक्यते । व्याकारणागमेन शब्दसाधुत्वं निर्णेतुं शक्यते।

**श्लोकः 31**

**धर्मस्य चाव्यवच्छिन्नाः पन्थानो ये व्यवस्थिताः।**
**न तां लोकप्रसिद्धात्वात् कश्चित्तर्केण बाधते ।।३१।।**

**पदच्छेदः -** चाव्यवच्छिन्नाः - च + अव्यवच्छिन्नाः।
पन्थानो ये - पन्थानः + ये।
कश्चित्तर्केण - कश्चित् +तर्केण

तर्केण आगमप्रमाणं न बाध्यते

| अन्वयः | अन्वयार्थः |
|---|---|
| धर्मस्य ये पन्थानः | धर्मप्रतिपत्युपायाः श्रुति स्मृत्यादयः ये मार्गाः सन्ति। |
| (ते) अव्यवच्छिन्नाः व्यवस्थिताः च | ते मार्गाः विच्छेदरहिताः प्रसिद्धाः च भवन्ति। |
| लोकप्रसिद्धत्वात् तान् | शिष्टाचारैः प्रसिद्धत्वात् तान् मार्गान् |
| कश्चित् तर्केण न बाधते | केनापि हेतुवादेन निषेद्धुं न शक्यते। |

**सारः -** श्रुतिस्मृतिभिः मार्गैः शिष्टाः धर्माचरणां कुर्वन्ति । श्रुतिस्मृतयः आगमे अन्तर्भूताः भवन्ति। आगमोक्तानां वचसाम् प्रसिद्धत्वात् सफलत्वाच्च आगमप्रमाणं निषेध्युं केनापि न शक्यते।

**श्लोकः 32**

**अवस्थादेशकालानां भेदात् भिन्नासु शक्तिषु**
**भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ।।३२।।**

**पदच्छेदः -** प्रसिद्धिरतिदुर्लभा -प्रसिद्धिः + अतिदुर्लभा।

पदार्थगुणानां अवस्थादेशकालभेदेऽपि अनुमानेन आगमं बाधितुं न शक्यते

| अन्वयः | अन्वयार्थः |
|---|---|
| भावानां शक्तिषु | पदार्थानां शक्तयः भिन्नभिन्नाः भवन्ति |
| अवस्थादेशकालानां भेदात् | अवस्थाश्च देशश्च कालश्च अवस्थाकालः तेषामिति द्वन्द्वः इतरेतरः, भिन्नतां कारणात् |

| | |
|---|---|
| अनुमानेन (तेषां) प्रसिद्धिः | अनुमानप्रमाणेन पदार्थानां स्वरूपज्ञानं |
| अतिदुर्लभाम् | निर्णेतुं नितरां दुर्लभमेव। |

**सारः** - पदार्थानां गुणेषु स्वरूपं - स्थानकालभेदात् व्यतियानं संभवन्ति। तथापि अनुमानेन तेषां स्वरूपनिर्णयः दुष्कर एव। पदार्थस्य वस्तुनः वा स्वरूपमनुमानेन निर्णेतुं न शक्यते। बीजानि प्ररोहन्ति। किन्तु सर्वाणि बीजानि पक्वाभावात् प्राणिनां बाध्या वा न प्ररोहन्ति। अत्र अवस्थाभेदः। जले शीतत्वमस्ति । किन्तु पर्वतात् लावारूपेण प्रसृतस्य जलस्योष्णमेव। अत्र देशभेदः। हेमन्ते कूपजलस्य अल्पतया उष्णत्वं वर्तते। अत्र कालभेदः। अनुमानेन पदार्थानां गुणनिर्णयः न साध्यः।

**श्लोकः 33**

**निर्ज्ञातशक्तेर्द्रव्यस्य तां तामर्थक्रियां प्रति।**
**विशिष्टद्रव्यसंबन्धे सा शक्तिः प्रतिबध्यते॥ ३३ ॥**

अन्यवस्तुनः सम्पर्केण पूर्वस्थितवस्तुनः स्वरूपे व्यतियानमायाति

**पदच्छेदः** - निर्ज्ञातशक्तेर्द्रव्यस्य -निर्ज्ञातशक्तेः +द्रव्यस्य।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| तां ताम् अर्थक्रियां प्रति | तत्तत्पदार्थानां योग्ये गुणविशेषकार्ये |
| निर्ज्ञातशक्तेः द्रव्यस्य | निर्णीतशक्तेः द्रव्यस्य (अस्य पदार्थस्य अयं गुणः इति निर्णीतस्य द्रव्यस्य) |
| सा शक्तिः - | स्वरूपप्रकटनरूपा शक्तिः। |
| विशिष्टद्रव्यसंबन्धे | विशिष्टपदार्थसम्पर्के |
| प्रतिबाध्यते | बाध्यते। |

**सारः** - अस्य पदार्थस्य अयं गुणः इति द्रव्यस्य गुणत्वं निर्णीतम्। तस्मिन् पदार्थे अन्यपदार्थस्य सम्पर्केण पूर्वगुणं बाधते।

**श्लोकः 34**

**यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।**

**अभियुक्ततरैरन्यैः अन्यथैवोपपाद्यते ।।३४॥**

**पदच्छेदः -** यत्नेनानुमितोऽप्यर्थः - यत्नेन + अनुमितः + अपि + अर्थः।
कुशलैरनुमातृभिः - कुशलैः + अनुमातृभिः।

अभियुक्ततरैरन्यैः - अभियुक्ततरैः + अन्यैः।
अन्यथैवोपपाद्यते - अन्यथा + एव + उपपाद्यते।

तत्वनिर्णये अनुमानमसङ्गतमिति सूचयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| कुशलैः अनुमातृभिः | समर्थैः अनुमानप्रमाणाङ्गीकृतैः आचार्यैः |
| यत्नेन अनुमितोऽप्यर्थः | प्रयत्नेन अनुमितानि तत्वान्यपि |
| अन्यैः अभियुक्ततरैः | अपरैः पण्डितप्रवरैः |
| अन्यथैव उपपद्यते | भिन्नरीत्या प्रतिपाद्यते। |

**सारः -** अनुमानेन तत्त्वमङ्गीकर्तुं न शक्यते। जगतः कारणं प्रधानम् इति केचनाचार्याः। परमाणुरेव जगत्कारणमिति कणादयः। अनुमान-वादिभिः पण्डितैरपि शब्दतत्वस्य कारणं स्पष्टीकर्तुं न शक्यते।

**श्लोकः 35**

**परेषामसमाख्येयम् अभ्यासादेव जायते।**

**मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम् ।।३५॥**

**पदच्छेदः -** अभ्यासादेव - अभ्यासात् +एव।

नानुमानिकम् - न + अनुमानिकम्।

ऋषिश्रेष्ठाः ज्ञानदृष्टेरभ्यासेन शब्दं निर्णयन्ति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| परेषाम् असमाख्येयं | अन्येषां निर्वचितुमसाध्यं |
| मणिरूप्यादिविज्ञानं | रत्नरजतादीनां मूल्यनिर्णय पाटवं |
| तद्विदाम् अभ्यासादेव | रत्नमूल्यापरीक्षकाणां बहुकालतः परिचयादेव |
| जायते, नानुमानिकं | निश्चिनोति , न तु अनुमानेन। |

**सारः** ऋषयः ज्ञानदृष्टेरभ्यासेन शब्दस्य साधुत्वमङ्गीकुर्वन्ति। रत्नपरीक्षकाः रत्नरजतादीनां मूल्यं निरन्तरेण अभ्यासेन जानन्ति तद्वत्।

**श्लोकः 36**

**प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः**
**पितृरक्षपिशाचानां कर्मजा एव सिद्धयः॥ ३६॥**

**पदच्छेदः -** कर्मजा एव - कर्मजाः + एव।

प्रत्यक्षानुमानाभ्यामसाध्यं कार्यमदृष्टप्रमाणेन ज्ञातुं शक्यते

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| प्रत्यक्षं अनुमानं च | प्रत्यक्षानुमाने प्रमाणे |
| व्यतिक्रम्य व्यवस्थिताः | उल्लङ्घ्य वर्तमानाः |
| पितृरक्षः पिशाचानां | पितृणां रक्षसां पिशाचानां च |
| सिद्धयः | दर्शनमन्तर्धानादिसिद्धयः |
| कर्मजा एव (भवन्ति) | कर्माधीनाः अदृष्टशक्ति विशेषाः एव। |

**सारः -** पितृणां रक्षसां पिशाचादीनां च सिद्धयः कर्माधीनादृष्टशक्तिविशेषाः एव। प्रत्यक्षेण अनुमानेन वा ताः सिद्धीः ज्ञातुं न शक्यते। यथार्थतः पितृरक्षपिशाचानां कर्मणि च न सन्ति। अपूर्वा काचन अद्भुतसिद्धिः केषाञ्चित् जनानां सन्ति इति प्राचीनानां कश्चन विश्वासः वर्तन्ते।

## Summarised Overview

जगतः सर्वे व्यवहाराः अक्षररूपात् शब्दतत्वात् जायन्ते। ऋषीणां ज्ञानमागमपूर्वकम्। अनुमानप्रमाणेन शब्दस्य साधुतां व्यवस्थापयितुं न शक्यते। व्याकारणागमेन शब्दसाधुत्वं निर्णेतुं शक्यते। तर्केण आगमप्रमाणम् न बाध्यते। पदार्थगुणानां अवस्थादेशकालभेदेऽपि अनुमानेन आगमं बाधितुं न शक्यते। अनुमानेन तत्त्वमङ्गीकर्तुं न शक्यते। जगतः कारणं प्रधानम् इति केचनाचार्याः।

परमाणुरेव जगत्कारणमिति कणादायः। अनुमान- वादिभिः पण्डितैरपि शब्दतत्वस्य कारणं स्पष्टीकर्तुं न शक्यते। ऋषयः ज्ञानदृष्टेरभ्यासेन शब्दस्य साधुत्वमङ्गीकुर्वन्ति। रत्नपरीक्षकाः रत्नरजतादीनां मूल्यं निरन्तरेण अभ्यासेन जानन्ति तद्वत्। जगत्कारणविषये भिन्नाः मताः।

## Assignments

**I. उत्तरत।**

1. तपसामुत्तमं तपः किम्?
2. ऋषीणां ज्ञानं कीदृशम्?
3. धर्मस्य पन्थानः कीदृशः?
4. केन पूर्वस्थितवस्तुनः स्वरूपे व्यतियानमायाति ?
5. पितृरक्षःपिशाचादीनां सिद्धिज्ञानार्थमुपयुज्यमानं प्रमाणं किम् ?
6. परेषामसमाख्येयम् अभ्यासादेव जायते।
   मणिरूप्यादिविज्ञानं तद्विदां नानुमानिकम्। कारिका व्याख्यात।
7. प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः।
   पितृरक्षपिशाचानां कर्मजा एव सिद्धयः॥ कारिका व्याख्यात।
8. आगमप्रमाणस्य प्रामाण्यम्।

## Suggested Readings


1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002


SGOU

2. Dr. K chandrashekharan Nair, Vakyapadeeyam Brahmakanda, sunilpriya Malayalam commentary, Jai Karthika Books, Tiruvanatapuram, 2000

## References

1. भर्तुहरिः वाक्यपदीयम्
2. पण्डितरघुनाथशर्म, वाक्यपदीयम्, ब्रह्मकाण्डंव्याख्याद्वयोपेतम्, सम्पूर्णानन्तविश्वविद्यालयः, वारणासि1988

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# आगमप्रमाणस्य श्रेष्ठत्वम्

## Learning Outcomes

- भर्तृहरिं वाक्यपदीयं चाधिकृत्य जानाति।
- शब्दब्रह्मस्वरूपं जानाति।
- वाक्यपदीये सूचितानि प्रमाणान्यधिकृत्य सामान्यज्ञानमार्जयति।
- आगमप्रमाणस्य श्रेष्टत्वमवगच्छति।

## Background

वेदज्ञानमिव वेदमुखस्य व्याकरणस्याध्ययनं नितरामावश्यकम्। वैयाकरणाचार्येषु प्रमुखः आसीत् भर्तृहरिः। तस्य वाक्यपदीयं स्फोटसिद्धान्तस्य महिमातिशयं विविधरूपैः प्रपञ्चे अस्मिन् प्रतिभाति। प्रणवरूपेण वर्तमानं व्याकरणदर्शनं सत्या विद्या एव। शब्दे व्यवहारनिमित्तानि वर्ण -पद -वाक्यप्रतीतिजन्यानि प्रतिबिम्बानि वेदस्वरूपं च ज्ञातुं व्याकरणशास्त्रस्य पठनमावश्यकम्। शब्दस्य साधुतां निर्णेतुं योग्यानि प्रमाणानि भर्तृहरिः विशदयति। तेन महात्मना पञ्च प्रमाणानि अङ्गीकृतानि। तानि प्रत्यक्षम्, अनुमानं, शब्दः, (आगमः )अभ्यासः, अदृष्टं च।

प्रमाणेषु आगमप्रमाणमेव श्रेष्टम्। आर्षज्ञानं ऋषिपरम्परया सिद्धमेव। अतः प्रत्यक्षं न। अपि च प्रत्यक्षस्य इन्द्रियार्थसन्निकर्षः आवश्यक एव। अनुमानं तु साहचर्यजन्यज्ञानकरणमेव।

SGOU

सदृशजन्यज्ञानकरणमुपमानम्। अतः आर्षज्ञानं आगमप्रमाणे अन्तर्भवतीति समर्थयति वाक्यपदीयकारः। अस्मिन्नेकके तत्कार्यमत्र वर्णयति। प्रविश्यामः तत्र।

## Keywords

अतीतानागताज्ञानम् - असंवेद्यान् - प्रत्यक्षपक्षे - शास्त्रप्रयोजनम् - अविच्छेदन अनुमानप्रधानेन विनिपातः अकृतकं शास्त्रम्।

## Discussion

**श्लोकः 37**

**आविर्भूतप्रकाशनाम् अनुपप्लुतचेतसाम्।**
**अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।।३७ ॥**

आर्षज्ञानस्य विशेषतां प्रकाशयति

**पदच्छेदः** - प्रत्यक्षान्न - प्रत्यक्षात् + न।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अनुपप्लुतचेतसाम् | रागद्वेषादिविमुक्तचित्तानां |
| आविर्भूतप्रकाशानां | प्रकाशरूपेण व्यक्तीकृतानां ऋषीणां |
| (यत् )अतीतानागतज्ञानं | यत् भूतभविष्यत्कालज्ञानं |
| (तत् ) प्रत्यक्षात् न विशिष्यते | तत् प्रत्यक्षज्ञानात् न व्यतिरिक्तम्। |

**सारः** - ऋषयः सत्यद्रष्टारः। तपोऽनुष्ठानेन अन्तःकरणे निपतितं सत्यं ते अस्मभ्यं वितरन्ति। तदेव आर्षज्ञानम्। अत भूतभविष्यत्कालसम्बन्धि कार्यं प्रत्यक्षमिव पश्यन्ति, जानन्ति च। तत् प्रत्यक्षप्रमाणमिव भवति।

**श्लोकः 38 -**

**अतीन्द्रियान् असंवेद्यान् पश्यन्त्यार्षेण चक्षुषा।**
**ये भावान् वचनं तेषां नानुमानेन बाध्यते ।।३८॥**

**पदच्छेदः** - पश्यन्त्यार्षेण - पश्यन्ति + आर्षेण।
नानुमानेन - न + अनुमानेन।

ऋषीणां वचनम् अनुमानेन न बाध्यते

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अतीन्द्रियान् असंवेद्यान् | इन्द्रियरसग्राह्यान् अनुमानादिभिरग्राह्यान् |
| भावान् ये (ऋषयः) | पदार्थान् ये ऋषयः |
| आर्षेण चक्षुषा पश्यन्ति | योगसिद्धियुक्तेन नेत्रेण अवलोकयन्ति । |
| तेषां वचनं | तेषामृषीणा वाक्। |
| अनुमानेन न बाध्यते | अनुमानप्रमाणेन न बाध्यते। |

**सारः** - इन्द्रियार्थसन्निकर्षं विना ऋषयः ज्ञानदृष्ट्या पदार्थान् पश्यन्ति। तेषां ऋषीणां वचनं प्रत्यक्षमेव। अतः आर्षज्ञानम् अनुमानेन न बाध्यते।

**श्लोकः 39**

**यो यस्य स्वमिव ज्ञानं दर्शनं नातिशङ्कते।**
**स्थितं प्रत्यक्षपक्षेता तं कथमन्यो निवर्तयेत् ।।३९॥**

ऋषिप्रयोक्तकार्याणि स्वानुभवजन्यानि भवन्ति

**पदच्छेदः** - यो यस्य - यः + यस्य।
नातिशङ्कते - न + अतिशङ्कते।
अन्यो निवर्तयेत् -अन्यः + निवर्तयेत्।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यः स्वं ज्ञानमिव | यः जनः स्वस्य प्रत्यक्षं ज्ञानमिव |
| यस्य दर्शनं नातिशङ्कते | यस्य योगिनः ज्ञानं न शङ्कते |
| प्रत्यक्षपक्षे स्थितं तं | प्रत्यक्षमेव स्वस्य ज्ञानमिति धरन्तं तं |

| | |
|---|---|
| अन्यः कथं निवर्तयेत् | अन्येन कथं निवारयितुं शक्यते। |

**सारः** - यः जनः एकं कार्यं स्वयमनुभूय संशयरहितं निश्चयं प्राप्नोति। तं कथं तर्केण प्रतिनिवर्तयितुं शक्यते। ऋषयः यथार्थवक्तारः। तेषां भूतभविष्यज्ज्ञानं प्रत्यक्षमेव। ऋषीणां प्रत्यक्षज्ञाने इन्द्रियार्थसन्निकर्षः नावश्यकः। अतः ऋषिप्रोक्तकार्याणि स्वानुभवजन्यानि।

**श्लोकः 40**

**इदं पुण्यं इदं पापं इत्येतस्मिन् पदद्वये**

**आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ।।४०॥**

धर्माधर्मव्यवस्था पुण्यपापव्यवस्था च आगममूलका एव

**पदच्छेदः** - इत्येतस्मिन् - इति + एतस्मिन्

| अन्वयः | अन्वयार्थः |
|---|---|
| इदं पुण्यं इदं पापं इति | इदं पुण्यमेव इदं पापमेव इति |
| एतस्मिन् पदद्वये | एतस्मिन् कार्यद्वये अपि |
| आचण्डालं मनुष्याणां | चण्डालपर्यन्तानां मानवानां |
| अल्पं शास्त्रप्रयोजनं (अस्ति) | शास्त्राय प्रयोजनम् अल्पमेव |

**सारः** - पुण्यपापविवेकः ऋषिवचनेन जायते (अनुमानेन ज्ञातुं न शक्यते)। आगमप्रमाणेन साध्यमेव। पण्डिताः पामराः च आगमप्रमाणमेव आश्रयन्ते।

**श्लोकः 41**

**चैतन्यमिव यश्चायमविच्छेदेन वर्तते।**

**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ।।४१॥**

अपौरुषेयमागमप्रामाण्यं हेतुवादेन न बाध्यते

**पदच्छेदः** - यश्चायं - यः +च + अयम्।
आगमस्तमुपासीनो हेतुवादैः - आगमः + तम् + उपासीनः + हेतुवादैः।
हेतुवादैर्न - हेतुवादैः + न।

| अन्वयः | अन्वयार्थः |
|---|---|
| यः चायमागमः | सर्वैरङ्गीकृतमिदमागमप्रमाणं |
| चैतन्यमिव | अनाद्यन्तः चेतनास्वरूपः इव |

| | |
|---|---|
| अविच्छेदेन वर्तते | अभङ्गतया वर्तते। |
| तम् उपासीनः हेतुवादैः | स्वयं प्रमाणं तद् आगम-प्रमाणं स्वीकरिष्यन् वैकारणः तर्केण |
| न बाध्यते | न प्रबाध्यते। |

**सारः** - आगमः अपौरुषेयः। तस्य अनाद्यनन्तत्वं वर्तते। श्रुतिस्मृतिस्वरूप आगमः चैतन्यमिव वर्तते। आगमोपासकः वैयाकरणः हेतुवादैः न बाध्यते।

**श्लोकः 42**

**हस्तस्पर्शादिवान्धेन विषमे पथि धावता।**
**अनुमानप्रधानेन विनिपातो न दुर्लभः ।।४२ ॥**

अनुमानप्रमाणस्वीकरणे दोषः वर्तते

**पदच्छेदः** - हस्तस्पर्शादिवान्धेन - हस्तस्पर्शात् + इव + अन्धेन।
विनिपातो न - विनिपातः + न।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| विषमे पथि हस्तस्पर्शात् | दुर्घटे मार्गे करस्पर्शात् |
| धावता अन्धेन इव | मार्गैकदेशं ज्ञात्वा सर्वं सुकरमिति विचार्य धावता अदृशा (चक्षुर्द्वयहीनेन )इव |
| अनुमानप्रधानेन | अनुमानप्रमाणकप्रामाण्यं ददता |
| विनिपातः न दुर्लभः | पतनमनिवार्यमेव। |

**सारः** - यः आगमप्रमाणं न मानयन् अनुमानप्रमाणमङ्गीकरोति तस्य दुर्घटं पतनं संभविष्यति। अन्धः हस्तस्पर्शनात् सर्वं सम्मतमिति विचार्य धावति चेत् तस्य पतनं जायते तद्वदिव।

**श्लोक : 43**

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।**
**आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम् ।।४३ ॥**

**पदच्छेदः** - आश्रित्यारभ्यते - आश्रित्य +आरभ्यते।

| अन्वयः | अन्वयार्थः |
|---|---|
| तस्मात् | तेन कारणेन (अनुमानस्य सुव्यवस्थाभावात्) |
| अकृतकं शास्त्रं | (अनित्यशास्त्रं) अपौरुषेयं शास्त्रं |
| सनिबन्धनां स्मृतिं च | आप्तेभ्यः लब्धं स्मृतिं च । |
| आश्रित्य शिष्टैः | अवलम्ब्य वैकारणैः पाणिन्याद्यैः |
| शब्दानुशासनम् आरभ्यते | व्याकरणशास्त्रप्रणयनं क्रियते । |

आगमप्रमाणस्य समादरणीयत्वं सूचयति

**सारः** - अनुमानप्रमाणस्य सुव्यवस्थाभावात् अपौरुषेयेऽस्मिन् आगम-शास्त्रे विश्वासः कार्यः आप्तपरम्परया प्राप्तां स्मृतिं च आश्रित्य वैयाकरणाचार्यैः पाणिनि-वररुचि-पतञ्जल्यादिभिः रचितं शब्दानुशासनं (व्यकारणं) विरच्यते ।

## Summarised Overview

भर्तृहरेः वाक्यपदीये शब्दस्य साधुताम् निर्णेतुं योग्यं प्रमाणमेव आगमः। यः जनः एकं कार्यं स्वयमनुभूय संशयरहितं निश्चयं प्राप्नोति । तं कथं तर्केण प्रतिनिवर्तयितुं शक्यते। अनुमानप्रमाणस्वीकरणे दोषः वर्तते ।आगमः अपौरुषेयः। तस्य अनाद्यनन्तत्वं वर्तते। श्रुतिस्मृतिस्वरूप आगमः चैतन्यमिव वर्तते। आगमोपासकः वैयाकरणः हेतुवादैः न बाध्यते। विषमे मार्गे केवलेन हस्तस्पर्शेन सर्वं सुगममिति विचिन्त्य धावन् अन्धः गर्ते निपतेत्। तथा आगमप्रमाणं विना साध्वसाधुचिन्ता, सत्यासत्यव्यवस्था, धर्माधर्मरीतिः, वा ज्ञातुं न शक्यते। अतः अपौरुषेयमागमशास्त्रं आप्तपरम्परया लब्धां स्मृतिं चाश्रित्य शिष्टाः वैयाकरणाचार्यः शब्दानुशासनं रचितवन्तः।

## Assignments

**I. प्रश्नाः -**

1. प्रत्यक्षान्न विशिष्यते -किम् ?
2. सर्वैरङ्गीकृतं प्रमाणं किम् ?
3. 'इत्येतस्मिन् पदद्वये -पदद्वयं किम् ?
4. अनुमानप्रधानेन विनिपातो न दुर्लभः -किमिव ?
5. शिष्टानां त्रयाणां वैयाकरणाचार्याणां नामानि लिखत।

**II. टिप्पणीं लिखत-**

1. आर्षज्ञानस्य महत्वम्।
2. तेषां वचनं नानुमानेन बाध्यते -आशयं विशदयत।
3. आगमस्तमुपासीनो हेतुवादः न बाध्यते -आशयं स्पष्टयत।
4. हस्तस्पर्शादिवान्धेन विषमे पथि धावता।

   अनुमानप्रधानेन विनिपातो न दुर्लभः॥ कारिका व्याख्यायत।

**III. निबन्धात्मकः प्रश्नः**

1. आगमप्रमाणस्य प्राधान्यं विशदयत।

## Suggested Readings


1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002
2. Dr. K chandrashekharan Nair, Vakyapadeeyam Brahmakanda, sunilpriya Malayalam commentary, Jai Karthika Books, Tiruvanatapuram, 2000

# References

1. पण्डितरघुनाथशर्म, वाक्यपदीयम्, ब्रह्मकाण्डंव्यारव्याद्वयोपेतम्, सम्पूर्णानन्तविश्वविद्यालयः, वारणासि 1988
2. भर्तुहरिः वाक्यपदीयम्।

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# शाब्दभेदाः शब्दे अनेकधर्मारोपश्च

## Learning Outcomes

- व्याकरणदर्शनस्य प्राधान्यं जानाति।
- वाक्यपदीयस्य कारिकाभिः परिचयं सम्पादयति।
- शाब्दप्रमाणस्य सविशेषतां गृह्णाति।
- शाब्दभेदान्, शब्दे अनेकधर्मारोपान् च जानाति।

## Background

'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्' इत्यनया कारिकया वाक्यपदीयरचना आरब्धा। शब्दब्रह्मणः प्राप्त्युपायः वेद एव। वेदज्ञानाय व्याकरणशास्त्रपठनं कार्यम्। वेदस्य प्रामाण्यतां निर्णेतुं योग्येषु प्रमाणेषु शब्दः नितरां प्राधान्यमर्हति। ऋषीणामपि ज्ञानम् आगमपूर्वकम्। शब्दज्ञानेन स्वीकर्त्तुं योग्यं कार्यं तर्केण न बाध्यते। अनुमानप्रमाणेनापि वेदमाहात्म्यं दूरीकर्तुं न शक्यम्। आर्षचक्षुषाम् ऋषीणां ज्ञानमनुमानेन निर्णेतुं न शक्यते। तेषां भूतभविष्यत्कालज्ञानं प्रत्यक्षज्ञानमिव भवति। तदर्थं तेभ्यः इन्द्रियार्थसन्निकर्षस्यावश्यकता न। ऋषिप्रोक्तं कार्यं स्वानुभवजन्यमेव।

पुण्यपापविवेकमपि अनुमानेन निर्णेतुमसाध्यमेव। आगमप्रमाणेमेव तादृशकार्येणां निर्णायकोपाधिः। श्रुतिस्मृति स्वरूपः आगमः अनादिकालादाभ्य शिष्टपरम्परया अनवरतं भङ्गं विना

चैतन्यरूपेण वर्तते। विषमे मार्गे केवलेन हस्तस्पर्शेन सर्वं सुगममिति विचिन्त्य धावन् अन्धः गर्ते निपतेत्। तथा आगमप्रमाणं विना साध्वसाधुचिन्ता, सत्यासत्यव्यवस्था, धर्माधर्मरीतिः, वा ज्ञातुं न शक्यते। अस्मिन्नेकके शब्दभेदान् अनेकधर्मारोपान् च भर्तृहरिः कतिपयाभिः कारिकाभिः विशदयति।

## Keywords

उपादानशब्देषु द्वौ शब्दौ - तयोः आत्मभेदः शब्दः बुद्धिस्थश्रुतीनां कारणं - ध्वनिना सोऽनुगम्यते - नादस्य क्रमजन्मत्वात् प्रतिबिम्बं यथान्यत्र आत्मरूपं ज्ञेयरूपं च - अण्डभावमापन्नः - त्रितयं शब्दे - प्रयोक्तुः बुद्धिः प्राक्।

## Discussion

**श्लोकः 44**

**द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।**
**एको निमित्तं शब्दानां अपरोऽर्थे प्रयुज्यते॥ ४४॥**

**पदच्छेदः** - द्वावुपादानशब्देषु - द्वौ + उपादानशब्देषु।
शब्दविदो विदुः - शब्दविदः+ विदुः।
एको निमित्तं - एकः + निमित्तं।
अपरोऽर्थे - अपरः +अर्थे।

शब्दस्य द्वैविध्यं सूचयति

| अन्वयः | अन्वयार्थः |
|---|---|
| उपादानशब्देषु द्वौ शब्दौ | वाक् रूपेषु व्यङ्ग्यव्यञ्जकरूप द्वौ शब्दौ स्तः इति। |
| शब्दविदः विदुः | शब्दशास्त्रपण्डिताः वदन्ति। |
| एकः शब्दानां निमित्तं | तयोरेकः ध्वनिरूपस्य वैखरी शब्दकारणं |

अपरः अर्थ, प्रयुज्यते | द्वितीयः अर्थबोधाय उच्चार्यते

**सारः** - शब्दः द्विविधः - उपादान- अनुपादानभेदात्। मनुष्यैः उपयुज्यमानाः शब्दाः उपादानशब्दाः पशु खगादीनां वीणामृदङ्गादीनां च शब्दाः अनुपादानाः भवन्ति। उपादानशब्दाः द्विविधाः व्यङ्ग्य-व्यञ्जकभेदात्। शब्दस्य श्रवणेन्द्रियविषया शब्दशक्तिः, बुद्धिविषया अर्थशक्तिः च वर्तते।

**श्लोकः 45**

**आत्मभेदस्तयोः केचित् अस्तीत्याहुः पुराणगाः।**
**बुद्धिभेदादभिन्नस्य भेदमेके प्रचक्षते ॥४५॥**

**पदच्छेदः** - आत्मभेदस्तयोः - आत्मभेदः + तयोः।

अस्तीत्याहुः - अस्ति + इति + आहुः।

बुद्धिभेदादभिन्नस्य - बुद्धिभेदात् + अभिन्नस्य।

शब्दस्य स्वरूपभेदे भिन्नाभिप्रायमस्ति इति सूचयति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| केचित् पुराणगाः | केचन कार्यकारणयोः भेदवादिनः प्राचीनाः |
| तयोः आत्मभेदः | तयोः निमित्तप्रातिपदिकयोः स्फोटवैखर्योः भेदः। |
| अस्तीत्याहुः | अस्तीति वदन्ति। |
| एके बुद्धिभेदात् | अपरे केचन प्रयोक्तुः श्रोतुः च बुद्धिभेदात् (ज्ञानभेदात्) |
| अभिन्नस्य भेदं प्रचक्षते | एकस्यैव शब्दस्य नानात्वं स्वीकुर्वन्ति। |

**सारः** - शब्दः द्विविधः। उच्चारणात्पूर्वं वक्तुः बुद्धौ जातः शब्दः एकः। उच्चारणानन्तरं श्रोतुः बुद्धौ जातः द्वितीयप्रकारकः शब्दः। केचन वक्तुः बुद्धौ जातस्य कारणशब्दस्य श्रोतुः बुद्धौ जातस्य कार्यशब्दस्य च स्वरूपभेदमस्तीति वदन्ति। कार्यकारणयोरभेदवादिनः एकस्यैव

शब्दस्य मनोग्राह्यः स्फोटः श्रोत्रग्राह्या वैखरि इत्येवं रूपं नानात्वं प्रचक्षते, न स्वतः इति।

**श्लोकः 46**

**अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।**
**तद्वच्छब्दोऽपि बुद्धिस्थ श्रुतीनां कारणं पृथक् ॥ ४६ ॥**

**पदच्छेदः** - तद्वच्छब्दोऽपि - तद्वत् + शब्दः + अपि।

वक्तुः बुद्धौ जातस्य शब्दस्य, अर्थरूपेण श्रोतुः बुद्धौ जातस्य शब्दस्य च कार्यकारणभावभेदः वर्तते इत्येकः पक्षः

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा अरणिस्थं ज्योतिः | येन प्रकारेण अग्न्युत्पादके अरणिवृक्षे स्थितः वह्निः। |
| प्रकाशान्तरकारणां | घर्षणकाले अन्यस्य प्रकाशस्य कारणं भवति। |
| तद्वत् बुद्धिस्थः शब्दोऽपि | तथा प्रयोक्तुः बुद्धिस्थः स्फोटः |
| पृथक् श्रुतीनां कारणं | उच्चारणकाले भिन्नभिन्न शब्दानां कारणं भवेत्। |

**सारः** - प्रयोक्तुः बुद्धिस्थः शब्द एव उच्चारणसमये परश्रवणगोचरस्य शब्दस्य कारणं भवति। अरणिवृक्षे स्थितः वह्निरेव घर्षणसमये दीप्तं तथा यागस्थस्य अग्नेः कारणं च। तद्वदेव बुद्धौ वर्तमानः शब्दः स्वयं प्रकाशते। अन्यान् शब्दान् प्रकाशयति च।

**श्लोकः 47**

**वितर्कितः पुरा बुद्ध्या क्वचिदर्थे निवेशितः।**
**करणेभ्यो विवृत्तेन ध्वनिनासोऽनुगृह्यते ॥ ४७ ॥**

**पदच्छेदः** - क्वचिदर्थे - क्वचित् + अर्थे।

करणेभ्यो विवृत्तेन - करणेभ्यः + विवृत्तेन।

ध्वनिनासोऽनुगृह्यते - ध्वनिना + सः + अनुगृह्यते।

शब्दस्य अर्थेन साकम्, अर्थस्य शब्देन साकं च तादात्म्यं वर्तते

| अन्वयः | अन्वयार्थः |
|---|---|
| पुरा क्वचित् अर्थे | उच्चारणात्पूर्वम् उद्दिष्टार्थं बोधयितुं समर्थोऽयमिति। |
| वितर्कितः | सुदृढनिश्चयानन्तरं |

| | |
|---|---|
| निवेशितः | उद्दिष्टार्थबोधनसमर्थमिति विचिन्त्य |
| करणेभ्यः विवृत्तेन | कण्ठताल्वादि स्थानकरणेषु सञ्चार्य श्रवणयोग्यतां प्राप्तेन |
| ध्वनिना अनुगम्यते | नादेन श्रोत्रेन्द्रियविषय- माप्नोति। |

**सारः** - आशयमुद्दिश्य शब्दान् प्रकटयितुं सन्नद्धः भवति। तदा नियतार्थमनेन शब्देन जायते वा इति विचार्य नियतार्थसिद्ध्यर्थं नियत शब्दान् उच्चारितुं सन्नद्धो भवति। तदर्थं शब्दान् कण्ठताल्वादिस्थानेषु सञ्चारितुं वायुं प्रेरयति। ध्वनिसाहाय्येन शब्दस्य पक्कतां सिद्ध्यति।

**श्लोकः 48**

**नादस्य क्रमजन्मत्वात् न पूर्वो नापरश्च सः।**
**अक्रमः क्रमरूपेण भेदवानिव जायते ॥४८॥**

व्यवहारे शब्दनानात्वेऽपि सर्वे भेदाः व्यञ्जकध्वनेरेव

**पदच्छेदः** - पूर्वो नापरश्च - पूर्वः + न + अपरः + च
भेदवानिव - भेदवान् + इव।

| अन्वयः | अन्वयार्थः |
|---|---|
| सः न पूर्वः | बुद्धिस्थः स्फोटरूपः शब्दः न पूर्वः |
| न अपरः अक्रमः | नापरः क्रमरहितश्च |
| नादस्य क्रमजन्मत्वात् | तथापि तस्य नादस्य क्रमेण उत्पत्ति स्वभावात् |
| भेदवान् इव क्रमरूपेण जायते | भिन्नानिव पूर्वापरक्रमानुसारं संजायते |

**सारः** - प्रयोक्तुः सकाशात् ध्वनयः क्रमेण जायन्ते। वायोः कण्ठताल्वादिषु स्पर्शनानुसारं वर्णं श्रवणगोचरो भवति। यथार्थतः शब्दमुच्चरितुं न शक्यते। शब्दस्यार्थबोधकं ध्वनिमेव उच्चरति। ध्वनिः

क्रमिकः। शब्दः क्रमरहितः। ध्वनयः व्यञ्जकाः शब्दः व्यङ्ग्यं च । व्यञ्जकस्य ध्वनेः धर्मं व्यङ्ग्ये शब्दे आरोपयति।

**श्लोकः 49**

**प्रतिबिम्बं यथान्यत्र स्थितं तोयक्रियावशात्।**
**तत्प्रवृत्तिमिवान्वेति सधर्मः स्फोटनादयोः ॥४९॥**

**पदच्छेदः** - यथान्यत्र - यथा + अन्यत्र।

इवान्वेति - इव + अन्वेति।

व्यञ्जकस्य ध्वनेः क्रमधर्मः व्यङ्ग्ये शब्दे आयाति, तस्य लौकिकदृष्टान्तं सूचयति

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा अन्यत्र स्थितं | यथा दूरस्थितं प्रतिबिम्बं |
| तोयक्रियावशात् | प्रतिबिम्बं जलचलन निमित्तात् |
| तत् प्रवृत्तिं इव अन्वेति | तत् चलनमन्वेति |
| सधर्मः स्फोटनादयोः ध्वनेः | प्रतिबिम्बितचलनं व्यञ्जकस्य व्यङ्ग्यस्य च कार्ये समानधर्मेण युक्तः स्यात् |

**सारः** - चन्द्रस्य प्रतिबिम्बं जलाशये दृश्यते । चन्द्रस्य चलनाभावात् प्रतिबिम्बस्यापि न चलनम्। किन्तु जलतरङ्गे जायमानेन चलनेन प्रतिबिम्बस्य चलनप्रतीतिः जायते। तद्वत् प्रतिबिम्बमिव स्फोटस्य (शब्दस्य) यथार्थतः चलनं न । स्फोटप्रकाशके ध्वनौ वर्तमानः क्रमः स्फोटे वर्तते इति प्रतीतिः जायते। ध्वनेः साहाय्येन शब्दः प्रकाशते इत्यतः ध्वनेः स्वभावः स्फोटस्य इति चिन्ता जायते।

**श्लोकः 50**

यथा ज्ञाने आत्मरूपं ज्ञेयरूपं च वर्तते , तथा शब्दे स्वरूपमर्थरूपं च प्रकाशते

**आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते।**
**अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते॥ ५०॥**

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा ज्ञाने आत्मरूपं | यथा ज्ञाने जाते आत्मनः रूपं (ज्ञानरूपं) |
| ज्ञेयरूपं च दृश्यते | घटादिकं च अवबुध्यते। |

| | |
|---|---|
| तथा शब्दे स्वरूपं | एवमुच्चरिते घटशब्दे शब्दरूपं |
| अर्थरूपं च प्रकाशते | अर्थरूपं घटादिकं च शोभते। |

**सारः** - यथा ज्ञाने जाते आत्मस्वरूपं ज्ञानं, ज्ञेयरूपं घटादिकं च दृश्यते। शब्दश्रवणसमये श्रोता अर्थेन साकं शब्दस्वरूपमपि जानाति।

**श्लोकः - 51**

**आण्डभावमिवापन्नो यः क्रतुः शब्दसंज्ञकः।**
**वृत्तिस्तस्य क्रियारूपा भागशो भजते क्रमम्॥ ५१॥**

**पदच्छेदः** - इवापन्नः - इव + आपन्नः।
वृत्तिस्तस्य - वृत्तिः + तस्य।
भागशो भजते - भागशः + भजते।

क्रमरहिते ध्वनेरन्तःकरणे वर्तमानः शब्दः अर्थबोधने सावयवं ध्वनिरूपेण बहिर्स्फुरति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यः शब्दसंज्ञकः क्रतुः | शब्दरूपं यज्ज्ञानमस्ति |
| आण्डभावमापन्नः इव | तत् अण्डस्थं जीविस्वरूप-मिव वर्तते |
| तस्य क्रियारूपा वृत्तिः | तस्य अप्रत्यक्षीभूता प्रवृत्तिः |
| भागशः क्रमं भजते | अवयवेषु प्रत्यक्षीभूता क्रमं भजते। |

**सारः** - अण्डे प्राणिनः जीवस्वरूपे विद्यमाने सत्यपि प्रत्यक्षतया न दृश्यते। किन्तु जीविनः बहिरागमनसमये अवयवेषु प्रत्यक्षतया प्राणिनः वैभवं शोभां प्रत्यक्षीभवति। एवं क्रमरहितस्य ध्वनेः अन्तःकरणे स्थितः शब्दः अर्थबोधने सावयवं बहिरागच्छति। अक्रमः सक्रमस्य निमित्तं भवति।

**श्लोकः 52**

**यथैक बुद्धिविषया मूर्त्तिराक्रियते पटे।**
**मूर्त्यन्तरस्य त्रितयम् एवं शब्देऽपि दृश्यते॥ ५२॥**

**पदच्छेदः** - यथैकबुद्धिविषया - यथा + एक बुद्धिविषया
मुर्त्तिराक्रियते - मूर्तिः + आक्रियते
शब्देऽपि - शब्दः + अपि

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा एकबुद्धिविषया मूर्तिः | पूर्वं सावयवरूपेण विज्ञाता मूर्तिः पुनः पूर्णज्ञानविषया |
| मूर्त्यन्तरस्य पटे आक्रियते | अन्यस्याः मूर्तेः रूपेण चित्रे यथा चित्रितं तथा |
| एवं त्रितयं शब्देऽपि दृश्यते। | एवम् एतत्त्रयं शब्दकार्येऽपि वर्तते। |

क्रमरहिते ध्वनेरन्तःकरणे वर्तमानः शब्दः अर्थबोधने सावयवं ध्वनिरूपेण बहिर्स्फुरति

**सारः** - चित्रकार्ये इव शब्दकार्ये तिस्रः अवस्थाः सन्ति। चित्रे तु चित्रस्य समग्रं रूपम् आक्रमरूपेण मनसि पश्यति, अक्रमं चित्ररूपं सक्रमं चित्रे आलिखितं, पुनः अक्रमरुपेण चित्रपूर्णतायाम् अवलोकयति । तद्वत् शब्दविषये उच्चारणं, श्रवणम्, अवतरणम् इत्यवस्थाः सन्ति।

**श्लोकः 53**

**यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते।**
**व्यवसायो ग्रहीतॄणां एवं तेष्वेव जायते॥ ५३॥**

**पदच्छेदः** - प्राग्बुद्धिः - प्राक् + बुद्धिः।

शब्देष्वेव - शब्देषु + एव

व्यवसायो ग्रहीतॄणां - व्यवसायः + ग्रहीतॄणां

तेष्वेव - तेषु + एव

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा प्रयोक्तुः बुद्धिः | यथा शब्दं प्रयोक्तुम् इच्छोः मतिः |
| प्राक् शब्देषु एव | प्रथमतया बोधयितुं योग्येषु शब्देषु एव |
| प्रवर्तते | वर्तते। |
| एवं ग्रहीतॄणां व्यवसायः | तद्वत् श्रोतॄणां अर्थावगमनाय वर्तमानमुद्देश्यम् |
| तेषु एव जायते | शब्दविषये एवारभते। |

वक्तरि श्रोतरि च प्रथमं शब्दविषया बुद्धिरेव वर्तते

**सारः**- किञ्चन कार्यं श्रोत्रे दातुमभिलषन् वक्ता, उद्दिष्टार्थं बोधयितुं कः शब्दः प्रयोक्तव्यः इति चिन्तयति। श्रोता तु पूर्वमयं शब्दः मया श्रुतः वेति विचिन्त्य स्मर्तुं यतते। श्रोतुः बुद्धिरपि शब्दविषयिका एव।

**श्लोकः 54**

**अर्थोपसर्जनीभूतान् अभिधेयेषु केषुचित्।**
**चरितार्थान् परार्थत्वात् न लोकः प्रतिपद्यते॥ ५४॥**

शब्दानामर्थे एव बोधः

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| परार्थत्वात् केषुचित् अभिधेयेषु | उच्चरिताः शब्दाः अर्थान् |
| चरितार्थान् | बोधयितुं वर्तमानत्वात् |
| | कतिपयेषु अर्थेषु चरितार्थान् |
| अर्थोपसर्जनीभूतान् | अप्रधानीभूतान् शब्दान् |
| लोकः न प्रतिपद्यते | कार्यतया न गणयति। |

**सारः** - अर्थग्रहणाय एव शब्दप्रयोगः। शब्दाः अर्थानां विशेषणानि। अर्थः विशेष्यः। श्रोतारः अर्थे एव तात्पर्यं प्रकटयन्ति।

## Summarised Overview

भर्तृहरेः वाक्यपदीये ब्रह्मकाण्डे शब्दभेदान् अनेकधर्मारोपान् प्रतिपादयति। वेदस्य प्रामाण्यतां निर्णेतुं योग्येषु प्रमाणेषु शब्दः नितरां प्राधान्यमर्हति। शब्दज्ञानेन स्वीकर्तुं योग्यं कार्यं तर्केण न बाध्यते। पुण्य पापविवेकमपि अनुमानेन निर्णेतुं न शक्यते। वाक् रूपशब्देषु व्यङ्ग्यव्यञ्जकरूपौ द्वौ शब्दौ स्तः। प्रयोक्तुः बुद्धिस्थः शब्दः उच्चारणकाले भिन्नस्य शब्दस्य कारणं भवेत्। व्यवहारे शब्दनानात्वेऽपि सर्वे भेदाः व्यञ्जकध्वनेरेव। व्यञ्जकस्य ध्वनेः क्रमधर्मः व्यङ्ग्ये शब्दे आयाति। स्फोटप्रकाशके ध्वनौ वर्तमानः क्रमः स्फोटे वर्तते इति प्रतीतिः जायते। उच्चरिते शब्दे आत्मस्वरूपः ज्ञानं ज्ञेयस्वरूपः शब्दः च वर्तते। शब्दविषये उच्चारणं श्रवणम् अवतरणं च सन्ति। किञ्चन कार्यं श्रोत्रे दातुमभिलषन् वक्ता, उद्दिष्टार्थं बोधयितुं कः शब्दः प्रयोक्तव्यः इति चिन्तयति। अतः तस्य चिन्ता प्रथमं शब्दसम्बन्धिनी।

# Assignments

I. प्रश्नाः

1. द्वौ शब्दौ कौ ?
2. भेदमेके प्रचक्षते - कः भेदः?
3. अरणिस्थं ज्योतिः कस्य कारणम् ?
4. शब्दस्य पक्कता केन सिद्ध्यति ?
5. ज्ञाने किं किं दृश्येते ?
6. एवं त्रितयं शब्देऽपि दृश्यते - त्रितयं किम् ?
7. वक्तरि श्रोतरि च प्रथमतः कीदृशी बुद्धिः प्रवर्तते ?
8. शब्दः कस्य विशेषणं भवति ?
9. भेदवानिव जायते - कः?
10. प्रयोक्तुः श्रोतुः च बुद्धिः शब्दविषये एव - कथमिति सूचयतु।

II. **लघुटिप्पणीं लिखत -**

1. अगमप्राधान्यम्।
2. शब्दस्य व्यङ्ग्य व्यञ्जकभावः।
3. शब्दभेदाः।
4. त्रितयं शब्दोऽपि दृश्यते - आशयं विशदयत।
5. यथा प्रयोक्तुः प्राग्बुद्धिः शब्देष्वेव प्रवर्तते।
6. व्यवसायो ग्रहीतृणामेवं तेष्वेव जायते॥ - व्याख्यात।
7. द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।

   एको निमित्तं शब्दानां अपरोऽर्थे प्रयुज्यते॥ कारिका व्याख्यायत।

III. **निबन्धनात्मकः प्रश्नः**

1. शब्दभेदाः शब्दे अनेकारोपान् च विशदयत।

## Suggested Readings


1. भर्तृहरिः विरचितः वाक्यपदीय -ब्रह्मकाण्डः, पण्डित वेदानन्द झा, विरचितानन्द सूर्यमाया टीका त्रयसंवलितः, प्रकाशकः मन्दाकिनि संस्कृत विद्वत्परिषत्, दिल्ली, 2002
2. भर्तृहरिः, वाक्यपदीयम्, व्याख्या डा के चन्द्रशेखरन् नायर्, सुनिल्प्रिया व्याख्या, कार्तिक् बुक्स्, अनन्तपुरी, 2000


## References


1. भर्तृहरिः, वाक्यपदीयम्।
2. वाक्यपदीयम् (ब्रह्मकाण्डम्), व्याख्याद्वयोपेतम्, पण्डितरघुनाथशर्मा, चिन्मया इन्टर्नाषणल्, केरलम्, २०१५


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# शाब्दबोधकत्वकथनम्

## Learning Outcomes

- वाक्यपदीयस्य कारिकाभिः परिचयं सम्पादयति।
- व्याकरणदर्शने वाक्यपदीयस्य अद्वितीयतां जानाति।
- शब्दब्रह्मणः महत्त्वं गृह्णाति।
- शब्दस्य ग्राह्यग्राहक स्वभावमवगच्छति।

## Background

शब्दब्रह्मणः प्राप्त्युपायः वेद एव। शब्दस्य प्रामाण्यतानिर्णये शब्दप्रमाणं अत्यधिकं प्राधान्यमर्हति। तर्केण अनुमानेन वा ज्ञातुम् असाध्यं पुण्यपापविवेकादिकं शब्देन ग्राह्यमेव। शब्दस्य द्वौ भेदौ - व्यङ्ग्यव्यञ्जकरूपौ। तयोरेकः स्फोटः वैखरी शब्दकारणम् अपरा अर्थबोधजनिका वैखरी। शब्दस्य स्वरूपभेदे भिन्नाभिमतमस्ति। निमित्तप्रतिपादकयोः भेदः अस्तीति केचन। अपरे तु प्रयोक्तुः श्रोतुश्च ज्ञानभेदात् एकस्यैव शब्दस्य नानात्वं स्वीकुर्वन्ति। वक्तुः बुद्धौ जातस्य शब्दस्य, अर्थरूपेण बुद्धौ जातस्य शब्दस्य च कार्यकारणभावभेदः वर्तते। उदाहरणरूपेण अरणिस्थं वह्निं सूचयति। प्रयोक्तुः बुद्धिस्थः शब्दः उच्चारणे भिन्नस्य शब्दस्य कारणं भवेत्। शब्दस्य अर्थेन साकम्, अर्थस्य शब्देन च तादात्म्यं वर्तते। ध्वनिसाहाय्येन शब्दस्य पक्वतां सिद्ध्यति। बुद्धिस्थः शब्दः पूर्वापरक्रमरहितः। नादस्तु क्रमजन्मा। व्यञ्जकस्य वैखरी शब्दस्य व्यङ्ग्यस्य स्फोटस्य च कार्ये समानधर्मता वर्तते। ज्ञाने इव शब्दे

स्वरूपमर्थरूपं च प्रकाशते। शब्दश्रवणसमये श्रोता अर्थेन साकं शब्दस्वरूपमपि जानाति। शब्दरूपं ज्ञानमण्डस्थं प्राणिस्वरूपमिव वर्तते। शब्दविषये उच्चारणं श्रवणम् अवतरणं च सन्ति। चित्रकार्ये इव शब्दकार्येऽपि तिस्रः अवस्थाः सन्ति। शब्दमाकर्ण्य श्रोता अपि अर्थावगमनाय यतते। शब्दानामर्थे एव बोधः इत्यादिकं संसूच्य भर्तृहरिः शब्दबोधकान् विशदयति।

अस्मिन्नेकके शाब्दबोधिकाः कारिकाः सन्ति। ताः पठितुमस्माभिः उत्साहः कार्यः।

## Keywords

द्वे शक्ती - पृथक् अवस्थिते - विषयत्वमनापन्नैः - प्रकाश्येऽर्थे - शब्दधर्मौ अपोद्धृतौ - अविरोधेने - स्वरूपोपनिबन्धनाः - आदैच् प्रत्यायितैः - अग्निशब्दनिबन्धनः - न प्रतिबध्यते।

## Discussion

**श्लोकः 55**

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा**
**तथैव सर्वशब्दानाम् एते पृथगिव स्थिते॥ ५५॥**

**पदच्छेदः** - तेजसो यथा - तेजसः + यथा।

तथैव - तथा + एव।

पृथगिव - पृथक् + इव।

सर्वशब्दानां ग्राह्यत्वग्राहकत्वे द्वे शक्ती वर्तेते

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| यथा तेजसः ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती | यथा प्रकाशस्य ज्ञानविषयत्वं ज्ञानजनकः इति द्वे नैपुण्ये स्तः |
| तथा एव सर्वशब्दानां एते द्वे शक्ती | तेनैव रूपेण सर्वेषां शब्दानां ग्राह्यग्राहकत्वरूपे द्वे शक्तीः |

| | |
|---|---|
| पृथक् इव अवस्थिते | पृथक् रूपेण वर्तते (भिन्ने इव स्तः)। |

**सारः** - तेजसः स्वप्रकाशत्वं अन्यप्रकाशकत्वमिति द्वे शक्तीः। तथैव सर्वशब्दानां स्वप्रकाशत्व - अन्यप्रकाशकत्वमिति द्वे भेदे स्तः । स्वप्रकाशत्वमेव ग्राह्यः (ज्ञानविषयः), अन्यप्रकाशकत्वं ग्राहकत्वं (ज्ञानजनकत्वम्)।

**श्लोकः 56**

**विषयत्वमनापन्नैः शब्दैः नार्थः प्रकाश्यते।**
**न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः॥ ५६॥**

शब्दस्य ग्राह्यग्राहकशक्तिज्ञेन एव श्रुतस्य शब्दस्यार्थज्ञानम् अवगृह्यते

**पदच्छेदः** - विषयत्वमनापन्नैः - विषयत्वं + अनापन्नैः।
नार्थः - न + अर्थः।
सत्तयैव - सत्तया + एव।
तेऽर्थानामगृहीताः - ते + अर्थानाम् + अगृहीताः।

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अगृहीताः | श्रोत्रेन्द्रियविषयाः |
| ते (शब्दाः) सत्तया एव | ते शब्दाः सान्निध्यमात्रेण एव |
| अर्थानां न प्रकाशकाः | अर्थबोधजनकाः न |
| विषयत्वमनापन्नैः शब्दैः | अस्य शब्दस्य 'अयमर्थः' इति अर्थग्रहणरहितैः शब्दैः |
| अर्थः न प्रकाश्यते | अर्थप्रतीतिः न संजायते। |

**सारः** - शब्दस्य श्रवणगोचरता अर्थबोधकता चास्ति। अर्थेन सह बन्धं अज्ञात्वा, केवलं शब्दस्वरूपमेव गृह्यते चेत् ( अर्थज्ञानं विना वर्तमानेन शब्देन ) अर्थबोधः न जायते।

यः शब्दं, तस्यार्थं, तयोः सम्बन्धं च न जानाति सः विषयत्वमनापन्नः भवति।

**श्लोकः 57**

**अतोऽनिर्ज्ञातरूपत्वात् किमाहुरित्यभिधीयते।**
**नेन्द्रियाणां प्रकाश्येऽर्थे स्वरूपं गृह्यते तथा॥ ५७॥**

**पदच्छेदः** - अतोऽनिर्ज्ञातरूपत्वात् - अतः + अनिर्ज्ञात रूपत्वात्।

किमाहुरित्यभिधीयते - किम् + आहुः + इति + अभिधीयते।

नेन्द्रियाणां - न + इन्द्रियाणाम्।

प्रकाश्येऽर्थे - प्रकाश्ये + अर्थे।

शब्दार्थसम्बन्धज्ञानरहितैः जनः इन्द्रियस्वरूपं न गृह्णाति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| अतः अनिर्ज्ञातरूपत्वात् | तस्मात् अर्थबोधकजनक शब्दस्वरूपज्ञानाभावात् |
| किमाहेति अभिधीयते | शब्देऽश्रुते 'किम् आहेति' पृच्छते |
| प्रकाश्ये अर्थे | बोध्ये अर्थकार्ये |
| इन्द्रियाणां स्वरूपं न गृह्यते | इन्द्रियाणां स्वरूपमपि न प्रकाश्यते। |

**सारः** - श्रोत्रेन्द्रियेण गृहीतानां शब्दानामेव अर्थबोधकत्वात् शब्दस्वरूपज्ञानावाभावे किम् आह इति वक्ता पृच्छ्यते। किन्तु इन्द्रियग्राहि स्वभावतः अर्थज्ञानजनकानि भवन्तीतिअर्थज्ञानाय तेषां स्वरूपज्ञानं नापेक्षितम्।

**श्लोकः 58**

**भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ।**
**भेदकार्येषु हेतुत्वमविरोधेन गच्छतः॥ ५८॥**

**पदच्छेदः** - भेदेनावगृहीतौ - भेदेन + अवगृहितौ।

शब्दधर्मावपोद्धृतौ - शब्दधर्मौ + अपोद्धृतौ।

शब्दस्य ग्राह्यग्राहकभेदौ परस्परविरुद्धौ न संज्ञासंज्ञीव भवति

| **अन्वयः** | **अन्वयार्थः** |
|---|---|
| द्वौ शब्दधर्मौ अपोद्धृतौ | ग्राह्यत्वग्राहकत्वरूपौ शब्दधर्मौ द्वौ आरोपितौ |
| भेदेन अवगृहीतौ | भिन्नौ इति ज्ञातौ |
| भेदकार्येषु अविरोधेन | भेदाधिष्ठानेषु संज्ञासंज्ञि-कार्येषु विरोधं विना |

| | |
|---|---|
| हेतुत्वं गच्छतः | कारणत्वं प्राप्नुवतः |

**सारः** - शब्दस्य ग्राह्यत्वग्राहकत्वधर्मौ वर्तमाने अपि तौ वस्तुतः आरोपितौ। राहोः शिरः इति वत् अभेदेऽपि लोकं भेदः गृह्यते।

**श्लोकः 59**

**वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः।**
**आदैच्प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः॥ ५९॥**

**पदच्छेदः** - वृद्ध्यादयो यथा - वृद्ध्यादयः + यथा

संज्ञासंज्ञिरूपेण ग्राह्यग्राहकबन्धः अभेदमिति दृढयति

| अन्वयः | अन्वयार्थः |
|---|---|
| यथा वृद्ध्यादयः शब्दाः | यथा वृद्धिगुणादयः संज्ञाशब्दाः |
| स्वरूपोपनिबन्धनाः | स्वं रूपं (संज्ञां) बोधयन्तः |
| आदैच्प्रत्यायितैः शब्दैः संज्ञिभिः | आदैच् शब्दबोधितैः (आ ऐ औ) संज्ञिभिः |
| सम्बन्धं यान्ति | तादात्म्यसंबन्धं प्राप्नुवन्ति। |

**सारः** - यथा वृद्धिः गुणः इत्यादिभिः संज्ञाशब्दैः, आदैच् (आ ऐ औ ) इत्यादीनां शब्दानां बोधजनकैः संज्ञिभिः तादात्म्यं प्राप्नुवन्ति।

वृद्धिः इत्युच्यते चेत् - आ ऐ औ इति संज्ञ्यां वर्तमानानि अक्षराणि गृह्यन्ते। अत्र वृद्धिः संज्ञा। आदैच् संज्ञी च।

## Summarised Overview

भर्तृहरेः वाक्यपदीये ब्रह्मकाण्डे शाब्दबोधकत्वं विशदयति। शब्दस्य द्वौ भेदौ स्तः। ग्राह्यं ग्राहकं च। तेजसः ग्राह्यत्वं ग्राहकत्वं इव द्वे शक्ती सर्वशब्दानां ज्ञानविषयः ज्ञानजनकमिति द्वौ भेदे स्तः। शब्दस्य श्रवणगोचरता अर्थबोधकता चास्ति। अर्थेन सह बन्धं अज्ञात्वा, केवलं शब्दस्वरूपमेव गृह्यते चेत् (अर्थज्ञानं विना वर्तमानेन शब्देन ) अर्थबोधः न जायते। यः शब्दं, तस्यार्थं, तयोः सम्बन्धं च न जानाति सः विषयत्वमनापन्नः भवति। विषयत्वमनापन्नैः शब्दैः अर्थः न प्रकाश्यते।

शब्दार्थसम्बन्धज्ञानरहितः जनः इन्द्रियरूपं न जानाति। अश्रुतम् चेत् किमाह इत्यभिधीयते। बुद्धौ ग्राह्यग्राहकभेदः एव, तौ भेदौ संज्ञासंज्ञिसम्बन्धमिव तादात्म्यं प्राप्नुवतः। यथार्थतः अत्र अभेद एव इति दृढयति।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरत -**

1. शब्दस्य स्वरूपभेदे भिन्नान् मतान् सूचयत।
2. द्वे शक्ती तेजसो यथा - द्वे के ?
3. शब्दस्य ग्राह्यग्राहकशात्त्या किमवगम्यते ?
4. विषयत्वमनापन्नः कः ?
5. 'आदैच्प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः' - आशयं विशदयत।

**II. टिप्पणीं लिखत-**

1. शब्दस्य ग्राह्यग्राहकत्वम्।
2. विषयत्वमनापन्नः।
3. वृद्ध्यादयोः यथा शब्दाः स्वरूपोपनिबन्धनाः।
4. ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
   तथैव सर्वशब्दानाम् एते पृथगिव स्थिते॥ कारिका व्याख्यायत।

**III. निबन्धात्मकः प्रश्नः -**

1. शाब्दबोधकत्वं भर्तृहरिदिशा विवृणुत।

## Suggested Readings

1. Dr K Chandrasekharan Nair, Vakyapadiyam, Brahmakandam (Sunilpriya Malayalam commentary, Jai karthika Books 2000
2. भर्तृहरिः वाक्यपदीयम्।

## References


1. पण्डितरघुनाथशर्मा, वाक्यपदीयम् (ब्रह्मकाण्डम् ), व्याख्याद्वयोपेतम्, सम्पूर्णानन्द विश्वविद्यालयः, वाराणसी, १९८८
2. भर्तृहरिः वाक्यपदीयम्।


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE SPECIFIC ELECTIVE COURSE - 3 - M23SN03DE - व्याकरणदर्शनम्**
**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. वाक्यपदीयस्य प्रथमकाण्डस्य नाम किम् ? तस्मिन् कति कारिकाः सन्ति ?
2. ऋषीणां ज्ञानं कीदृशम् ?
3. सर्वैरङ्गीकृतं प्रमाणं किम् ?
4. स्फोटः कः ?
5. शुक्लो नीलः कपिलः कपोतः - कस्मिन् विभागे अन्तर्भवन्ति ?
6. जातिव्यक्तिपक्षयोः आचार्येण कः पक्षः अङ्गीकृतः ?
7. विद्याभेदाः के ?
8. किं निमित्तं वर्णपदवाक्यप्रतीतिः जायते ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. महाभाष्यानुसारं अनुबन्धचतुष्टयं विशदयत।

10. भर्तृहरिं अधिकृत्य टिप्पणीं लिखत।

11. लक्ष्यलक्षणे व्याकरणं इत्यस्य अर्थं प्रतिपादयत।

12. लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः - विशदयत।

13. प्रतीतपदार्थकः ध्वनिः शब्दः - व्याख्यायत।

14. अनादिनिधनं ब्रह्म शब्दत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ कारिकां व्याख्यात।

15. तेषां वचनं अनुमानेन बाध्यते - आशयं विशदयत।

16. अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
अन्वाख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः॥ कारिकां व्याख्यात।

17. हस्तस्पर्शादिवान्धेन विषमे पथि धावता।
अनुमानप्रधानेन विनिपातो न दुर्लभः॥ कारिकां व्याख्यात।

18. ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानाम् एते पृथगिव स्थिते॥ कारिकां व्याख्यात।

## SECTION – C

### (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. संस्कृतव्याकरणे महाभाष्यस्य प्राधान्यं विशदयत।

20. शब्दानुशासनस्य मुख्याप्रयोजनानि विशदयत।

21. आगमप्रमाणस्य प्रामाण्यं ग्रन्थदिशा समर्थयत।

22. वाक्यपदीयानुसारं शब्दस्य अर्थस्य सम्बन्धस्य च द्वैविध्यं विवृणुत।

**Model Question Paper (SET – B)**

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No..................** **QP CODE.......................**

**Name......................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**
**DISCIPLINE SPECIFIC ELECTIVE COURSE - 3 - M23SN03DE - व्याकरणदर्शनम् ।**
**(CBCS- PG)**
**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः । संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या ।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत ।** **(5 x2=10)**

**(Answer any five Questions in a paragraph)**

1. परिणामस्य लक्षणं किं ? उदाहरणं किम् ?
2. व्याकरणमहाभाष्ये अधिकारी कः ?
3. नित्यम् इति पदस्य लक्षणद्वयं किम् ?
4. किं नाम व्याकरणम् ?
5. वेदमन्त्रेषु शब्दस्य प्रतीकरूपेण वर्तमाना कल्पना का ?
6. एवं त्रितयं शब्दोऽपि दृश्यते - त्रितयं किम् ?
7. द्वे शक्ती तेजसो यथा - द्वे के ?
8. अस्मिन्नेव तमसि शुद्धं विवर्तते - किम् ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत ।** **(6 x 5=30)**

**(Answer any six Questions in a page )**

9. भर्तृहरिणा कानि प्रमाणानि अङ्गीकृतानि ?
10. अथ इत्यस्य प्रसक्तिः विशदयत ।

11. अथ गौरित्यत्र कः शब्दः ?

12. व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणं - व्याख्यात।

13. पूर्वे पाञ्चालः उत्तरे पाञ्चालः तैलं भुक्तं इत्यादीनामाशयः लिखत।

14. प्रोक्तुः शब्दस्य ग्राह्यग्राहकत्वं विशदयत।

15. आगममुपासीनो हेतुवादः न बाध्यते - आशयं विशदयत।

16. कार्यकारणभावेन योग्यभावेन च स्थिताः।

धर्मे च प्रत्यये च चाङ्गं सम्बन्धाः साध्वसाधुषु।। कारिकां व्याख्यात।

17. इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥ कारिकां व्याख्यात।

18. स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।

तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः॥ कारिकां व्याख्यात।

## SECTION - C
## (तृतीयो भागः)

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। (2x15=30)**

**(Write an essay on any two of the following)**

19. व्याकरणशास्त्रे वाक्यपदीयस्य स्थानम्।

20. आनुषङ्गिकप्रयोजनेषु यस्तु प्रयुङ्क्ते, चत्वारि, सक्तुमिव, सुदेवोऽसि वरुण - एषां व्याख्यात।

21. वाक्यपदीयग्रन्थानुसारं व्याकरणाध्ययनस्य प्राशस्त्यं विशदयत।

22. वाक्यपदीयग्रन्थानुसारं शब्दभेदान् शब्दे अनेकारोपान् च विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

व्याकरणदर्शनम्

COURSE CODE: M23SN03DE

SGOU

YouTube

ISBN 978-81-985210-3-3

9 788198 521033

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841